नि = निरक्षखस्वस्तिकः
र = निरक्षाधःखस्वस्तिकः
द ख उ ध = याम्योत्तरवृत्तम्
उ भू द = याम्योत्तररेखा (समसूत्रम्)
ख भू ध = ऊर्ध्वाधरसूत्रम्
नि भू र = निरक्षोर्ध्वाधरसूत्रम्
ध्रु भू व = ध्रुवसूत्रम्
त्र श रा = अहोरात्रवृत्तस्य व्यासः
ध्रु ल = अक्षज्या
भू ल = लम्बज्या
भू स = समशङ्कुः
श फ = उन्मण्डलशङ्कुः
भू श = क्रान्तिज्या
भू ज = अग्रा
श ज = कुज्या
स ज = तद्धृतिः
उ ध्रु चापः = ख नि चापः = द व चापः = ध र चापः = अक्षांशः

विषुवत्क्रान्तिवृत्तैक्यात् पूर्वभागस्थितात् स्थिराः ।।
मेषाद्या राशयः क्रान्तिवृत्तयोः पूर्वदिक्क्रमात् ।।२६५।। इति ।
(सिद्धान्ततत्त्वविवेके मध्यमाधिकारे)

यदा क्रान्तिपातस्य विंशत्यंशास्तदा प्रतीपगत्या मीनस्य दशांशे भवति तस्मात् षड्भान्तरे कन्याया दशांशे तत्र लग्नं क्रान्तिवृत्तं नाडीवृत्ते यथा तिष्ठति तथा बध्नीयात् । मिथुनस्य दशांशस्थानं नाडीवृत्ताच्चतुर्विंशत्यंशान्तरे उत्तरतः धनुषो दशांशस्थानं दक्षिणतो बध्नीयादिति । क्रान्तिवृत्तविषुववृत्तसंयोगस्थानं गोलसन्धिद्वयम् । विषुववृत्ताच्चतुर्विंशत्यंशस्थाऽपमवृत्तस्थानम् अयनसन्धिद्वयम् । चतुर्विंशत्यंशाः कथं ज्ञेया इति चेद् ध्रुवयष्टितो नाडीवृत्तं यावन्नवत्यंशाः क्षितिजाद् याम्योत्तरवृत्तं यावन्नवत्यंशा इति ज्ञेयम् । ततो मेषादिराशीनामहोरात्रवृत्तानि बध्नीयात् । तद् यथा । नाडीवृत्तमेव मेषतुलयोरहोरात्रवृत्तं वृषे क्रान्त्यंशाः ११।४५ एतदंशान्तरे उत्तरतो नाडीवृत्ताद् वृषाहोरात्रवृत्तं मिथुने क्रान्त्यंशाः २०।३६ एतदंशान्तरे मिथुनाहोरात्रवृत्तं कर्कटे क्रान्त्यंशाः परमाः २४।० एतदंशान्तरे कर्कटाहोरात्रवृत्तं बध्नीयात् । मिथुनाहोरात्रवृत्तमेव सिंहस्य वृषस्येव कन्यायाः । एवं दक्षिणभागेषु वृश्चिकादीनामहोरात्रवृत्तानि बध्नीयात् ।*

अथ विमण्डलनिवेशनम् । यथा क्रान्तिवृत्तं पृथक् कृतं एवं विमण्डलमपि राश्यङ्कं पृथक् पृथक् कृत्वा तत्र मेषादेर्व्यस्तं स्फुटं क्षेपपातं दत्त्वाऽग्रे चिह्नं कार्यम् । अथ क्रान्तिवृत्तस्य विमण्डलवृत्तस्य च क्षेपपातचिह्नयोः सम्पातं कृत्वा तस्मात् षड्भान्तरेऽन्यं च संपातं कृत्वा क्षेपपाताग्रतस्त्रिभेऽन्तरे क्रान्तिवृत्तादुत्तरतः स्फुटैर्विक्षेपभागैः पृष्ठतश्च त्रिभेऽन्तरे तैरेव भागैर्दक्षिणतः स्थिरं कृत्वा बिमण्डलं निवेशनीयम् । अथ पठिता विक्षेपास्ते त्रिज्यागुणाः शीघ्रकर्णेन भक्ताः स्फुटा ज्ञेयाः । भगोले त्रिज्यैव व्यासार्द्धम् । अत एव चन्द्रादीनां षड् वि-

---

* सिद्धान्तशिरोमणौ गोलबन्धाधिकारे २८ श्लोके भास्करोक्तेन भावेन सहात्रत्यो भावः किञ्चित् सङ्गच्छते ।

मण्डलानि कार्याणि । स्वस्वविमण्डले ग्रहा भ्रमन्तीत्यलम् सिद्धान्तसारविचारेण* ।।२।।

अब्दौघः स्वपदा $\frac{१}{४}$ न्वितः शशियम२१
घ्नाब्दः स्वखेषुत्रिभू१३५०
भागाढ्यो यमवाजिभि७२र्विरहितो-
ऽभ्राभ्राब्धिपक्षो२४००द्धृतः ।
लब्धेनाऽथ युतः कृतान्त२सहितः
शैलै७ र्विहृच् छेषकः
सूर्याजक्रमजो दिनादिक इहो-
ष्णांशोर्भवेद् वासरः ।।३।।

अथास्मिन् ग्रन्थे स्पष्टमेषार्ककालिका ग्रहा निबद्धा वर्त्तन्त इति सूचयन् मेषार्कस्फुटकालसाधनमाह ।** अब्दौघ इति । अब्दानां वर्षाणाम् ओघः समूहः वर्षगणः । स्वस्य पदैश्चतुर्भिर्भागैरन्वितो युक्तः ।

कृताब्धिश्रुतिवर्णाङ्घ्रियुगाश्चत्वार ईरिताः ।।१७६।।

इति नाममालायाम् । शशी एकः । यमौ द्वौ । विलोमगतित्वाद् एकविंशत्या हतश्चासौ अब्दश्च स्वस्य । खं शून्यम् । इषवो बाणाः पञ्च । त्रि प्रसिद्धः । भूरेकः । तैः पञ्चाशदधिकत्रयोदशशतैर्यो भागो लवस्तेन

---

* सिद्धान्तशिरोमणौ गोलबन्धाधिकारे १३-१५ श्लोकेषु भास्करोक्तोऽयं विषयः ।

** शतानन्दः ११५६ मिते वैक्रमाब्दे विरचिते स्वकीये भास्वतीकरणे स्पष्टसूर्यजमेषसङ्क्रान्तिकालं प्रसाध्य ततः पञ्चाङ्गगणितं प्रारभते (भास्वत्यास् तिथिध्रुवाधिकारे ३-४ श्लोकौ द्रष्टव्यौ) । लक्ष्मीपतिर् भास्वतीम् अनुकुर्वन् स्पष्टसूर्यजमेषसङ्क्रान्तिकालं प्रसाध्य ततो गणितं प्रारभते । शतानन्दस्वीकृता भगणादयः प्राचीनसूर्यसिद्धान्तम् अनुवर्तन्ते, लक्ष्मीपतिस्वीकृता भगणादयस् तु नवीनसूर्यसिद्धान्तम् अनुवर्तन्त इत्यनयोर्वैषम्यम् ।

आढ्यो युक्तः ।

पूर्णं खवाचकं शून्यम् । १७४।।

इति नाममालायाम् ।

भूता बाणाश्च विषया वायवः पञ्च पाण्डवाः ।। १७६।।
(नाममालायाम्)

इति च । यमौ द्वौ । वाजिनः सप्तः । तैर्द्विसप्तत्या विरहितः हीनः कार्यः ।

सप्तर्षयः स्वराः शैला वाजिद्वीपाग्निजिह्विकाः ।। १७७।।

इति नाममालायाम् । अभ्राभ्राब्धिपक्षैः चतुर्विंशतिशतैः उद्धृतो भक्तस्तेन लब्धेन । अथ इति स्वपदान्विताब्दौघस्मारकः । स लब्धाङ्केन युक्तः । कृतान्तौ यमौ द्वौ ताभ्यां सहितो युक्तः । शैलैः सप्तभिर्विहृद् भक्तः । शेषे भवः शेषकः । अजो मेषस्तस्य क्रमः संक्रमः सूर्यस्य अजक्रमः तस्माज्जातः दिनादिकः दिनम् आदिर्यस्य स दिनघटीपलमयः भवेत् । इह अस्मिन् ग्रन्थे उष्णाः तीक्ष्णा अंशवः किरणा यस्य स सूर्यस्तस्मात् तमारभ्य सूर्यवारमारभ्य वासरः दिवसाधिपतिर्भवेत् । एकशेषे सूर्यः द्विशेषे चन्द्र इत्यादि । सृष्टिकाले रविवारत्वात् तस्माद् गणनं युक्तमेव । उक्तं च शिरोमणौ (कालमानाध्याये)

लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव ।
मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः ।।१५।।

अथ गुणनभजनलक्षणं ब्रह्मसिद्धान्ते । गुणकारे गुण्यस्य गुणकतुल्यावृत्तिकरणम् । गुणने गुण्यान्तं गुणकेन हन्यादिति । भागहारे अन्त्याद् भाज्याद् यद्गुणो हरः शुद्ध्यति तत् फलमिति । अनयोः प्रपञ्चः पाटीगणितादौ बोध्यः ।

अत्रोपपत्तिः । जलवत् समीकृतायां भूमौ अभीष्टत्रिज्यामितकर्कटकेन वृत्तं दिगङ्कितं परिधौ भगणांशैश्चाङ्कितं कृत्वा तत्र प्राचीचिह्नाद् दक्षिणतो नातिदूरे प्रदेशे उत्तरेऽयने वृत्तमध्यस्थितेन कीलेनाऽर्कोदयो वेध्यः । ततोऽनन्तरं वर्षमेकं रव्युदया गणनीयास्ते च पञ्चषष्टयधिकशतत्रयतुल्या भवन्ति । तत्रान्तिमोदयः पूर्वोदयस्थानादासन्नो दक्षिणत एव

भवति । तयोरन्तरं विगणय्य ग्राह्यम् । ततोऽन्यस्मिन् दिने पुनरुदयो वेध्यः । स तु पूर्वचिह्नादुत्तरत एव भवति । तदप्युत्तरमन्तरं ग्राह्यम् । ततोऽनुपातः । यद्यन्तरद्वितयकलाभिरेकीकृताभिः षष्टिघटिका लभ्यन्ते तदा दक्षिणेमान्तरेण किमिति । लभ्यन्ते पञ्चदश घटिका एकत्रिंशत् पलानि एकत्रिंशदक्षराणि चतुर्विंशतिर्व्यक्षराणि १५।३१।३१।२४ । आभिर्घटिकादिभिः सहितानि पञ्चषष्टयधिकशतत्रयतुल्यानि सावनानि दिनानि एकस्मिन्नब्दे भवन्ति ।* तत्र वारस्थाने सप्ततष्टे जातो वारादिर्वर्षवृद्धिः १।१५।३१।३१।२४ ।



क्षि पू ज = क्षितिजवृत्तम्

पू = पूर्वस्वस्तिकः

प = प्रथमे वर्षे सूर्योदयस्य स्थानम्

द = प्रथमोदयस्य पञ्चषष्टयधिकशतत्रय३६५मिते दिवसे सूर्योदयस्य स्थानम्

सू = प्रथमोदयस्य षट्षष्टयधिकशतत्रय३६६मिते दिवसे सूर्योदयस्य स्थानम्

---

* सिद्धान्तशिरोमणौ भगणाध्याये वासनाभाष्ये भास्करोक्तोऽयं विषयः । तत्र भास्करेण ब्रह्मसिद्धान्तोक्ता भगणाः स्वीकृताः । ब्रह्मसिद्धान्तानुसारम् एकस्मिन् सौरवर्षे ३६५ दिनानि १५ घटिकाः ३० पलानि २२ विपलानि ३० प्रतिविपलानि भवन्ति । लक्ष्मीपतिना तु नवीनसूर्यसिद्धान्तानुसारिणो भगणाः स्वीकृताः । नवीनसूर्यद्धान्तानुसारं चैकस्मिन् सौरवर्षे ३६५ दिनानि १५ घटिकाः ३१ पलानि ३१ विपलानि २४ प्रतिविपलानि भवन्ति । इत्यनयोः सिद्धान्तयोर् वैषम्यं स्फुटम् । अतः समानयैव रीत्या कथं विभिन्नं फलं समुपलब्धम् इति परीक्षकाः सम्यग् विचारयन्तु ।

$$\frac{\text{६० घटिकाः} \times \text{प द}}{\text{प द} + \text{सू प}} = \begin{array}{cccc} \text{घ} & \text{प} & \text{वि} & \text{प्रवि} \\ \text{१५ ।} & \text{३० ।} & \text{२२ ।} & \text{३० ।} \end{array}$$

अत्र किञ्चिद् विचार्यते ।

क्षितिजे पूर्वस्वस्तिकसूर्योदयस्थानयोर् अन्तरस्थानम् अग्राचापम् अभिधीयते ।

> क्ष्माजे द्युरात्रसममण्डलमध्यभाग-
> जीवाग्रका भवति पूर्वपराशयोः सा ।।३९।।

(सिद्धान्तशिरोमणौ, त्रिप्रश्नवासनाधिकारे)

$$\text{क्रान्तिज्या} = \frac{\text{भुजज्या} \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

$$\text{अग्रा} = \frac{\text{क्रान्तिज्या} \times \text{त्रिज्या}}{\text{लम्बज्या}}$$

अतः

$$\text{अग्रा} = \frac{\text{भुजज्या} \times \text{परमक्रान्तिज्या}}{\text{लम्बज्या}}$$

> युक्तायनांशादपमः प्रसाध्यः
> कालौ च खेटात् खलु भुक्तभोग्यौ ।
> जिनांशमौर्व्या १३९७ गुणितार्कदोर्ज्या
> त्रिज्यो ३४३८ द्धृता क्रान्तिगुणः ... ।।४७।।

(सिद्धान्तशिरोमणौ, स्पष्टाधिकारे)

अतोऽग्रा सायनग्रहाद् एव साधयितुं शक्यत इति स्पष्टम् । अग्रातः साधितः सूर्योऽपि सायनो भवति । एतच् च भास्करः स्वयं मुखेनैव कथयति—

> छायातोऽग्रातो वा भानुः सक्रान्तिपात एव स्यात् ।
> पातोनः स्फुटभानुः स्फुटभानूनो भवेत् पातः ।।३९।।

(सिद्धान्तशिरोमणौ, यन्त्राध्याये)

अतोऽग्रातः साधितः सूर्यः सायनो भवतीति नास्ति विप्रतिपत्तिः । अतो भास्करोक्तदिशा साधितं वर्षमानं सायनवर्षमानं भवितुम् अर्हति, न निरयणवर्षमानम् । परन्तु—

पञ्चाङ्गरामा३६५स्तिथय:१५ खरामा: ३०
सार्धद्विदस्रा: २२।३० कुदिनाद्यमब्दे ।
अस्याऽर्कमासोऽर्क१२लव प्रदिष्ट:
स्त्रिशद्३०दिन: सावनमास एव ।।८।।

(सिद्धान्तशिरोमणौ, मध्यगतिवासनाधिकारे)

अतो भास्करेण सायनसूर्यवेधेन निरयणवर्षमानं यत् साधितं, तत् समीचीनम् इति कथयितुं वयं न शक्नुमः ।

अन्यच् च । अग्राया: स्वरूपम्

$$\frac{\text{भुजज्या} \times \text{परमक्रान्तिज्या}}{\text{लम्बज्या}}$$

इत्यनेन समीकरणेन साध्यत इति पूर्वम् एवाऽवोचाम । लम्बज्या च प्रतिदेशं भिद्यते । अतोऽनया रीत्या साधितं वर्षमानं प्रतिदेशं भिद्येत ।

अन्यच् च । भुजज्यागतिर् अग्रागतिश् च समाने न भवत: । अतोऽग्रागत्याऽनुपातेन साधिता भुजगति: कथं समीचीना स्यात् । एषा रीतिश् चेदम्प्रथमतया केनोद्भावितेति वयं न जानीम: । भास्करो ब्रह्मगुप्तम् अनुसरतीति तु तस्य ग्रन्थाद् एव ज्ञायते । ब्रह्मगुप्त: सायननिरयणयोर् भेदं न करोति स्मेति भास्करोक्त्या ज्ञायते । तथाहि—

नहि क्रान्तिपातो नास्तीति वक्तुं शक्यते । प्रत्यक्षेण तस्योपलब्धत्वात् । . . . तत् कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत् तदा स्वल्पत्वात् तैर्नोपलब्ध: । इदानीं बहुत्वात् साम्प्रतिकैरुपलब्ध: ।

(सिद्धान्तशिरोमणौ, गोलबन्धाधिकारे १७–१९ श्लोकानां वासनाभाष्ये)

एष भावो ब्रह्मगुप्तोक्त्याऽपि स्फुटं ज्ञायते । तथाहि—

यदि भिन्ना: सिद्धान्ता भास्करसङ्क्रान्तयो विभेदसमा: ।
स स्पष्ट: पूर्वस्यां विषुवत्यर्कोदयो यस्य ।।४।।

(ब्राह्मस्फुटसिद्धान्ते, संज्ञाध्याये)

अतो ब्रह्मगुप्तेनेयं रीतिर् उद्भाविता चेद् देशभेदजनितो दोषो भुजज्याऽग्रागत्योर् भेदजनितो दोषश् चेति द्वौ दोषावेव तस्य रीत्यां पतत: । भास्करस्योपरि तु निरयणसायनभेदजनितो दोषश् चेति त्रयो दोषा: पतन्ति । लक्ष्मीपतेर् उपरि तु ब्रह्मसिद्धान्तसूर्यसिद्धान्तभेदजनितदोषश् चेति चत्वारो दोषा: पतन्ति ।

यद्वा अन्योन्याश्रयदोषादागमप्रामाण्यमङ्गीकृत्य एकमब्दगणं स्वीकृत्य सावयवोऽहर्गणः साध्यः । यथा । अब्दः १ । मासीकृतः १२ । पृथक् १२ । एकत्र युगाधिमासैः ।

षड्वह्नित्रिहुताशाङ्कतिथय १५९३३३६ श्चाधिमासकाः ॥३८॥
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति मितैः १५९३३३६ गुणिताः १९१२००३२ ।

खचतुष्कसमुद्राष्टकुपञ्च ५१८४०००० रविमासकाः ॥३९॥
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति सूर्यमासैः ५१८४०००० भक्ताः । लब्धं मासादि ०।११।३।५३। २४। अयमेकवर्षजोऽधिमासो ज्ञेयः । लब्धाधिमासकैर्युक्ताः १२।११। ३। ५३। २४ दिनीकृताः ३७१।३।५३।२४। द्विष्ठाः । एकत्र

तिथिक्षया यमार्थाश्विद्व्यष्टव्योमशराश्विनः२५०८२२५२॥३८॥
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति तिथिक्षयैः २५०८२२५२ गुणिताः ९३०७१४१६५८।०।१६।४८।

चान्द्राः खाष्टखखव्योमखाग्निखर्त्तुनिशाकराः
१६०३०००००८० ॥३७॥
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति चान्द्रवासरैः १६०३०००००८० र्भाजिता । लब्धानि क्षयदिनानि ५।४८।२१।५२।३६। तै रहितो द्विष्ठो जातः सावनदिनगणः सावयवः ३६५।१५।३१।३१।२४।*

---

* अत्र गणितम् ।

युगाधिमासाः = १५९३३३६
युगसूर्यमासाः = ५१८४००००
युगतिथिक्षयाः = २५०८२२५२
युगचान्द्रवासराः =१६०३०००००८०

(सूर्यासिद्धान्ते, मध्यमाधिकारे, ३७–३९ श्लोकेषु)

सूर्याब्दसङ्ख्यया ज्ञेयाः कृतस्याऽन्ते गता अमी ।
खचतुष्कयमाद्रयग्निशररन्ध्रनिशाकराः १९५३७२००००॥४७॥
अत ऊर्ध्वममी युक्ता गतकालाब्दसंख्यया ।
मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः ॥४८॥
पृथक्स्थास्तेऽधिमास१५९३३३६घ्नाः सूर्यमास५१८४००००
विभाजिताः ।
लब्धाऽधिमासकैर्युक्ता दिनीकृत्य दिनाऽन्विताः ॥४९॥
द्विष्ठास्तिथिक्षया २५०८२२५२ भ्यस्ताश्चान्द्रवासर १६०३००००८०
भाजिताः ।
लब्धोनरात्रिरहिता लङ्कायामार्धरात्रिकः ॥५०॥
सावनो द्युगणः सूर्याद् दिनमासाब्दपास्ततः ।
सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः ॥५१॥

(सूर्यसिद्धान्ते, मध्यमाधिकारे)

अब्दः १। मासीकृतः १२ × १ = १२

$$\text{एकवर्षजोऽधिमासः} = \frac{\text{१२} \times \text{युगाधिमासाः}}{\text{युगसूर्यमासाः}}$$

$$= \frac{\text{१२} \times \text{१५९३३३६}}{\text{५१८४००००}}$$

$$= \frac{\text{१९१२००३२}}{\text{५१८४००००}}$$

$$= \frac{\text{११९५००२}}{\text{३२४००००}}$$

$$= \frac{\text{६६३८९}}{\text{१८००००}}$$

= ०।११।३।५३।२४

एकवर्षजाश् चान्द्रमासाः　= १२ + (०।११।३।५३।२४)
　　= १२।११।३।५३।२४
　　दि　घ　प　वि
एकवर्षजानि चान्द्रदिनानि　= ३७१ । ३ । ५३ । २४

मा दि घ प वि
१८०००००)६६३८९(० । ११ । ३ । ५३ । २४
× ३०
६०००)६६३८९
६०००
६३८९
६०००
३८९ × ६०
१००)३८९
३००
८९ × ६०
५)८९ × ३
२६७

५)२६७
२५
१७
१५
२ × ६०
१)२ × १२
२४
२४

एकवर्षजास् तिथिक्षयाः = $\frac{(३७१।३।५३।२४) \times \text{युगतिथिक्षयाः}}{\text{युगचान्द्रदिनानि}}$

$= \frac{(३७१।३।५३।२४) \times २५०८२२५२}{१६०३०००००८०}$

$= \frac{९३०७१४१६५८।०।१६।४८}{१६०३०००००८०}$

=५।४८।२१।५२।३६

२५०८२२५२
× (३७१।३।५३।२४)

२५०८२२५२	७५२४६७५६	७५२४६७५६	१००३२९००८
१७५५७५७६४			५०१६४५०४
७५२४६७५६		१२५४११२६०	६०१९७४०४८
९३०५५१५४९२		१३२९३५९३५६	४८
१६२६१६६	२२३२३२०४	१००३२९००	
९३०७१४१६५८	९७५६९९६०	१३३९३९२२५६	
	०	१६	

दि घ प वि प्रवि

१६०३००००८०)९३०७१४१६५८।०।१६।४८(५।४८।२१।५२।३६

८०१५०००४००

१२९२१४१२५८ × ६० + ०

७७५२८४७५४८०

६४१२०००३२०

१३४०८४७२२८०

१२८२४०००६४०

५८४४७१६४० × ६० + १६

३५०६८२९८४१६

३२०६०००१६०

३००८२९६८१६

१६०३००००८०

१४०५२९६७३६ × ६० + ४८

८४३१७८०४२०८

८०१५०००४००

४१६७८००२०८

३२०६०००१६०

९६१८०००४८ × ६०

५७७०८००२८८०

४८०९०००२४०

९६१८०००४८०

९६१८०००४८०

एकवर्षजानि चान्द्रदिनानि = ३७१। ३।५३।२४

एकवर्षजानि क्षयदिनानि = (—) ५।४८।२१।५२।३६

३६५।१५।३१।३१।२४

दि घ प वि प्रवि

एकवर्षजः सावनदिनगणः सावयवः = ३६५ । १५ । ३१ । ३१ । २४

यद्वा खचतुष्करदार्णवैः ४३२०००० युगसूर्यभगणः (सूर्यसिद्धान्ते, मध्यमाधिकारे २९ श्लोकः) यदि

वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो १५७७९१७८२८ युगे ।।३७।।
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति १५७७९१७८२८ सूर्यसावनदिनानि लभ्यन्ते तदा एकाब्दे किमिति लब्धं दिनादिर्वर्षवृद्धिः ३६५।१५।३१।३१।२४।० ।* दिनस्थाने सप्ततष्टे एको वारोऽब्दे वर्धते इति तस्य साधनार्थम् अब्दौघ इत्युक्तम् १ । पञ्चदशघटीसङ्ग्रहार्थं स्वपदान्वित इत्युक्तम् १५ । एकत्रिंशत्पलादिसङ्ग्रहार्थं शशियमघ्नाब्द इत्याद्युक्तम् । एकविंशतिगुणाब्दः २१ स्वकीयपञ्चाशदधिकत्रयोदशशतभागेन ०।०।५६ अन्वितः २१।०।५६ चतुर्विंशतिशतैर्भक्तः । लब्धं दिनादि ०।०।३१।३१।२४।०। अनेन युक्तो

---

* अत्र गणितम् ।

```
                               दि  घ   प वि प्रवि
    ४३२००००)१५७७९१७८२८(३६५।१५।३१।३१।२४
            १२९६००००
            ────────
             २८१९१७८२       १२००)३७८२८
             २५९२००००            ३६००
             ────────            ─────
              २२७१७८२८            १८२८
              २१६०००००            १२००
              ────────            ────
               १११७८२८ × ६०         ६२८ × ६०
               ─────────────        ────────
       ७२०००)१११७८२८              २०)६२८
              ७२०००                  ६२०
              ─────                  ───
              ३९७८२८                   ८ × ६०
              ३६००००                   ──────
              ──────                 १)८ × ३
               ३७८२८ × ६०               ──────
               ──────────              २४
         १२००)३७८२८                    २४
                                       ──
                                       ०
```

जातः १।१५।३१।३१।२४।० इति ।*

---

* अत्र गणितम् ।

$$\begin{array}{lccccc} & \text{दि} & \text{घ} & \text{प} & \text{वि} & \text{प्रवि} \\ \text{एकस्मिन् सौरवर्षे सावनोऽहर्गणः} = & ३६५ ~।& १५ ~।& ३१ ~।& ३१ ~।& २४ \end{array}$$

दिनसङ्ख्या सप्तभिस् तक्षणीया ।

$$\begin{array}{lccccc} & \text{दि} & \text{घ} & \text{प} & \text{वि} & \text{प्रवि} \\ \text{वर्षवृद्धिः} = & १ ~।& १५ ~।& ३१ ~।& ३१ ~।& २४ \end{array}$$

$$\begin{array}{cc} \text{दि} & \text{घ} \\ १ ~।& १५ \end{array} = \left(१ + \frac{१५}{६०}\right) (\text{दिनादि}) = १ + \frac{१}{४}$$

$$\begin{array}{ccc} \text{प} & \text{वि} & \text{प्रवि} \\ ३१ ~।& ३१ ~।& २४ \end{array} = \left(\frac{३१}{६० \times ६०} + \frac{३१}{६० \times ६० \times ६०} + \frac{२४}{६० \times ६० \times ६० \times ६०}\right) (\text{दिनादि})$$

$$= \frac{१}{२४००}\left(\frac{३१ \times २}{३} + \frac{३१}{९०} + \frac{२}{९० \times ५}\right)$$

$$= \frac{१}{२४००}\left(\frac{६२}{३} + \frac{३१}{९०} + \frac{२}{४५०}\right)$$

$$= \frac{१}{२४००}\left(\frac{६२ \times ४५० + ३१ \times १५ + २ \times ३}{१३५०}\right)$$

$$= \frac{१}{२४००}\left(\frac{२७९०० + ४६५ + ६}{१३५०}\right)$$

$$= \frac{१}{२४००}\left(\frac{२८३७१}{१३५०}\right)$$

$$= \frac{१}{२४००}\left(२१\frac{२१}{१३५०}\right)$$

$$\begin{array}{r} १३५०)\,२८३७१\,(२१ \\ \underline{२७००} \\ १३७१ \\ \underline{१३५०} \\ २१ \end{array}$$

$$\text{अतो वर्षवृद्धिः} = \text{व} + \frac{१}{४}\text{स्व} + \frac{२१\,\text{व} + \frac{२१}{१३५०}\,\text{स्व}}{२४००}$$

क्षेपकोपपत्तिः ।

मध्यमानयनं कार्यं ग्रहाणामिष्टतो युगात् ।।५६।।

(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति बचनात् कलेरहर्गणः १७८९०३५ आदित्यवारे ।*

---

* लक्ष्मीपतिर् गोभूमेघ १७१९ मिते शकवत्सरे स्पष्टसूर्यजमेषसङ्क्रान्तिकालं ग्रन्थारम्भकालं मन्यते । अस्मिन् ग्रन्थे ग्रन्थारम्भकालिको मध्यमसूर्यः ३५७ । ५१ । ५८ अंशादिमितो मध्यमचन्द्रश् च १५८ अंशमितोऽस्ति (अस्यैवाऽधिकारस्य ७–८ श्लोकौ द्रष्टव्यौ) ।

		अं	क	वि
चन्द्रः	=	१५८	०	०
सूर्यः	=(—)	३५७	५१	५८
		१६०	८	२

१२)१६० । ८ । २(१३ लब्धिः

१५६

४ । ८ । २ शेषम्

अत्र लब्धिसङ्ख्या गततिथिसङ्ख्यां सूचयति । एतावता ग्रन्थारम्भकालिकी मध्यमा गततिथिस् १३ तथा मेषसङ्क्रान्तिकालश् च चतुर्दश्यां बभूवेति ज्ञायते । एतत् प्रकाराऽन्तरेणाऽपि सिध्यति । तद् यथा ।

केतकरोपाह्ववेङ्कटेशरचितः पञ्चाङ्गगणनाविषयक इन्डिअन् यान्ड् फर्इन् क्रोनल्अजि इति नाम्ना प्रसिद्धो ग्रन्थ आङ्ग्लभाषायां वर्तते । तस्य ग्रन्थस्य सारण्यः कारिकायाः कतिचनांऽशाश् च नयराजपन्तेन संस्कृतभाषायाम् अनूद्य पूर्णिमायाः ७१ अङ्के प्रकाशिताः सन्ति । तदनुसारम् अत्र १७१९ मितस्य शकवत्सरस्य मेषसङ्क्रान्तिकालस्य गणना प्रदर्श्यते ।

बिवरणम्	शकाब्दः	तिथिः	वारः
तृतीयस्मात् कोष्ठात्	१७२२	१६·५४३	५·७४५
चतुर्थात् कोष्ठात्	(—) ३	३·१९४	३·७७६
	१७१९	१३·३४९	१·९६९

·९६९ × ६० = ५८·१४ । ·१४ × ६० = ८·४

अतो मेषसङ्क्रान्तेर् वारादिः = १ । ५८ । ८

अतः १७१९ मिते शकवत्सरे (१८५४ मिते वैक्रमाब्दे) स्पष्टमेषसङ्क्रान्तिश् चैत्रशुक्लचतुर्दश्याम् आदित्यवारे बभूवेति सिध्यति । १८५४ मितस्य वैक्रमाब्दस्य लक्ष्मीपतिना समुपयुक्तं पञ्चाङ्गम् अपि समुपलभ्यते । तत्र

१३ र २८।४६ मेषेऽर्कः ५९।८

इति लिखितं समुपलभ्यते । अनेनाऽपि चैत्रशुक्लचतुर्दश्याम् आदित्यवारे मेषसङ्क्रान्तिर् बभूवेति ज्ञायते ।

अथ १७१९ मितस्य शकवत्सरस्य चैत्रशुक्लचतुर्दश्याम् आदित्यवारे सूर्यसिद्धान्तोक्तरीत्याऽऽहर्गणः साध्यते ।

शकाब्दाः = १७१९

शकाब्दारम्भे कलिगताब्दाः = ३१७९

ग्रन्थारम्भसमये कलिगताब्दाः = ४८९८

$$\begin{aligned}
\text{सौरमासगणः} &= \text{४८९८} \times \text{१२} + \text{गतमासाः}\\
&= \text{५८७७६} + \text{०}\\
&= \text{५८७७६}
\end{aligned}$$

$$\begin{aligned}
\text{अधिमासाः} &= \frac{\text{युगाधिमासाः} \times \text{सौरमासगणः}}{\text{युगसौरमासाः}}\\
&= \frac{\text{१५९३३३६} \times \text{५८७७६}}{\text{५१८४००००}}\\
&= \frac{\text{१९९१६७} \times \text{५८७७६}}{\text{६४८००००}}\\
&= \frac{\text{१९९१६७} \times \text{७३४७}}{\text{८१००००}}\\
&= \frac{\text{१४६३२७९९४९}}{\text{८१००००}}\\
&= \text{१८०६ (शेषस्य परित्यागे)}
\end{aligned}$$

$$\begin{array}{r}
\text{१९९१६७}\\
\underline{\times\ \text{७३४७}}\\
\text{१३९४१६९}\\
\text{७९६६६८}\\
\text{५९७५०१}\\
\underline{\text{१३९४१६६}}\\
\text{१४६३२७९९४९}
\end{array}$$

$$\begin{array}{l}
\text{८१००००)१४६३२७९९४९(१८०६}\\
\qquad\qquad\quad\underline{\text{८१००००}}\\
\qquad\qquad\quad\text{६५३२७९९}\\
\qquad\qquad\quad\underline{\text{६४८००००}}\\
\qquad\qquad\qquad\text{५२७९९४९}\\
\qquad\qquad\qquad\underline{\text{४८६००००}}\\
\qquad\qquad\qquad\text{४१९९४९ अधिशेषम्}
\end{array}$$

चान्द्रमासगणः = सौरमासगणः + अधिमासाः

= ५८७७६ + १८०६

= ६०५८२

तिथिगणः = ६०५८२ × ३० + गततिथयः

= १८१७४६० + १३

= १८१७४७३

$$\text{अवमदिनानि} = \frac{\text{युगावमदिनानि} \times \text{तिथिगणः}}{\text{युगतिथिगणः}}$$

$$= \frac{\text{२५०८२२५२} \times \text{१८१७४७३}}{\text{१६०३००००८०}}$$

$$= \frac{\text{६२७०५६३} \times \text{१८१७४७३}}{\text{४००७५००२०}}$$

$$= \frac{\text{११३९६५७८९४७२९९}}{\text{४००७५००२०}}$$

= २८४३८ (शेषस्य परित्यागे)

```
     ६२७०५६३     ४००७५००२०)११३९६५७८९४७२९९(२८४३८
   × १८१७४७३                 ८०१५०००४०
   ---------                 ---------
    १८८११६८९                 ३३८१५७८५४७
   ४३८९३९४१                  ३२०६०००१६०
  २५०८२२५२                   ----------
 ४३८९३९४१                    १७५५७८३८७२
 ६२७०५६३                     १६०३००००८०
५०१६४५०४                     ----------
६२७०५६३                       १५२७८३७९२९
--------------                १२०२२५००६०
११३९६५७८९४७२९९               ----------
                               ३२५५८७८६९९
                               ३२०६०००१६०
                               ----------
                               ४९८७८५३९ अवशेषम्
```

अहर्गणः = तिथिगणः — अवमदिनानि

= १८१७४७३ — २८४३८

= १७८९०३५

अहर्गणपरीक्षा—

७)१७८९०३५(२५५५७६
१७८९०३२
३ शेषम्

कलियुगादौ शुक्रवासर आसीत् । तथा च—

कलेर्गताब्दैरथ वा दिनाद्यं
पूर्वं यदुक्तं खलु तत् प्रसाध्यम् ।
अब्दाधिपस्तत्र सितादिकः स्याद्
ध्रुवाश्च युक्ताः कलिवक्त्रखेटैः ॥११॥

(सिद्धान्तशिरोमणौ, प्रत्यब्दशुद्धौ)

अतः शून्यशेषे शुक्रवार इति क्रमेण सोमवार आगच्छति । लक्ष्मीपतिनैतावन्तम् एवाऽहर्गणं प्रसाध्याऽऽदित्यवार इति लिखितम् । अतो विषम उपन्यास उपगतः । तदर्थं किञ्चिद् उच्यते । सूर्यसिद्धान्तानुसारम् अर्धरात्रे वारप्रवेशो भवतीति पूर्वोक्तात् सूर्यसिद्धान्तवाक्याद् एव ज्ञायते । अतः सूर्यसिद्धान्तमतानुसारम् अर्धरात्राद् एव सोमवारः प्रवृत्तः । लक्ष्मीपतिस् तु सूर्योदयाद् वारप्रवेशं मन्यते (अस्यैवाऽधिकारस्य ७ श्लोको द्रष्टव्यः) । अतो मेषसङ्क्रान्तिकाले लक्ष्मीपतिस्वीकृतपद्धत्यनुसारम् आदित्यवार एवाऽऽसीद् इति स्फुटीभवति ।

अयम् एवाऽहर्गणः सुमतितन्त्रोक्तरीत्याऽऽपि समागच्छति । तद् यथा—

९ क पत्रे

कल्याब्द रविभिर्घातं चैत्रादिमाससंयुतं ।
द्विस्थ त्रिंशगुणं कृत्वा भूय ताश्च द्विधा कृतां ।
पश्चाब्दिरन्ध्रशक्राप्ता मध्यराशौ विशोधयेत् ।
भाजये स्वादसप्ताङ्कैः तलब्दमधिमार्षकम्
ऊर्द्ध राशौ नियोज्यामि त्रिंशघ्नं तिथिसंयुतं
द्विस्थ रुवधन्द्विस्थं लोकाद्रितिथित्र्यम्बकै
फलं मध्ये विहीनां च लोकाभ्रसप्तभिर्हृतम्
फलावमेन पिण्डौणां शुक्रादि द्युगणो मत ॥

अस्य सूत्रस्याङ्क

गताब्द गुण १२ चैत्रादिमासयुत । द्विधा अधरि गुण ३० तं भूय

द्विधा भाग १४६४५ फल मध्ये शोध्य भाग ६७६ । फला उपरिमराशौ योज्य । गुण ३० द्विधा अधरि गुण ११ भूय द्विधा भाग

९ ख पत्रे

१११५७३। फल मध्ये शोध्य भाग ७०३ फल हीन शुक्रादि ॥

सुमते महातन्त्रे चतुर्थोहर्गण समाप्ता ॥०॥

(२०३५ मिते वैक्रमाब्दे त्रिभुवनविश्वविद्यालयाऽन्तर्गतेन पाठचक्रमविकास-केन्द्रेण प्रकाशितस्य नयराजपन्तेन देवीप्रसादभण्डारिणो दिनेशराजपन्तस्य च सहायताम् अवलम्ब्य सम्पादितस्य सुमतितन्त्रस्य १६ पृष्ठाद् उद्धृतोऽयम् अंशः ।)

संशोधितः पाठः

कलेर् युगस्य याताऽब्दा बाहुचन्द्रैः १२ समाहताः ।
चैत्रप्रभृतिभिर् मासैर् अतियातैः समन्विताः ॥
सम्पद्यन्ते सौरमासा, मासाः सौराऽभिधा अमी ।
द्विष्ठा अधः खत्रि३०हता, भूयस् तेऽपि द्विधा स्थिताः ॥
पञ्चाब्धिरन्ध्रशक्रा १४६४५ घ्नाः शोध्या मध्यमराशितः ।
ते भाज्याः स्वादसप्ताङ्कैर् ६७६ लब्धाः स्युर् अधिमासकाः ॥
एतैर् योज्याः सौरमासाश्, चान्द्रमासगणो भवेत् ।
स खत्रि३०घ्नो व्यतीताभिः शुक्लादितिथिभिर् युतः ॥
चान्द्राऽहनिचयः सिध्येच् चान्द्राऽहनिचयस् त्वसौ ।
द्विष्ठोऽधो रुद्र ११ निहतो, भूयः सोऽपि द्विधा स्थितः ॥
लोकाद्रितिथिरुद्रा १११५७३ घ्नो मध्यराशेर् विशोधितः ।
लोकाभ्रसप्तभिर् ७०३ भक्तः स्युर् अवाप्तास् तिथिक्षयाः ॥
एतैर् हीनस् तिथिगणः सावनाऽहर्गणो भवेत् ।
सावनाऽहर्गणे तष्टे सप्तभिर् ७ वार आप्यते ॥
शेषे शून्या ० दिभिस् तुल्ये वारः शुक्रादिको भवेत् ।
परीक्षा घस्रसङ्घस्य कार्या वारेण धीमता ॥

अत्राऽङ्कव्याख्या ।

कलिगताऽब्दान् बाहुचन्द्रैः १२ (द्वादशभिः) गुणयेद्, गुणनफले

वर्तमानस्य वर्षस्य चैत्रादिगतमासा योज्याः, सौरमासगणः स्यात् । सौरमासगणं खत्रिभिः ३० (त्रिंशता) गुणयेत्, प्रथमः स्यात् । प्रथमं पञ्चाब्धिरन्ध्रशक्रैः १४९४५ (एकम् अयुतं चत्वारि सहस्राणि नव शतानि पञ्चचत्वारिंशद् अनया सङ्ख्यया) भजेद् द्वितीयः स्यात् । प्रथमाद् द्वितीयं शोधयेत् । शेषं स्वादसप्ताङ्कैः ९७६ (नव शतानि षट्सप्ततिः अनया सङ्ख्यया) भजेद् अधिमासा लभ्यन्ते । सौरमासगणेऽधिमासा योज्याः, चान्द्रमासगणः स्यात् । चान्द्रमासगणं खत्रिभिः ३० (त्रिंशता) गुणयेद्, गुणनफले वर्तमानस्य चान्द्रमासस्य शुक्लादिका गततिथयो योज्याः, तिथिगणः स्यात् । तिथिगणं रुद्रैः ११ (एकादशभिः) गुणयेत् तृतीयः स्यात् । तृतीयं लोकाद्रितिथिरुद्रैः १११५७३ (एकं लक्षम् एकम् अयुतम् एकं सहस्रं पञ्च शतानि त्रिसप्ततिः अनया सङ्ख्यया) भजेच् चतुर्थः स्यात् । तृतीयाच् चतुर्थं शोधयेत् । शेषं लोकाभ्रसप्तभिः ७०३ (सप्त शतानि त्रीणि अनया सङ्ख्यया) भजेद् अवमाहा लभ्यन्ते । अवमाहैर् ऊनस् तिथिगणः सावनाऽहर्गणः (अहर्गणः) भवति सावनाऽहर्गणं सप्तभिस् ७ तक्ष्णुयात् । शून्य ० शेषे शुक्रवारः, एक १ शेषे शनिवारः इति क्रमेण वारो भवति । वारेणाऽहर्गणपरीक्षा कार्या ।

$$\text{कलिगताब्दाः} \times \text{१२} + \text{वर्तमानस्य वत्सरस्य चैत्रादयो गतचान्द्रमासाः} = \text{सौरमासगणः}$$

$$\frac{\text{३० सौरमासगणः} - \dfrac{\text{३० सौरमासगणः}}{\text{१४९४५}}}{\text{९७६}} = \text{अधिमासाः}$$

(अत्र पूर्णाङ्कलब्धिर् एव ग्राह्या)

$$\text{सौरमासगणः} + \text{अधिमासाः} = \text{चान्द्रमासगणः}$$

$$\text{३० चान्द्रमासगणः} + \text{वर्तमानस्य चान्द्रमासस्य शुक्लादिका गततिथयः} = \text{तिथिगणः}$$

$$\frac{\text{११ तिथिगणः} - \dfrac{\text{११ तिथिगणः}}{\text{१११५७३}}}{\text{७०३}} = \text{अवमाहाः}$$

(अत्राऽपि पूर्णाङ्कलब्धिर् एव ग्राह्या)

तिथिगणः — अवमाहाः = सावनाऽहर्गणः

अहर्गणपरीक्षा—

७) सावनाऽहर्गणः (लब्धिः

शेषम्

शेषसङ्ख्याः	०	१	२	३	४	५	६
वाराः	शुक्रः	शनिः	आदित्यः	सोमः	मङ्गलः	बुधः	बृहस्पतिः

(२०४० मिते वैक्रमाब्दे भोलानाथपौडेलेन रुक्मनाथपौडेलस्य सहायताम् अवलम्ब्य सम्पादितायाः प्रकाशितायाश् च मेधाया द्वितीयेऽङ्के मुद्रिताद् नयराज-पन्तस्य सुमतितन्त्रोक्तस्य सूर्यसिद्धान्तस्याऽनुयायी गणचक्रचूडामणिर् ब्रह्मगुप्तः, इति निबन्धाद् उद्धृतोऽयम् अंशः ।)

अत्र कलिगताब्दाः = ४८९८

$$\text{सौरमासगणः} = ४८९८ \times १२ + \text{गतमासाः}$$

$$= ५८७७६ + ०$$

$$= ५८७७६$$

$$\text{अधिमासाः} = \frac{३० \text{ सौरमासगणः} - \dfrac{३० \text{ सौरमासगणः}}{१४९४५}}{९७६}$$

$$= १८०६ \text{ (शेषस्य परित्यागे)}$$

$$\text{प्रथमः} = ३० \times ५८७७६ = १७६३२८०$$

$$\text{द्वितीयः} = \frac{१७६३२८०}{१४९४५} = \frac{३५२६५६}{२९८९}$$

$$= ११७ \text{ (शेषस्य परित्यागे)}$$

$$१७६३२८० - ११७ = १७६३१६३$$

$$\frac{१७६३१६३}{९७६} = १८०६ \text{ (शेषस्य परित्यागे)}$$

२९८९)३५२६५६(११७
२९८९
५३७५
२९८९
२३८६६
२०९२३
२९४३

९७६)१७६३१६३(१८०६
९७६
७८७१
७८०८
६३६३
५८५६
५०७

चान्द्रमासगण: = ५८७७६+१८०६
= ६०५८२

तिथिगण: = ६०५८२ × ३०+ गततिथय:
= १८१७४६०+१३
= १८१७४७३

$$\text{अवमाहा:} = \frac{\text{११ तिथिगण:} - \dfrac{\text{११ तिथिगण:}}{\text{१११५७३}}}{\text{७०३}}$$

= २८४३८ (शेषस्य परित्यागे)

तृतीय: = ११ × १८१७४७३ = १९९९२२०३

$$\text{चतुर्थः} = \frac{\text{१९९९२२०३}}{\text{१११५७३}} = \text{१७९ (शेषस्य परित्यागे)}$$

१९९९२२०३ − १७९ = १९९९२०२४

$$\frac{\text{१९९९२०२४}}{\text{७०३}} = \text{२८४३८ (शेषस्य परित्यागे)}$$

१११५७३)१९९९२२०३(१७९
१११५७३
८८३४९०
७८१०११
१०२४७९३
१००४१५७
२०६३६

७०३)१९९९२०२४(२८४३८
१४०६
५९३२ २६८२
५६२४ २१०९
३०८० ५७३४
२८१२ ५६२४
२६८ ११०

ततो

द्युचरचक्रहतो दिनसञ्चयः खहहृतो भगणादिफलं ग्रहः ॥४॥

(सिद्धान्तशिरोमणौ, ग्रहानयनाधिकारे)

इति रीत्या लब्धो भगणादिसूर्यः ४८९७।११।२७।३९।१८।३६ ।*

अहर्गणः = तिथिगणः — अवमाहाः

= १८१७४७३ — २८४३८

= १७८९०३५

अहर्गणपरीक्षा—

७)१७८९०३५(२५५५७६

१७८९०३२

३ शेषम्

शेषसङ्ख्याः	०	१	२	३
वाराः	शुक्रः	शनिः	आदित्यः	सोमः

* अत्र गणितम् ।

युगसूर्यभगणाः = ४३२००००

युगभूदिनानि = १५७७९१७८२८

अहर्गणः = १७८९०३५

$$\text{अहर्गणोत्पन्नः सूर्यः} = \frac{\text{४३२००००} \times \text{१७८९०३५}}{\text{१५७७९१७८२८}}$$

$$= \frac{\text{१०८००००} \times \text{१७८९०३५}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{१९३२१५७८०००००}}{\text{३९४४७९४५७}}$$

भ रा अं क वि प्रवि

= ४८९७ । ११ । २७ । ३८ । ४२ । ३३

१७८९०३५
×१०८००००

१४३१२२८०००००
१७८९०३५

१९३२१५७८०००००

भ रा अं क वि प्रवि

३९४४७९४५७)१९३२१५७८०००००(४८९७।११।२७।३८।४२।३२·९
१५७७९१७८२८

३५४२३९९७२०
३१५५८३५६५६

३८६५६४०६४०
३५५०३१५११३

३१५३२५५२७०
२७६१३५६१९९

३९१८९९०७१ × १२

४७०२७८८८५२
३९४४७९४५७

७५७९९४२८२
३९४४७९४५७

३६३५१४८२५ × ३०

१०९०५४४४७५०
७८८९५८९१४

३०१५८५५६१०
२७६१३५६१९९

२५४४९९४११ × ६०

१५२६९९६४६६०
११८३४३८३७१

३४३५५८०९५०
३१५५८३५६५६

२७९७४५२९४ × ६०

१६७८४७१७६४०
१५७७९१७८२८

१००५५३९३६०
७८८९५८९१४

२१६५८०४४६ × ६०

१२९९४८२६७६०
११८३४३८३७१

११६०४४३०५०
७८८९५८९१४

३७१४८४१३६०
३५५०३१५११३

१६४५२६२४७

अत्र गणितेन मध्यमः सूर्यः ४८९७।११।२७।३८।४२।३३ (भगणादिः)

मन्दोच्चम् २।१७।१७।१७।* केन्द्रम् २।१६।३७।४१ । अस्माद् भुज-

आगच्छति । लक्ष्मीपतिस् तु मध्यमः सूर्यः ४८९७।११।२७।३९।१८।३६ (भगणादिः) इति लिखति । अतः ३६ विकलाः ३ प्रतिविकला इत्यन्तरं जातम् ।

* अत्र गणितम् ।

कल्पसौरवर्षाणि = ४३२००००००००

सूर्यमन्दोच्चभगणाः = ३८७

कृतयुगान्ते सौरवर्षाणि = १९५३७२००००

त्रेतायुगस्य सौरवर्षप्रमाणम् = १२९६०००

द्वापरयुगस्य सौरवर्षप्रमाणम् = ८६४०००

(सूर्यसिद्धान्ते, मध्यमाधिकारे १७, ४०, ४१, ४७ श्लोकेषु)

ग्रन्थारम्भसमये गतकलिप्रमाणम् = ४८९८

अतो ग्रन्थारम्भसमये सृष्टितो गताब्दाः = १९५५८८४८९८

$$\text{ग्रन्थारम्भसमये सूर्यमन्दोच्चम्} = \frac{\text{कल्पसूर्योच्चभगणाः} \times \text{इष्टसौरवर्षाणि}}{\text{कल्पसौरवर्षाणि}}$$

$$= \frac{३८७ \times १९५५८८४८९८}{४३२००००००००}$$

$$= \frac{३८७ \times ९७७९४२४४९}{२१६०००००००}$$

$$= \frac{४३ \times ९७७९४२४४९}{२४०००००००}$$

$$= \frac{४२०५१५२५३०७}{२४०००००००}$$

भ रा अं क वि प्रवि

= १७५ । २ । १७ । १७ । १६ । ३९

$$\begin{array}{r} ९७७९४२४४९ \\ \times ४३ \\ \hline २९३३८२७३४७ \\ ३९११७६९७९६ \\ \hline ४२०५१५२५३०७ \end{array}$$

फलमृणम् २।८।२६।४। भुजफलसंस्कृतसूर्यः ११।२९।४७।४४।४०।*

```
                                        भ   रा   अं   क    वि   प्रवि
   २४००००००००)४२०५१५२५३०७(१७५ । २ । १७ । १७ । १६ । ३९
              २४०००००००
              १८०५१५२५३०
              १६८००००००००
               १२५१५२५३०७
               १२००००००००
                 ५१५२५३०७ × १२
       २००००००००)५१५२५३०७
                 ४००००००००
                 ११५२५३०७ × ३०
        २००००००००)११५२५३०७ × ३
                 ३४५७५९२१                १००००)१६६५७८
                 ३४००००००                      १६००००
                   ५७५९२१ × ६०                   ६५७८ × ६०
           १०००००)५७५९२१ × ३               १०००)६५७८ × ६
                   १७२७७६३                      ३९४६८
                   १७०००००                       ३९०००
                     २७७६३ × ६०                    ४६८
              १००००)२७७६३ × ६
```

---

* अत्र गणितम् ।

	रा	अं	क	वि	प्रवि
सूर्यमन्दोच्चम् =	२ ।	१७ ।	१७ ।	१७ ।	०
मध्यमसूर्यः =(—)	११ ।	२७ ।	३९ ।	१८ ।	३६
सूर्यमन्दकेन्द्रम् =	२ ।	१९ ।	३७ ।	५८ ।	२४

अत्र गणितेन सूर्यमन्दकेन्द्रम् २।१९।३७।५८।२४ (राश्यादि) आगच्छति ।

लक्ष्मीपतिस् तु २।१९।३७।४१ (राश्यादि) इति लिखति। अतः १७ विकलामितम् अन्तरं जातम्।

अंशादि सूर्यमन्दकेन्द्रम् = ७९।३७।४१।

त्रिभोनत्वाद् अयम् एव भुजः।

८० अंशानां ज्या = ३३८५
७९ अंशानां ज्या = ३३७४
अन्तरम् = ११

(सुमतितन्त्रे ४६ पृष्ठे)

$$\frac{\text{११}\times(\text{३७।४१})}{\text{६०}} = \frac{\text{४१४।३१}}{\text{६०}} = \text{७ (स्वल्पान्तरेण)}$$

६०)४१४।३१(६।५४
३६०
५४×६०+३१
३२७१ २७१
३०० २४०
२७ ३१

अतो भुजज्या = ३३७४+७=३३८१।

रवेर्मन्दपरिध्यंशा मनवः १४ शीतगो रदाः ३२।
युग्मान्ते, विषमान्ते च नख२०लिप्तोनितास्तयोः ॥३४॥

(सूर्यसिद्धान्ते, स्पष्टाधिकारे)

अं । क
समपदान्ते सूर्यस्य मन्दपरिधिः = १४।०
विषमपदान्ते सूर्यस्य मन्दपरिधिः = १३।४०
अन्तरकलाः = २०

$$\text{संस्कारकलाः} = \frac{\text{अन्तरकलाः}\times\text{भुजज्या}}{\text{त्रिज्या}}$$

$$= \frac{\text{२०}\times\text{३३८१}}{\text{३४३८}} = \frac{\text{१०}\times\text{३३८१}}{\text{१७१९}} = \frac{\text{१०}\times\text{११२७}}{\text{५७३}}$$

$$= \frac{\text{११२७०}}{\text{५७३}} = \text{१९·६}$$

---

५७३)११२७०(१९·६
५७३
५५४० ३८३०
५१५७ ३४३८
३८३ ३९२

अं क

रवेः स्फुठपरिधिः = (१४।०) — (०।१९·६) = १३ । ४०·४

$$\text{सूर्यस्य भुजफलम्} = \frac{\text{स्फुटपरिधिः} \times \text{केन्द्रभुजज्या}}{३६०}$$

$$= \frac{(१३।४०·४) \times ३३८१}{३६०}$$

$$= \frac{(१३।४०·४) \times ११२७}{१२०}$$

$$= \frac{१५४०९।५०·८}{१२०}$$

= १२८।२४।५५ (कलादि)

= २।८।२४।५५ (अंशादि)

११२७
× (१३।४०·४)
१४६५१। ४५०८
।४५०८
७५८।४५५३०·८
१५४०९।५०·८

१२०)१५४०९।५१(१२८।२४।५५
१२०
३४०
२४०
१००९
९६०
४९ × ६० + ५१
२९९१

१२०)२९९१
२४०
५९१
४८०
१११ × ६०
२)१११
११०
१

गतिफलमृणम् ०।२३ गतिः ५८।४५।* मेषसङ्क्रान्तिर्भाविनी । अतः

अत्र गणितेन मन्दफलम् २।८।२४।५५ (अंशादि) आगच्छति । लक्ष्मीपतिस् तु मन्दफलम् २।८।२६।४ (अंशादि) इति लिखति । अतोऽत्रः १ विकलाः ९ प्रतिविकला इत्यन्तरं जातम् ।

सूर्यमन्दकेन्द्रस्य मेषादित्वाद् मन्दफलं धनं भवति । लक्ष्मीपतिस् तु भ्रमाद् ऋणम् इति लिखति ।

रा अं क वि प्रवि

मध्यमसूर्यः = ११।२७।३९।१८।३६

मन्दफलम् = (+) २। ८।२६। ४

भुजफलसंस्कृतसूर्यः = ११।२९।४७।४४।४०

* अत्र गणितम् ।

ग्रहभुक्तेः फलं कार्यं ग्रहवद् मध्यकर्मणि ।
दोर्ज्यान्तरगुणा भुक्तिस्तत्त्वनेत्रो२२५द्धृता पुनः ।।४८।।
स्वमन्दपरिधिक्षुण्णा भगणांशो३६०द्धृता कलाः ।
कर्क्यादौ तु धनं तत्र मकरादावृणं स्मृतम् ।।४९।।

(सूर्यसिद्धान्ते, स्पष्टाधिकारे)

सूर्यसिद्धान्ते २२५ मितकलान्तरे ज्याः साधिताः सन्ति । अत्र वयं सुमतितन्त्रोक्ता ज्या गृहीत्वा गणनां कुर्मः । सुमतितन्त्रे ६० मितकलान्तरे ज्याः साधिताः सन्ति ।

$$\text{गतिफलम्} = \frac{\text{ज्यान्तरम्} \times \text{केन्द्रगतिः}}{\text{६०}} \times \frac{\text{स्फुटमन्दपरिधिः}}{\text{३६०}}$$

$$= \frac{\text{११} \times (\text{५९।८})}{\text{६०}} \times \frac{\text{१३।४०·४}}{\text{३६०}}$$

$$= \frac{\text{६५०।२८}}{\text{६०}} \times \frac{\text{१३।४०·४}}{\text{३६०}}$$

$$= \frac{\text{८८९४}}{\text{२१६००}} \ (\text{स्वल्पान्तरेण})$$

$$= \text{०।२४·७}$$

सूर्यस्य मीने भोग्यघट्यादि: १२।१५।२०। स्पष्टगत्या भक्तं लब्धमन्तरं घट्यादि १२।३१। मिश्रकाले ४५।४१ युक्तो जात: स्फुटमेषार्ककालो रवौ ५८।१२ ।*

```
           ६५०।२८
        ×(१३।४०·४)
      ------------------------
      ।   २६००  ।   ११२
      । २६००    । ११२
 ८४५० ।   ३६४   ।
 ----- ------------------------
 ८४५० । २६६२४·० । ११३१·२
      ।    १८    ।
      ------------------------
  ४४४ । २६६४२    । ५१·२
 ----------------------
 ८८९४ ।   २
```

```
२१६००)८८९४(०।२४·७
        ×६०
      ------
  ३६०)८८९४
       ७२०
      -----
      १६९४
      १४४०
      -----
       २५४०
       २५२०
       -----
         २०
```

अत्र गणितेन गतिफलम् २४·७ विकला आगच्छति । लक्ष्मीपतिस् तु २३ विकला इति लिखति । अत्र १·७ विकलापरिमितम् अन्तरं जातम् ।

		क	वि
सूर्यस्य मध्यमा गति:	=	५९ ।	८
गतिफलम्	= (—)	० ।	२३
स्पष्टा गति:	=	५८ ।	४५

* अत्र गणितम् ।

अर्धरात्रज: स्पष्टसूर्य: ११।२९।४७।४४।४० (राश्यादि:) । अत: सूर्यस्य मीनराशौ भोग्यकलादि: १२।१५।२० । सूर्यस्य स्पष्टा गति: ५८।४५ ।

$$\text{निशीथमेषार्ककालयोर् अन्तरम्} = \frac{\text{६०} \times (\text{१२।१५।२०})}{\text{५८।४५}}$$

$$= \frac{\text{७३५।२०}}{\text{५८।४५}}$$

$$= \frac{\text{४४१२०}}{\text{३५२५}} = \frac{\text{८८२४}}{\text{७०५}}$$

$$= \text{१२।३१ (स्वल्पान्तरेण)}$$

तत्र तत्कालरीत्या जातः स्फुटार्कः ०।०।०।०।०। अतो रविवासरे भोग्यकालो घटयादिः १।४८। चतुर्विंशतिशतैर्गुणिता जाता

```
७०५)८८२४(१२।३१
     ७०५
     ————
     १७७४
     १४१०
     ————
      ३६४×६०
     ————————
  ४७)३६४×४
     ————————
     १४५६          ४६
     १४१           ४७
     ————          ——
      ४६           —१
```

प विप

ग्रन्थारम्भसमये चरपलानि = ४०।४४

(अस्यैवाधिकारस्य ४ श्लोके)

दिनार्धमानम् = १५ घटयः + चरपलानि

रात्र्यर्धमानम् = ३० घटयः — दिनार्धमानम्

(रत्नदीपे, त्रिप्रश्नाधिकारे ८ श्लोके)

घ प

दिनार्धमानम् = (१५।०) + (०।४१) = १५।४१

रात्र्यर्धमानम् = (३०।०) — (१५।४१) = १४।१९

मिश्रकालः = २ × दिनार्धमानम् + रात्र्यर्धमानम्

= २ × (१५।४१) + (१४।१९)

= (३१।२२) + (१४।१९)

घ प

= ४५।४१

स्फुटमेषार्ककालः = अन्तरघटयादिः + मिश्रकालः

= (१२।३१) + (४५।४१)

घ प

= ५८।१२

वारस्थाने द्विसप्ततिः ।* अतो यमवाजिभिरिति । आधिक्यस्वीकाराद् विरहित इति । अतः कृतान्तसहित इति च युक्तमेव ।

अत्रोदाहरणम् । शाकः १७३६ शशीभेन्द्रैः १४८१ विहीनितो द्रव्यसाहृशको जातः २५५ । नागानलाक्षि २३८ हीनो ग्रन्थारम्भकालाद् गताब्दा जाताः १७ । अब्दौघः १७ स्वपदेन ४।१५ अन्वितः २१।१५ शशियम२१घ्नाब्दः ३५७ स्व ३५७ खेषुत्रिभू १३५० भागेन ०।१५।५२ अन्वितः ३५७।१५।५२।० यमवाजिभि७२र्विरहितः २८५।१५।५२।० अभ्राभ्राब्धिपक्षैः २४०० उद्धृतः ०।७।७।४८ लब्धेनानेन युतः २१।२२।७।४८ कृतान्त २ सहितः २३।२२।७।४८ । शैलभक्तः शेषः २।२२।७।४८ । अतः सोमवासरे घटी २२।७।४८ षु सूर्यस्य सर्व-

---

* अत्र गणितम् ।

$$\begin{array}{lcl}
 & & \text{रा} \quad \text{अं} \quad \text{क} \quad \text{वि} \quad \text{प्रवि} \\
\text{अर्धरात्रजः स्पष्टसूर्यः} & = & ११।२९।४७।४४।४० \\
\text{मीनराशौ सूर्यस्य भोग्यकलादिः} & = & (+)\ १२।१५।२० \\
\hline
\text{स्पष्टमेषार्ककालजः स्पष्टसूर्यः} & = & ०।\ ०।\ ०।\ ०।\ ० \\
\end{array}$$

$$\text{स्फुटमेषार्ककालो रवौ} = \overset{\text{घ}}{५८}।\overset{\text{प}}{१२}$$

$$\text{स्फुटमेषार्ककालसूर्योदययोर् अन्तरम्} = ६० - (५८।१२) = \overset{\text{घ}}{१}\ ।\ \overset{\text{प}}{४८}$$

$$\overset{\text{घ}}{१}।\overset{\text{प}}{४८} = \left(\frac{१}{६०} + \frac{४८}{६० \times ६०}\right) (\text{वारादि})$$

$$= \frac{६० + ४८}{६० \times ६०} = \frac{१०८}{३६००} = \frac{१}{२४००}\left(\frac{१०८ \times २}{३}\right)$$

$$= \frac{१}{२४००} \times ७२ = \frac{७२}{२४००}$$

$$\text{अतः } (१।४८)\ (\text{घटचादि}) = \frac{७२}{२४००}\ (\text{वारादि})$$

देशजमेषार्कसमय इति ।*

---

* अत्र गणितम् ।

द्रव्यशाहसंवत् = शकसंवत् — १४८१

= १७३६ — १४८१

= २५५

वर्षगणः = व = द्रव्यशाहसंवत् — २३८

= २५५ — २३८

= १७

मेषसङ्क्रान्तेर् वारादिः = अब्दपः

$$\text{अब्दपः} = \text{व} + \frac{१}{४}\text{स्व} + \frac{२१\text{व} + \frac{१}{१३५०}\text{स्व} - ७२}{२४००} + २$$

$$\text{व} + \frac{१}{४}\text{स्व} = १७ \times \frac{५}{४}$$

$$= \frac{८५}{४} = २१।१५$$

$$\frac{२१\,\text{व} + \frac{१}{१३५०}\text{स्व} - ७२}{२४००}$$

$$= \frac{१}{२४००}\left(२१ \times १७ \times \frac{१३५१}{१३५०}\right) - \frac{७२}{२४००}$$

$$= \frac{७ \times २२९६७}{२४०० \times ४५०} - \frac{७२}{२४००}$$

$$= \frac{१६०७६९}{१०८००००} - \frac{३}{१००}$$

$$= \frac{१६०७६९ - ३२४००}{१०८००००}$$

$$= \frac{१२८३६९}{१०८००००}$$

= ०।७।७।५४

अङ्घ्रच् $\frac{१}{४}$ नरेखापरपूर्वयोजनैः
पलैर्वियुग् युक् सचरः स्वदेशजः ।

अथ लङ्कादेशजस्पष्टमेषार्ककालस्य स्वस्वदेशजकरणच्छलेन देशान्तरसाधनमाह । अङ्घ्रचूनरेखापरपूर्वयोजनैरिति । अङ्घ्रिः स्वचतुर्थांशस्तेनोनानि हीनानि । रेखाशब्देन रेखाधःपातिदेशाः । रेखायाः परं पश्चिमं पूर्वं प्राक् स्वदेशपर्यन्तानि यानि योजनानि तैः पलैः वियुग् युक् पश्चिमदेशे हीनः पूर्वदेशे युतः सचरः वक्ष्यमाणप्रकारानीतचरेण युक्तः मेषार्ककालः स्वदेशजः स्वदेशोद्भवस्पष्टमेषार्ककालः स्यादिति । रेखादेशाः शिवसिद्धान्ते—

लङ्का रामेश्वरो देवकन्या स्वामिपुरं ततः ।
घर्घराट् सगरस्तस्मान्मेलारः पर्य्यली पुरी ॥

१०८००००)१२७३६९(० । ७ । ७ । ५४
×६०

१८०००)१२८३६९
१२६०००

२३६९×६०

३००)२३६९
२१००

२६९×६०

५)२६९

५)२६९
२५

१९
२०

—१

अब्दपः = (२१ । १५)+(० । ७ । ७ । ५४) + २
= २३ । २२ । ७। ५४

अतोऽब्दपः = २।२२।७।५४ (वारादिः)

गणितेनाऽब्दपः २।२२।७।५४ (वारादिः) आगच्छति । लक्ष्मीपतिस् तु २ । २२ । ७ । ४८ (वारादिः) इति लिखति । अत्र ६ विपलापरिमितम् अन्तरं जातम् ।

वत्सगुल्मं चोज्जयिनी कुरुक्षेत्रं महागिरिः ।
वत्सारण्यं महोद्यानं वनं सौगन्धिकं ततः ।।
सुमेरुः क्रमशो ज्ञेया दक्षिणोत्तरसूत्रगाः । इति ।

अत्रोपपत्तिः । ग्रन्थागतो मेषार्ककालः लङ्कादेशजः । स स्वदेशजः कर्त्तव्यः । तत्र देशान्तरं द्विविधं पूर्वापरं याम्योत्तरं च । उक्तं च शिरोमणौ (मध्यगतिवासनाधिकारे) ।

येऽनेन लङ्कोदयकालिकास्ते देशान्तरेण स्वपुरोदये स्युः ।
देशान्तरं प्रागपरं तथान्यद् याम्योत्तरं तच्चरसंज्ञमुक्तम् ।।२३।। इति

याम्योत्तरं रेखादेशजकाललङ्कादेशजकालयोरन्तरं चरसंज्ञम् अग्रे वक्ष्यमाणमस्ति । पूर्वापरं रेखादेशजकालस्वदेशजकालयोरन्तरं देशान्तरसंज्ञम् । यद्वा लङ्कादेशजकालः स्वदेशतः समसूत्रेण यो दक्षिणोत्तरयोर्निरक्षदेश आसन्नः तत्र कार्यः। तदर्थं लङ्कादेशस्वनिरक्षदेशयोरन्तरयोजनं देशान्तरसंज्ञम् ।* तद् योजनज्ञानोपाय उक्तः श्रीभगवता ।

अतीत्योन्मीलनादिन्दोः पश्चात् तद् गणितागतात् ।
यदा भवेत् तदा प्राच्यां स्वस्थानं मध्यतो भवेत् ।।६३।।

अप्राप्यं च भवेत् पश्चादेवं चापि निमीलनात् ।
तयोरन्तरनाडीभिर्हन्याद् भूपरिधिं स्फुटम् ।।६४।।
षष्टया ६० विभज्य लब्धैस्तु योजनैः प्रागथापरैः ।
स्वदेशः परिधौ ज्ञेयः कुर्याद् देशान्तरं हि तैः ।।६५।। इति
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

यद्यपि भूमेः कन्दुकाकारत्वेन सर्वत्राऽभिन्नः परिधिरिति स्फुटपरिध्यसम्भवस्तथापि निरक्षदेशस्य मध्यमत्वकल्पनेनोक्तो भूपरिधिर्निरक्षदेशस्यैव । तदन्यत्र तदनुरोधेन वृत्तानां लघुत्वसम्भवेनोत्तरोत्तरं न्यूनपरिधिः स्वदेशे स्फुटसंज्ञः । एवं नवत्यक्षांशे मेरुस्थाने वडवामलस्थाने च परिध्यभावः । निरक्षदेशे परम उक्तः परिधिः । अतो यत्रा-

---

* अत्रत्यं क्षेत्रं ४८ पृष्ठे द्रष्टव्यम् ।

ऽक्षांशा नवतिः परमास्तत्र लम्बांशाऽभावः। यत्राऽक्षांशाऽभावस्तत्र लम्बांशाः परमा नवतिः ।

लम्बांशाऽक्षांशौ तु वक्ष्यमाणस्वरूपौ । तथा च लम्बांशह्रासानुरोधात् परिधेरपि ह्रास इति । परमलम्बांशैर्नवतिमितैरुक्तो भूपरिधि-



पू= पूर्वा दिक्
सु= सुमेरुः
ल= लङ्का
स्व= स्वदेशः
ल नि= स्वदेशस्य रेखांशाः

प= पश्चिमा दिक्
कु= कुमेरुः
पू ल प= निरक्षदेशः
नि= स्वनिरक्षदेशः
नि स्व= स्वदेशस्याऽक्षांशाः

स्तदा स्वदेशजलम्बांशैः क इत्यनुपात उपपन्नोऽपि वृत्ताश्रितांशेभ्यो ऽनुपातानामसम्भवेन सर्वैरुपेक्षितत्वाच्च ज्यानुपातस्य सर्वैरङ्गीकृतत्वात् प्रमाणस्थाने प्रमाणांशज्या परमा त्रिज्या गजाग्निवेदराम ३४३८ मिता इच्छास्थाने इच्छांशानां ज्या लम्बज्येति स्फुटपरिधिसिद्धिः ।* इति गौरवं मत्वा सर्वत्र त्रिज्यातो लम्बज्याया अल्पत्वाद् उक्तात् सर्वत्रोनभूपरिधिः स्यादतः सुखार्थमाचार्येणाऽष्टचत्वारिंशच्छत ४८०० मितो योजनात्मको भूपरिधिर्गृहीतः करणकर्तृणां सर्वेषामाम्नातत्वात् । ततोऽनुपातः । यद्येतावद्भिः ४८०० परिधियोजनैः सावनषष्टिघटिकाः कालः क्रामति तदेष्टरेखायोजनैः किमिति लब्धं कालात्मकं देशान्तरम् । एवं परिधियोजनानि स्वचतुर्थांशहीनानि अहोरात्रपलसमानि देशान्तरात्मकानि । अतः अङ्घ्रयूनरेखापरपूर्वयोजनैः पलैरिति ।

धनर्णोपपत्तिः । लङ्कादेशात् स्वनिरक्षदेशस्य पूर्वभागस्थितत्वे लङ्कादेशजकालतः स्वनिरक्षदेशजकालः पश्चाद् भवति । ग्रहाणां पूर्वगतित्वात् पूर्वं लङ्कायां ततः स्वनिरक्षे । अतः पश्चात्कालिकमेषार्कस्याग्रिमकालिकत्वं सिद्ध्यर्थं तत्फलं धनम् । एवं स्वनिरक्षदेशस्य लङ्कातः पश्चिमस्थत्वे लङ्कादेशजकालात् स्वनिरक्षदेशजकालः पूर्वं भवति । अतोऽग्रिमकालिकस्य पश्चिमकालिकत्वसिद्ध्यर्थं फलं हीनं कार्यम् । अतो वियुग् युगित्युक्तम् ।

अथ प्रसङ्गाद् ग्रहे देशान्तरसंस्कारो यथा । यदि घटीषष्ट्या ६० एकदिनग्रहगतिकला लभ्यन्ते तदा लङ्कास्वनिरक्षयोरन्तरयोजनजघटीभिः किमिति लब्धं ग्रहाणां देशान्तरम् । अथवा परिधियोजनैर्गतिः प्राप्यते तदा देशान्तरयोजनैः किमिति फलं कलाः । धनर्णोपपत्तिस्तु कालप्रोक्तवैपरीत्यं प्रवहवायोः सदा प्रत्यग्गतित्वाद् इति ।

उदाहरणम् । पूर्वसाधितमेषार्ककालः २२।७।४८ । नेपालदेशे देशान्तरयोजनानि ८८ पूर्वाणि । एषामङ्घ्रि $\frac{1}{4}$ भागः २२ अनेन ऊनानि

---

* सूर्यसिद्धान्ते मध्यमाधिकारे ६०–६१ श्लोकयोर् गूढार्थप्रकाशाभिधटीकायां तस्या रचयितू रङ्गनाथस्योक्तिरियम् ।

६६ पलात्मकानि । एभिः पूर्वदेशत्वाद् युक्तो मेषार्ककालः स्वनिरक्षदेशजो जातः २३।१३।४८ । वक्ष्यमाणरीत्याऽनीतं चरं सौम्यं पलात्मकम् ४०।४४ । सचरः २३।५४।३२ । जातोऽभीष्टदेशजो मेषार्ककालः सोमे घट्यादिः २३।५४।३२ । अत्राचार्येण लाघवाच्चरदानमुक्तं वस्तुतस्त्र्यैक्यदानं युक्तं स्यादिति ।

रवेर्नवाक्षा ५९ भुजगाः ८ कलानिधेः
खनन्दशैलाः ७९० शरवह्नयो ३५ गतिः ।।४।।
चन्द्रोच्चजा तर्क ६ कलाः कुवेदाः ४१
पातस्य रामाः ३ कुभुवो ११ विलोमा ।।
भूराम ३१ घट्योऽङ्गयमाः २६ कुजस्य
जीवस्य पञ्चा ५ र्कसुतस्य पक्षौ २ ।।५।।
ज्ञोच्चस्य पञ्चाब्धियमा २४५ द्विरामाः ३२
शुक्रोच्चजा षण्णवति ९६ र्भुजङ्गाः ८ ।

अथार्कादीनामेकदिनजमध्यमगतिमाह वृत्तद्वयेन । रवेरिति । सूर्यस्य नव अक्षाः बाणाः पञ्च ।

भूता बाणाश्च विषया वायवः पञ्च पाण्डवाः ।।१७६।।

इति नाममालायाम् । तर्काः षट् ।

उच्यन्ते षड् रसाङ्गर्तुतर्ककालाङ्गशत्रवः ।।१७७।।

इति नाममालायाम् । शेषं स्पष्टम् ।

अत्रोपपत्तिः । एकमहर्गणं प्रकल्प्य यदि युगसावनदिनैर्युगग्रहभगणा लभ्यन्ते तदैकदिनेन किमिति लब्धं ग्रहगतिः स्यादेव ।*

---

* अत्र गणितम् ।

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः ४३२०००० ।
कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम् ।।२९।।

इन्दो रसाग्नित्रित्रीषुसप्तभूधरमार्गणाः ५७७५३३३६ ।
दस्रत्र्यष्टरसाङ्काक्षिलोचमानि २२९६८३२ कुजस्य तु ॥३०॥
बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यङ्कनगेन्दवः १७९३७०६० ।
बृहस्पतेः खदस्राक्षिवेदषड्वह्नय ३६४२२० स्तथा ॥३१॥
सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः ७०२२३७६ ।
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः १४६५६८ ॥३२॥
चन्द्रोच्चस्याङ्कगोभूमिवसुसर्पार्णवा ४८८१९९ युगे ।
वामं पातस्य वस्वग्नियमाश्विशिखिदस्रकाः २३२२३८ ॥३३॥
उदयादुदयं भानोर्भूमिसावनवासरः ॥३६॥
वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो १५७७९१७८२८ युगे ॥३७॥

(सूर्यसिद्धान्ते, मध्यमाधिकारे)

सूर्यस्य युगभगणाः = ४३२००००
चन्द्रस्य युगभगणाः = ५७७५३३३६
चन्द्रोच्चस्य युगभगणाः = ४८८१९९
चन्द्रपातस्य युगभगणाः = २३२२३८
मङ्गलस्य युगभगणाः = २२९६८३२
बुधशीघ्रस्य युगभगणाः = १७९३७०६०
बृहस्पतेर् युगभगणाः = ३६४२२०
शुक्रशीघ्रस्य युगभगणाः = ७०२२३७६
शनेर् युगभगणाः = १४६५६८
युगसावनदिनानि = १५७७९१७८२८

ग्रहाणां कलादिका दैनिकी मध्यमा गतिर् आनीयते ।

$$\text{सूर्यस्य गतिः} = \frac{\text{४३२००००}}{\text{१५७७९१७८२८}} \times \text{३६०} \times \text{६०}$$

$$= \frac{\text{४३२००००} \times \text{९०} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{३८८८००००० } \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{३८८८००००० \times ६०}{३९४४७९४५७}$$

$$= \frac{२३३२८००००००}{३९४४७९४५७}$$

= ५९ । ८ । १० । १० । २४ । १२ (कलादिः)

३९४४७९४५७)२३३२८००००००(५९ । ८ । १० । १० । २४ । १२
१९७२३९७२८५
३६०४०२७१५०
३५५०३१५११३
५३७१२०३७ × ६०
३२२२७२२२२०
३१५५८३५६५६
६६८८६५६४ × ६०
४०१३१९३८४०
३९४४७९४५७
६८३९९२७० × ६०
४१०३९५६२००
३९४४७९४५७
१५९१६१६३० × ६०
९५४९६९७८००
७८८९५८९१४
१६६०१०८६६०
१५७७९१७८२८
८२१९०८३२ × ६०
४९३१४४९९२०
३९४४७९४५७
९८६६५५३५०
७८८९५८९१४
१९७६९६४३६

$$\text{चन्द्रस्य गतिः} = \frac{५७७५३३३६}{१५७७९१७८२८} \times ३६० \times ६०$$

$$= \frac{५७७५३३३६ \times ९० \times ६०}{३९४४७९४५७}$$

$$= \frac{५१९७८००२४० \times ६०}{३९४४७९४५७}$$

$$= \frac{३११८६८०१४४००}{३९४४७९४५७}$$

= ७९०।३४।५२।३।४९।७ (कलादिः)

३९४४७९४५७)३११८६८०१४४००(७९० । ३४ । ५२ । ३ । ४९ । ७

२७६१३५६१९९

३५७३२३९४५०

३५५०३१५११३

२२९२४३३७० × ६०

१३७५४६०२२००

११८३४३८३७१

१९२०२१८४९०

१५७७९१७८२८

३४२३००६६२ × ६०

२०५३८०३९७२०

१९७२३९७२८५

८१४०६६८७०

७८८९५८९१४

२५१०७९५६ × ६०

१५०६४७७३६०

११८३४३८३७१

३२३०३८९८९ × ६०

१९३८२३३९३४०

१५७७९१७८२८

३६०३१६१०६

३६०३१६१०६०

३५५०३१५११३

५२८४५९४७ × ६०

३१७०७५६८२०

२७६१३५६१९९

४०९४००६२१

$$\text{चन्द्रोच्चस्य गतिः} = \frac{\text{४८८१९९}}{\text{१५७७९१७८२८}} \times \text{३६०} \times \text{६०}$$

$$= \frac{\text{४८८१९९} \times \text{९०} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{४३९३७९१०} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{२६३६२७४६००}}{\text{३९४४७९४५७}}$$

= ६ । ४० । ५८ । ३० । ४१ । २८ (कलादिः)

३९४४७९४५७)२६३६२७४६००(६ । ४० । ५८ । ३० । ४१ । २७
२३६६८७६७४२
२६९३९७८५८ × ६०
१६१६३८७१४८०
१५७७९१७८२८
३८४६९३२०० × ६०
२३०८१५९२०००
१९७२३९७२८५
३३५७६१९१५०
३१५५८३५६५६
२०१७८३४९४ × ६०
१२१०७००९६४०
११८३४३८३७१
२७२६२५९३० × ६०
१६३५७५५५८००
१५७७९१७८२८
५७८३७७५२०
३९४४७९४५७
१८३८९८०६३ × ६०
११०३३८८३७८०

११०३३८८३७८०
७८८९५८९१४
३१४४२९४६४०
२७६१३५६१९९
३८२९३८४४१

$$\text{चन्द्रपातस्य गतिः} = \frac{२३२२३८}{१५७७९१७८२८} \times ३६० \times ६०$$

$$= \frac{२३२२३८ \times ९० \times ६०}{३९४४७९४५७}$$

$$= \frac{२०९०१४२० \times ६०}{३९४४७९४५७}$$

$$= \frac{१२५४०८५२००}{३९४४७९४५७}$$

$= ३ । १० । ४४ । ४३ । १० । ४$ (कलादिः)

३९४४७९४५७)१२५४०८५२००(३ । १० । ४४ । ४३ । १० । ४

११८३४३८३७१

७०६४६८२९ × ६०

४२३८८०९७४०

३९४४७९४५७

२९४०१५१७० × ६०

१७६४०९१०२००

१५७७९१७८२८

१८६१७३१९२०

१५७७९१७८२८

२८३८१४०९२ × ६०

१७०२८८४५५२०

१५७७९१७८२८

१२४९६६७२४०

११८३४३८३७१

६६२२८८६९ × ६०

३९७३७३२१४०

३९४४७९४५७

२८९३७५७०

२८९३७५७० × ६०

१७३६२५४२००

१५७७९१७८२८

१५८३३६३७२

मङ्गलस्य गतिः $= \frac{२२९६८३२}{१५७७९१७८२८} \times ३६० \times ६०$

$$= \frac{२२९६८३२ \times ९० \times ६०}{३९४४७९४५७}$$

$$= \frac{२०६७१४८८० \times ६०}{३९४४७९४५७}$$

$$= \frac{१२४०२८९२८००}{३९४४७९४५७}$$

$= ३१ । २६ । २८ । ११ । ८ । ५६$ (कलादिः)

३९४४७९४५७)१२४०२८९२८००(३१।२६।२८।११।८।५६
११८३४३८३७१
५६८५०९०९०
३९४४७९४५७
१७४०२९६३३ × ६०
१०४४१७७७९८०
७८८९५८९१४
२५५२१८८८४०
२३६६८७६७४२
१८५३१२०९८ × ६०
१११११८७२५८८०
७८८९५८९१४
३२२९१३६७४०
३१५५८३५६५६
७३३०१०८४ × ६०
४३९८०६५०४०
३९४४७९४५७
४५३२७०४७०
३९४४७९४५७
५८७९१०१३

५८७९१०१३ × ६०
३५२७४६०७८०
३१५५८३५६५६
३७१६२५१२४ × ६०
२२२९७५०७४४०
१९७२३९७२८५
२५७३५३४५९०
२३६६८७६७४२
२०६६५७८४८

$$\text{बृहस्पतेर् गतिः} = \frac{\text{३६४२२०}}{\text{१५७७९१७८२८}} \times \text{३६०} \times \text{६०}$$

$$= \frac{\text{३६४२२०} \times \text{९०} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{३२७७९८००} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{१९६६७८८०००}}{\text{३९४४७९४५७}}$$

= ४ । ५९ । ८ । ४८ । ३५ । ४७ (कलादिः)

३९४४७९४५७)१९६६७८८०००(४।५९।८।४८।३५।४७

१५७७९१७८२८

३८८८७०१७२ × ६०

२३३३२२१०३२०

१९७२३९७२८५

३६०८२३७४७०

३५५०३१५११३

५७९२२३५७ × ६०

३४७५३४१४२०

३१५५८३५६५६

३१९५०५७६४ × ६०

१९१७०३४५८४०

१५७७९१७८२८

३३९११६७५६०

३१५५८३५६५६

२३५३३१९०४ × ६०

१४११९९१४२४०

११८३४३८३७१

२२८५५३०५३०

१९७२३९७२८५

३१३१३३२४५

३१३१३३२४५ × ६०

१८७८७९९४७००

१५७७९१७८२८

३००८८१६४२०

२७६१३५६११९

२४७४६०२२१

शनेर् गतिः $$= \frac{१४६५६८}{१५७७९१७८२८} \times ३६० \times ६०$$

$$= \frac{१४६५६८ \times ९० \times ६०}{३९४४७९४५७}$$

$$= \frac{१३१९११२० \times ६०}{३९४४७९४५७}$$

$$= \frac{७९१४६७२००}{३९४४७९४५७}$$

= २ । ० । २२ । ५३ । २५ । ४६ (कलादिः)

३९४४७९४५७)७९१४६७२००(२ । ० । २२ । ५३ । २५ । ४६

७८८९५८९१४

२५०८२८६ × ६०

१५०४९७१६० × ६०

९०२९८२९६००

७८८९५८९१४

११४०२४०४६०

७८८९५८९१४

३५१२८१५४६ × ६०

२१०७६८९२७६०

१९७२३९७२८५

१३५२९१९९१०

११८३४३८३७१

१६९४८१५३९ × ६०

१०१६८८९२३४०

७८८९५८९१४

२२७९३०३२००

१९७२३९७२८५

३०६९०५९१५

३०६९०५९१५ × ६०

१८४१४३५४९००

१५७७९१७८२८

२६३५१७६६२०

२३६६८७६७४२

२६८२९९८७८

$$\text{बुधशीघ्रस्य गतिः} = \frac{\text{१७९३७०६०}}{\text{१५७७९१७८२८}} \times \text{३६०} \times \text{६०}$$

$$= \frac{\text{१७९३७०६०} \times \text{९०} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{१६१४३३५४००} \times \text{६०}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{९६८६०१२४०००}}{\text{३९४४७९४५७}}$$

= २४५।३२।२०।४१।५१।१६ (कलादिः)

```
३९४४७९४५७)९६८६०१२४०००(२४५ । ३२ । २० । ४१ । ५१ । १६
           ७८८९५८९१४
           १७९६४२३२६०
           १५७७९१७८२८
            २१८५०५४३२०
            १९७२३९७२८५
             २१२६५७०३५ × ६०
           १२७५९४२२१००
           ११८३४३८३७१
              ९२५०३८३९०
              ७८८९५८९१४
              १३६०७९४७६ × ६०
            ८१६४७६८५६०
            ७८८९५८९१४
             २७५१७९४२० × ६०
           १६५१०७६५२००
           १५७७९१७८२८
              ७३१५८६९२०
             ३९४४७९४५७
             ३३७१०७४६३

               ३३७१०७४६३ × ६०
           २०२२६४४७७८०
           १९७२३९७२८५
              ५०२४७४९३०
              ३९४४७९४५७
              १०७९९५४७३ × ६०
             ६४७९७२८३८०
             ३९४४७९४५७
             २५३४९३३८१०
             २३६६८७६७४२
              १६८०५७०६८
```

शुक्रशीघ्रस्य गतिः $= \frac{७०२२३७६}{१५७७९१७८२८} \times ३६० \times ६०$

$= \frac{७०२२३७६ \times ९० \times ६०}{३९४४७९४५७}$

$= \frac{६३२०१३८४० \times ६०}{३९४४७९४५७}$

$= \frac{३७९२०८३०४००}{३९४४७९४५७}$

=९६ । ७ । ४३ । ३७ । १६ । ५३ (कलादिः)

३९४४७९४५७) ३७९२०८३०४०० (९६ । ७ । ४३ । ३७ । १६ । ५२
३५५०३१५११३
२४१७६७९२७०
२३६६८७६७४२
५०८०२५२८ × ६०
३०४८१५१६८०
२७६१३५६१९९
२८६७९५४८१ × ६०
१७२०७७२८८६०
१५७७९१७८२८
१४२८५५०५८०
११८३४३८३७१
२४५११२२०९ × ६०
१४७०६७३२५४०
११८३४३८३७१
२८७२३४८८३०
२७६१३५६१९९
११०९९२६३१ × ६०
६६५९५५७८६०
३९४४७९४५७
२७१४७६३२९०
२३६६८७६७४२
३४७८८६५४८ × ६०
२०८७३१९२८८०
१९७२३९७२८५
११४९२२००३०
७८८९५८९१४
३६०२६१११६

उक्तं च ।

महीमितादहर्गणात् फलानि यानि तानि वा ।
भवन्ति मध्यमाः क्रमान्नभःसदां द्युभुक्तयः ॥२५॥ इति

(सिद्धान्तशिरोमणौ, प्रत्यब्दशुद्ध्यधिकारे)

शशिवृत्तस्यैतावतीः कलाः प्रत्यहं ग्रहाः प्राच्यां स्वस्वकक्षायां भ्रमन्तीति भावः । यद्येवं तर्हि तेषामेकमार्गस्थानां ग्रहाणां मध्यगतेः शीघ्रत्वं मन्दत्वमित्यन्यथात्वं कथं सम्भवतीति चेदुच्यते । यो हि भूमेरासन्नः स स्वल्पेन कालेन भगणं भुङ्क्ते तस्य शीघ्रगतित्वम् । यो हि भूमेर्दूरगतः स महता कालेनातो मन्दत्वम् । उक्तं च ।

कक्षाः सर्वा अपि दिविषदां चक्रलिप्ताङ्किताास्ता
वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः ।
तस्मादेते शशिजभृगुजादित्यभौमेज्यमन्दा
मन्दाक्रान्ता इव शशधराद् भान्ति यान्तः क्रमेण ॥२७॥ इति

(सिद्धान्तशिरोमणौ, प्रत्यब्दशुद्ध्यधिकारे)

सू	चं	च उ	च पा	मं	बृ	श	बु शी	शु शी
५९	७९०	६	३	३१	५	२	२४५	९६
८	३५	४१	११	२६	०	०	३२	८

अजार्कघटय्चः स्वजवैर्विनिघ्ना
बीजानि षष्टया६०प्तकलामुखानि ॥६॥
बीजोनितास्ते गणितागताः स्युः
खेटा रवेरौदयिका ध्रुवांशाः ॥

$$\begin{array}{cccc}
९३ & & २९ \times ६० & \\
\cline{1-1}\cline{3-3}
९० & & १७४० & \\
६२ & १ \times ६० & १५५ & ४ \times ६० \\
\hline
२८० & ६० & १९० & २४० \\
२७९ & ३१ & १८६ & २४८ \\
\hline
१ & २९ & ४ & —८
\end{array}$$

$$\frac{१}{१२} व = \frac{१७}{१२} = १।२५।०$$

अतः फलम् = (३२९।१।५६।८) (अंशादि) — (१।२५) (कलादि)
— ६५ अंशाः

अं क वि प्रवि
= २६४ । ० । ३१ । ८

$$\begin{array}{rl}
 & ३६० \\
(—) & २६४।०।३१।८ \\
\hline
 & ९५।५९।२८।५२
\end{array}$$

अं क वि प्रवि

अतो राहुध्रुवः = ९५ । ५९ । २८ । ५२

अब्दोऽश्विनन्देन्दु१९२हतः स्वशून्य-
दन्तां३२०शहीनो नववेद४९युक्तः ।
भूयोऽब्दपञ्चाद्रिगुणां३७५शयुक्तो
भौमध्रुवः स्याद् .... ।।११।।

अथ मङ्गलसाधनमाह । अब्द इति । वर्षगणः अश्विनन्देन्दुभिः द्विनवत्यधिकशतेन हतो गुणितः स्वस्य शून्यदन्तांशेन विंशत्यधिकशतत्रयभागेन हीनो रहितः ।

द्वात्रिंशद् दशना द्विजाः ।।१८३।।

इति नाममालायाम् । नववेदैः एकोनपञ्चाशता युक्तः । भूयः पुनः अब्दस्य पञ्चाद्रिगुणांशेन पञ्चसप्तत्यधिकत्रिशतभागेन युक्तः भौमस्य मङ्गलस्य ध्रुवः स्यात् ।

अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः । इत्यमरः (दिग्वर्गे) ।

अत्रोपपत्तिः ।

दस्रत्र्यष्टरसाङ्काक्षिलोचनानि २२९६८३२ कुजस्य तु ।।३०।।
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति कुजभगणाः २२९६८३२ । उक्तवद् वर्षवृद्धिः राश्यादिः ६।११।२४।९।३६ ।* अस्यांऽशसाधनार्थम् अश्विनन्देन्दुहतोऽब्द इति ।

---

* अत्र गणितम् ।

मङ्गलस्य युगभगणाः = २२९६८३२

$$\frac{२२९६८३२}{४३२००००} = \frac{२८७१०४}{५४००००} = \frac{३५८८८}{६७५००} = \frac{८९७२}{१६८७५}$$

रा अं क वि प्रवि
= ६ । ११ । २४ । ९ । ३६

तत्त्वधिकं गृहीतम् । तच्च ३५।५०।२४ । अस्य खण्डद्वयम् । ऋ
खण्डमेकमंशादि ०।३६।० विंशत्यधिकशतत्रयेण गुणितमंशस्थानेऽ
नन्देन्दुमित एव । अतः स्वशून्यदन्तांशहीन इति । अन्यद् धनाख्यमंशा
०।०।६।३६ पञ्चसप्तत्यधिकत्रिशतेन गुणितम् अंशस्थाने एकम
भूयोऽब्देस्यादिः ।*

```
        १६८७५)८९७२(०।६।११।२४।९।३६
               ×१२
        ५६२५)८९७२×४
               ३५८८८
               ३३७५०
                 २१३८⊠३०
          ३७५)२१३८×२
                ४२७६
                ३७५
                 ५२६
                 ३७५
                 १५१×६०          ४×६०
            २५)१५१×४          ५)४⊠१२
                ६०४              ४८
                ५०               ४५
                १०४               ३×६०
                १००            १)३.⊠१२
                  ४               ३६
```

* अत्र गणितम् ।

अं क वि प्रवि

मङ्गलस्य वार्षिकी गतिः = १९१ । २४ । ९ । ३६

एषा गतिः १९२ अंशानाम् आसन्ना वर्तते ।

१९२

(—) १९१।२४। ९।३६

०।३५।५०।२४

अतः सुखार्थं पूर्वं ३६ कला एव गृहीताः ।

क

$$३६ = \frac{३६}{६०} \text{ (अंशादिः)} = \frac{३}{५}$$

$$१९२ \div \frac{३}{५} = १९२ \times \frac{५}{३} = ६४ \times ५ = ३२०$$

पुनः

क वि प्रवि

३६।

(—) ३५।५०।२४

०। ९।३६

वि प्रवि

$$९।३६ = \left(\frac{९}{६० \times ६०} + \frac{३६}{६० \times ६० \times ६०}\right) \text{ (अंशादि)}$$

$$= \frac{९}{६० \times ६०} + \frac{३}{६० \times ६० \times ५}$$

$$= \frac{४५ + ३}{६० \times ६० \times ५}$$

$$= \frac{४८}{१८०००}$$

$$= \frac{१}{\frac{१८०००}{४८}}$$

$$= \frac{१}{\frac{१५००}{४}}$$

$$= \frac{१}{३७५}$$

अतो मङ्गलस्य वार्षिकी गतिः $= \left(१९२ - \frac{१९२}{३२०}\right)$ (अंशादिः)

$+ \frac{१}{३७५}$ (अंशादिः)

क्षेपक उक्तवत् । ग्रन्थारम्भकालिको राश्यादिभौमः १।१६।७।४२। अतो नववेद ४६ युक्त इति ।*

---

* अत्र गणितम् ।

निशीथमेषार्ककालयोर् अन्तरं धनं १३ घटीमितम् । अस्मिन् अन्तरे मङ्गल-गतिः साध्यते ।

$$\text{धनं चालनफलम्} = \frac{(\text{३१।२६}) \times \text{१३}}{\text{६०}}$$

$$= \frac{\text{४०८।३८}}{\text{६०}}$$

$$= \text{६।४८।३८ (कलादि)}$$

मङ्गलस्य युगभगणाः = २२९६८३२
युगसावनदिनानि = १५७७९१७८२८
अहर्गणः = १७८९०३५

$$\frac{\text{२२९६८३२} \times \text{१७८९०३५}}{\text{१५७७९१७८२८}} = \frac{\text{५७४२०८} \times \text{१७८९०३५}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{१०२७२७८२०९२८०}}{\text{३९४४७९४५७}}$$

$$\begin{array}{cccccc} \text{भ} & \text{रा} & \text{अं} & \text{क} & \text{वि} & \text{प्रवि} \end{array}$$
$$= \text{२६०४ । १ । १९ । ० । ३२ । ११}$$

$$\begin{array}{r}
\text{१७८९०३५} \\
\times\,\text{५७४२०८} \\
\hline
\text{१४३१२२८०} \\
\text{३५७८०७०} \\
\text{७१५६१४०} \\
\text{१२५२३२४५} \\
\text{८९४५१७५} \\
\hline
\text{१०२७२७८२०९२८०}
\end{array}$$

```
          ___________________________
३९४४७९४५७)१०२७२७८२०९२८०(२६०४।१।१९।०।३३।३३
                ७८८९५८९१४
                ---------
                २३८३१९२९५२
                २३६६८७६७४२
                ----------
                  १६३१६२१०८०
                  १५७७९१७८२८
                  ----------
                    ५३७०३२५२ × १२
                    -------------
                  ६४४४३९०२४
                   ३९४४७९४५७
                   ---------
                   २४९९५९५६७ × ३०
                  ---------- ---
                 ७४९८७८७०१०
                 ३९४४७९४५७
                 ---------
                 ३५५३९९२४०
                 ३५५०३१५११३
                 ----------
                     ३६७७३२७ × ६०
                     ------------
                  २२०६३९६२० × ६०          २२०५५५११९ × ६०
                  --------------          --------------
                १३२३८३७७२००             १३२३३३०७१४०
                ११८३४३८३७१              ११८३४३८३७१
                ----------              ----------
                 १४०३९९३४९०              १३९८९२३४३०
                 ११८३४३८३७१              ११८३४३८३७१
                 ----------              ----------
                  २२०५५५११९              २१५४८५०५९
```

		रा	अं	क	वि	प्रवि
निशीथकालजो मध्यममङ्गलः	=	१	१६	०	३३	३३
धनं चालनफलम्	= (+)			६	४८	३८
		१	१९	७	२२	११

अत्राऽचार्येण ४९ अंशा एव स्वल्पान्तराद् गृहीताः।

उदाहरणम् । अब्दगणः १७ अश्विनन्देन्दुभि१९२र्हतः ३२६४ स्वस्य ३२६४ शून्यदन्तां३२०शः १०।१२।७ अनेम हीनः ३२५३।४७।५३ नववेदै४९र्युक्तः ३३०२।४७।५३ । पुनः अब्दस्य १७ पञ्चाद्रिगुणां३७५शेन ०।२।४३ युक्तः ३३०२।५०।३६ । चक्रतष्टो जातो भौमध्रुवः ६२।५०।३६ इति ।*

---

* अत्र गणितम् ।

वर्षगणः = १७

$$\text{मङ्गलस्य ध्रुवः} = \left(१९२\,\text{व} - \frac{१}{३२०}\,\text{स्व}\right)(\text{अंशादिः}) + \frac{\text{व}}{३७५}\,(\text{अंशादिः}) + ४९\ \text{अंशाः}$$

$$
\begin{aligned}
१९२\,\text{व} - \frac{१}{३२०}\,\text{स्व} &= १९२ \times १७ \times \frac{३१९}{३२०} \\
&= १२ \times १७ \times \frac{३१९}{२०} \\
&= ३ \times १७ \times \frac{३१९}{५} \\
&= ३ \times \frac{५४२३}{५} \\
&= \frac{१६२६९}{५} \\
&= ३२५३।४८।०
\end{aligned}
$$

$$\frac{\text{व}}{३७५} = \frac{१७}{३७५} = ०।२।४३$$

```
३७५)  १७(०।२।४३

       ×६०                 १८×६०
    ---------          ------------
  २५)१७×४            ५)१८×१२
    ---------          ------------
       ६८                 २१६
       ५०                 २१५
      ----               -----
       १८                   १
```

अथ बोधनोच्चम् ।।११।।

बाणेषु५५निघ्नः स्वखषड्यमां२६०शै-
रर्कै१२र्जिनैः२४ क्वग्नि३१लवैर्विहीनः ।

अथ बुधशीघ्रोच्चसाधनमाह । अथ बोधनोच्चमिति । अब्दगणस्य प्रसङ्गत्वादब्दगणः बाणेषुभिः पञ्चपञ्चाशता निघ्नो गुणितः स्वस्य खषड्यमांशैः षष्ट्यधिकशतद्वयभागेन अर्कैः द्वादशभिः अंशैः जिनैः चतुर्विंशतिकलाभिः ।

जिनाः सिद्धाः चतुर्विंशतिः ।।१८३।।

इति नाममालायाम् । क्वग्निलवैः अब्दस्य एकत्रिंशदंशेन विहीनो हीनः बोधनोच्चं स्यादिति ।

अत्रोपपत्तिः । नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयमित्यादिदर्शनाद् बुधदर्शनस्यासम्भवात्तच्छीघ्रज्ञानमशक्यमस्मदादिभिस्तथाप्यतीन्द्रियैर्निबद्धा भगणाः । यथा ।

मङ्गलस्य ध्रुवः = (३२५३।४८।०) (अंशादिः) + (०।२।४३) (अंशादिः)
+ ४९ अंशाः

= ३३०२।५०।४३

३६०)३३०२(९
३२४०
६२

अं क वि
अतो मङ्गलस्य ध्रुवः = ६२ । ५० । ४३

अत्र गणितेन मङ्गलस्य ध्रुवः ६२ । ५० । ४३ (अंशादिः) आगच्छति । लक्ष्मीपतिस् तु ६२ । ५० । ३६ (अंशादिः) इति लिखति । अत्र ७ विकलामितम् अन्तरं जातम् ।

बुधशीघ्रस्य शून्यर्त्तुखाद्रित्र्यङ्कनगेन्दवः १७९३७०६० ॥३१॥
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

उक्तवदानीतो भगणादिर्वर्षवृद्धिः ४।१।२४।४५।१८ ।* प्रतिवर्षंबीजमंशादि ०।०।४।४८ धनम् । स्फुटराश्यादिवृद्धिः १।२४।४५।२२।४८ । अंशादिसाधनार्थं बाणेषुनिघ्न इति अधिको गृहीतः। तच्चांशादिः ०।१४।३७।१२ । तत्र खण्डद्वयम् । आद्यम् ०।१२।४१।३२ षष्टयधिकशतद्वयेन गुणितम् अंशस्थाने पञ्चपञ्चाशद् अतः स्वखषड्यमांशैरिति । अपरम् ०।१।५५।४० एकत्रिंशता गुणितं भागस्थाने ०।५९।४५।४०

---

* अत्र गणितम् ।

बुधस्य युगभगणाः = १७९३७०६०

$$\frac{१७९३७०६०}{४३२००००} = \frac{८९६८५३}{२१६०००} = \frac{२९८९५१}{७२०००}$$

भ रा अं क वि प्रवि
= ४ । १ । २४ । ४५ । १८ । ०

```
७२०००)२९८९५१(४ । १ । २४ । ४५ । १८
      २८८०००
      ───────
       १०९५१×१२
       ─────────
६०००)१०९५१
       ६०००                              १५१×६०
       ────                              ──────
       ४९५१×३०                      १०)१५१×३
       ───────                          ──────
  २००)४९५१                              ४५३
       ४००                              ४५०
       ───                              ───
        ९५१                               ३×६०
                                          ────
        ८००                            १)३×६
        ───                             ────
        १५१                              १८
```

अतः स्वल्पान्तरत्वात् क्वग्निलवैर्विहीन इत्युक्तम् ।*

---

* अत्र गणितम् ।

अस्यैवाऽधिकारस्य १० श्लोकस्य गणिते बुधस्य बीजं साधितं वर्तते ।

$$
\begin{array}{lr}
 & \text{अं} \mid \text{क} \mid \text{वि} \mid \text{प्रवि} \\
\text{बुधस्य वार्षिकी गतिः} = & ५४ \mid ४५ \mid १८ \mid ० \\
\text{बीजस्य वार्षिकी गतिः} = (+) & ४ \mid ४८ \\
\hline
 & ५४ \mid ४५ \mid २२ \mid ४८
\end{array}
$$

एषा गतिः ५५ अंशानाम् आसन्ना वर्तते ।

$$
\begin{array}{lr}
 & ५५ \\
(-) & ५४ \mid ४५ \mid २२ \mid ४८ \\
\hline
 & ० \mid १४ \mid ३७ \mid १२
\end{array}
$$

$$
\begin{aligned}
\overset{\text{क}}{१४} \mid \overset{\text{वि}}{३७} \mid \overset{\text{प्रवि}}{१२} &= \frac{१४}{६०} + \frac{३७}{६० \times ६०} + \frac{१२}{६० \times ६० \times ६०} (\text{अंशादि}) \\
&= \frac{(१४ \times ६० \times ६०) + (३७ \times ६०) + १२}{६० \times ६० \times ६०} \\
&= \frac{५०४०० + २२२० + १२}{२१६०००} \\
&= \frac{५२६३२}{२१६०००} \\
&= \frac{५८४८}{२४०००} \\
&= \frac{७३१}{३०००}
\end{aligned}
$$

$$
\begin{aligned}
\frac{७३१}{३०००} \div ५५ &= \frac{७३१}{३०००} \times \frac{१}{५५} \\
&= \frac{७३१}{१६५०००} \\
&= \frac{१}{\frac{१६५०००}{७३१}} = \frac{१}{२२५\frac{५२५}{७३१}}
\end{aligned}
$$

---

७३१)१६५०००(२२५
१४६२
१८८०
१४६२
४१८०
३६५५
५२५

अत्र गणितेन हरः २२५ (आसन्नः) आगच्छति, लक्ष्मीपतिना २६० गृहीतः। स तेन कथं ज्ञातो वयं न जानीमः ।

पुनः

$$\frac{\text{७३१}}{\text{३०००}} - \frac{\text{५५}}{\text{२६०}} = \frac{\text{७३१}}{\text{३०००}} - \frac{\text{११}}{\text{५२}}$$

$$= \frac{(\text{७३१} \times \text{५२}) - (\text{११} \times \text{३०००})}{\text{३०००} \times \text{५२}}$$

$$= \frac{\text{३८०१२} - \text{३३०००}}{\text{१५६०००}}$$

$$= \frac{\text{५०१२}}{\text{१५६०००}}$$

$$= \frac{\text{१२५३}}{\text{३९०००}}$$

$$= \frac{\text{१}}{\frac{\text{३९०००}}{\text{१२५३}}}$$

$$= \frac{\text{१}}{\text{३१}\frac{\text{१५७}}{\text{१२५३}}} = \frac{\text{१}}{\text{३१}}\ (\text{स्वल्पान्तरेण})$$

७३१
×५२
१४६२
३६५५
३८०१२

१२५३)३९०००(३१
३७५९
१४१०
१२५३
१५७

अतो बुधशीघ्रोच्चस्य वार्षिकी गतिः $= \left(\text{५५} - \frac{\text{५५}}{\text{२६०}} - \frac{\text{१}}{\text{३१}}\right)$ (अंशादिः)

क्षेपकोपपत्तिस्तु । उक्तवद् ग्रन्थारम्भकालिकराश्यादिबुधशीघ्रोच्चं ११।११।५।५६।३२ बीजेन (अंशादिना) ६।३१।५० संयुतं ११।१७।३७।४६।३२ । चक्रपूरणाय द्वादशांशाः त्रयोविंशतिघट्यः शेषाः । अतोऽर्कैः जिनैर्हीन इत्युक्तम् ।*

---

* अत्र गणितम् ।

निशीथमेषार्ककालयोर् अन्तरं १३ घटीमितम् । अस्मिन् अन्तरे बुधशीघ्रोच्चगतिः साध्यते ।

$$\text{धनं चालनफलम्} = \frac{(\text{२४५।३२}) \times \text{१३}}{\text{६०}}$$

$$= \frac{\text{३१९१।५६}}{\text{६०}}$$

$$= \text{५३ । ११ । ५६ (कलादि)}$$

बुधशीघ्रोच्चस्य युगभगणाः = १७९३७०६०

युगसावनदिनानि = १५७७९१७८२८

अहर्गणः = १७८९०३५

$$\frac{\text{१७९३७०६०} \times \text{१७८९०३५}}{\text{१५७७९१७८२८}} = \frac{\text{४४८४२६५} \times \text{१७८९०३५}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{८०२२५०७०३४२७५}}{\text{३९४४७९४५७}}$$

$$\begin{array}{r} \text{भ \quad रा \quad अं \quad क \quad वि \quad प्रवि} \\ = \text{२०३३६।११।१०।१२।४४।४८} \end{array}$$

$$\begin{array}{r}
\text{४४८४२६५} \\
\times\ \underline{\text{१७८९०३५}} \\
\text{२२४२१३२५} \\
\text{१३४५२७९५}\phantom{\text{०}} \\
\text{४०३५८३८५}\phantom{\text{०००}} \\
\text{३५८७४१२०}\phantom{\text{००००}} \\
\text{३१३८९८५५}\phantom{\text{०००००}} \\
\text{४४८४२६५}\phantom{\text{००००००}} \\
\hline
\text{८०२२५०७०३४२७५}
\end{array}$$

३९४४७९४५७)८०२२५०७०३४२७५(२०३३६।११।१०।१२।४४।४८
७८८९५८९१४
१३२९१७८९४२
११८३४३८३७१
१४५७४०५७१७
११८३४३८३७१
२७३९६७३४६५
२३६६८७६७४२
३७२७९६७२३ × १२
४४७३५६०६७६
३९४४७९४५७
५२८७६६१०६
३९४४७९४५७
१३४२८६६४९ × ३०
४०२८५९९४७०
३९४४७९४५७०
८३८०४९००

८३८०४९०० × ६०
५०२८२९४०००
३९४४७९४५७
१०८३४९९४३०
७८८९५८९१४
२९४५४०५१६ × ६०
१७६७२४३०९६०
१५७७९१७८२८
१८९३२५२६८०
१५७७९१७८२८
३१५३३४८५२ × ६०
१८९२००९११२०
१५७७९१७८२८
३११४०९१२८४०
३१५५८३५६५६
— १४९२२८१६

		रा	अं	क	वि	प्रवि
निशीथकालजं बुधशीघ्रोच्चम्	=	११ ।	१० ।	१२ ।	४४ ।	४८
धनं चालनफलम्	= (+)			५३ ।	११ ।	५६
अंशादिबीजं धनम्	= (+)		६ ।	३१ ।	५० ।	
बुधशीघ्रोच्चस्य क्षेपकः	=	११ ।	१७ ।	३७ ।	४६ ।	४४

	रा	अं	क	वि	प्रवि
	१२ ।				
(—)	११ ।	१७ ।	३७ ।	४६ ।	४४
	० ।	१२ ।	२२ ।	१३ ।	१६

आचार्येण बुधशीघ्रोच्चस्य क्षेपक ऋणात्मकः स्वल्पान्तरेण १२ अंशैः २४ कलाभिः परिमितः स्वीकृतः।

अत्रोदाहरणम् । अब्दगण: १७ बाणेषु५५निघ्न: ९३५ । स्वस्य खषडयमांश२६०शेन ३।३५।४२ अर्कैर्जिनै: १२।२४ अब्दस्य क्वग्नि३१लवेन ०।३२।५४ च विहीन: ९१८।२७।२० । चक्र ३६० तष्टं बुधस्य शीघ्रोच्चं जातम् १९८।२७।२० इति ।*

---

* अत्र गणितम् ।

वर्षगणः = १७

$$\text{बुधशीघ्रोच्चध्रुवः} = \left(\text{५५ व} - \tfrac{\text{१}}{\text{२६०}}\,\text{स्व}\right)(\text{अंशादिः}) - \tfrac{\text{१}}{\text{३१}}\,\text{व}\,(\text{अंशादिः})$$

अं क

$$-\ (\text{१२ । २४})$$

$$\text{५५ व} - \frac{\text{१}}{\text{२६०}}\,\text{स्व} = \text{५५} \times \text{१७} \times \frac{\text{२५९}}{\text{२६०}}$$

$$= \text{११} \times \text{१७} \times \frac{\text{२५९}}{\text{५२}}$$

$$= \frac{\text{११} \times \text{४४०३}}{\text{५२}}$$

$$= \frac{\text{४८४३३}}{\text{५२}}$$

$$= \text{९३१ । २४ । १४}$$

```
५२)४८४३३(९३१ । २४ । १४
    ४६८
    ----
     १६३                 १३)२१ × १५      ३ × ६०
                            --------     ------
     १५६                    ३१५          १८०
     ----
      ७३                    २६           १३
                            ---          ---
      ५२                     ५५           ५०
      ---
      २१ × ६०                ५२           ५२
      -------                ---          ---
  १३)२१ × १५                  ३          — २
     -------
```

$\frac{व}{३१} = \frac{१७}{३१}$

= ०।३२।५४

३१) १७ (०।३२।५४

×६०

१०२०

९३

९०

६२

२८×६०

१६८०

१५५

१३०

१२४

६

बुधशीघ्रोच्चध्रुवः = (९३१।२४।१४) (अंशादिः) —(०।३२।५४) (अंशादिः)

— (१२।२४) (अंशादिः)

= (९३१।२४।१४) — (१२।५६।५४)

अं क वि

= ९१८।२७।२०

३६०)९१८(२

७२०

१९८

अं क वि

अतो बुधशीघ्रोच्चध्रुवः = १९८ । २७ । २०

जीवोंऽश३०निघ्नोऽद्रिगजां८७शयुक्तः
साब्दद्विभूपां१६२श इलाक्षि२१हीनः ॥१२॥

अथ बृहस्पतिसाधनमाह । जीव इति । अब्दानुप्रसङ्गादब्दः अंशैस्त्रिंशता निघ्नो गुणितः । अंशास्तु त्रिंशदिति नाममालायाम् ।* अद्रिगजांशेन स्वस्य सप्ताशीतिभागेन युक्तः अब्दस्य वर्षस्य द्विभूपांशेन द्विषष्ट्यधिकशतभागेन सहितः इलाक्षिभिः एकविंशत्या हीनो रहितः जीवो बृहस्पतिः स्यात् ।

जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः । इत्यमरः(दिग्वर्गे) ।

अत्रोपपत्तिः।

बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस् ३६४२२० तथा ॥३१॥
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति भगणाः ३६४२२० । उक्तवद् वर्षवृद्धौ राश्यादिः १।०।२१।६ ।**

---

* अस्मत्सन्निधौ वर्तमानयोर् नाममालयोर् अयं पाठो नोपलभ्यते ।

** अत्र गणितम् ।

बृहस्पतेर् युगभगणाः = ३६४२२०

$$\frac{३६४२२०}{४३२००००} = \frac{१८२११}{२१६०००}$$

रा अं क वि
= १ । ० । २१ । ६

२१६०००)१८२११(० । १ । ० । २१ । ६
×१२
१८०००)१८२११
१८०००
२११×३०
६००)२११×६०
१०)२११

१०)२११
२१०
१×६०
१)६

बीजमंशादि ०।०।२।२४ ऋणम् । बीजसंस्कृतमंशादिगुरुः ३०।२१।३।३६ । अत्र खण्डत्रयेण साधितम् । आद्यम् ३०।०।० अतोंऽशनिघ्न इत्युक्तम् । द्वितीयं ०।२०।४१।२३ सप्ताशीतिनिघ्नं भागस्थाने त्रिंशत् । अतोऽद्रिगजांशयुक्त इत्युक्तं स्वस्येति शेषः । तृतीयं ०।०।२२।१३ द्विषष्ट्यधिकशतनिघ्नं लवस्थाने एकः । अतः साब्दद्विभूपांश इत्युक्तम् ।*

---

* अत्र गणितम् ।

अस्यैवाऽधिकारस्य १० श्लोकस्य गणिते बृहस्पतेर् बीजं साधितं वर्तते ।

	अं	क	वि	प्रवि
बृहस्पतेर् वार्षिकी गतिः =	३० ।	२१ ।	६ ।	
बीजस्य वार्षिकी गतिः = (—)	० ।	० ।	२ ।	२४
	३० ।	२१ ।	३ ।	३६

एषा गतिः ३० अंशानाम् आसन्ना वर्तते ।

$$\overset{\text{क}}{२१} \mid \overset{\text{वि}}{३} \mid \overset{\text{प्रवि}}{३६} = \left(\frac{२१}{६०} + \frac{३}{६० \times ६०} + \frac{३६}{६० \times ६० \times ६०}\right) \text{(अंशादि)}$$

$$= \frac{(२१ \times ६० \times ६०) + (३ \times ६०) + ३६}{६० \times ६० \times ६०}$$

$$= \frac{१२६० \times ६० + १८० + ३६}{२१६०००}$$

$$= \frac{७५६०० + २१६}{२१६०००}$$

$$= \frac{७५८१६}{२१६०००}$$

$$= \frac{८४२४}{२४०००}$$

$$= \frac{१०५३}{३०००}$$

$$= \frac{३५१}{१०००}$$

$$\frac{३५१}{१०००} \div ३० = \frac{३५१}{१०००} \times \frac{१}{३०}$$

$$= \frac{३५१}{३००००}$$

$$= \frac{१}{\frac{३००००}{३५१}}$$

$$= \frac{१}{८५\frac{१६५}{३५१}}$$

```
३५१)३००००(८५
     २८०८
     १९२०
     १७५५
      १६५
```

अत्र गणितेन हरः ८५ (आसन्नः) आगच्छति, लक्ष्मीपतिना तु ८७ गृहीतः। स तेन कथं ज्ञातो वयं न जानीमः।

पुनः

$$\frac{३५१}{१०००} - \frac{३०}{८७} = \frac{(३५१ \times ८७) - (३० \times १०००)}{८७ \times १०००}$$

$$= \frac{३०५३७ - ३००००}{८७०००}$$

$$= \frac{५३७}{८७०००}$$

$$= \frac{१}{\frac{८७०००}{५३७}}$$

$$= \frac{१}{१६२\frac{६}{५३७}}$$

$$= \frac{१}{१६२} \text{ (स्वल्पान्तरेण)}$$

```
                 ५३७)८७०००(१६२
  ३५१                 ५३७
 ×८७                  ३३३०
 २४५७                 ३२२२
२८०८                   १०८०
३०५३७                  १०७४
                          ६
```

अतो बृहस्पतेर् वार्षिकी गतिः $= ३० + \frac{३०}{८७} + \frac{१}{१६२}$ (अंशादिः)

क्षेपकोपपत्तिस्तु । उक्तवत् कलिगतादहर्गणाद् भगणादिगुरुः ४१२।११।१२।१७।६ । बुधस्यार्द्धं बीजं ३।१५।५५ ऋणम् । तत्संस्कृतमध्यमगुरू राश्यादिः ११।६।१।११। चक्रपूरणाय एकविंशत्यंशा न्यूनाः। अत इलाक्षिहीन इति ।*

---

* अत्र गणितम् ।

निशीथमेषार्ककालयोर् अन्तरं १३ घटीमितम् । अस्मिन् अन्तरे बृहस्पतेर् गतिः साध्यते ।

$$\text{धनं चालनफलम्} = \frac{५ \times १३}{६०} = \frac{१३}{१२} = १।५ \text{ (कलादि)}$$

बृहस्पतेर् युगभगणाः = ३६४२२०

युगसावनदिनानि = १५७७९१७८२८

अहर्गणः = १७८९०३५

$$\frac{३६४२२० \times १७८९०३५}{१५७७९१७८२८} = \frac{९१०५५ \times १७८९०३५}{३९४४७९४५७}$$

$$= \frac{१६२९००५८१९२५}{३९४४७९४५७}$$

$$\begin{array}{cccccc} \text{भ} & \text{रा} & \text{अं} & \text{क} & \text{वि} & \text{प्रवि} \\ = ४१२ । & ११ । & १२ । & १५ । & ५३ । & १६ \end{array}$$

$$\begin{array}{r} १७८९०३५ \\ \times ९१०५५ \\ \hline ८९४५१७५ \\ ८९४५१७५ \\ १७८९०३५ \\ १६१०१३१५ \\ \hline १६२९००५८१९२५ \end{array}$$

३९४४७९४५७)१६२९००५८१९२५(४।१२।११।१२।१५।५३।१६
१५७७९१७८२८
५१०८७९९१२
३९४४७९४५७
११६४००४५५५
७८८९५८९१४
३७५०४५६४१ × १२
४५००५४७६९२
३९४४७९४५७
५५५७५३१२२
३९४४७९४५७
१६१२७३६६५ × ३०
४८३८२०९९५०
३९४४७९४५७
८९३४१५३८०
७८८९५८९१४
१०४४५६४६६ × ६०
६२६७३८७९६०
३९४४७९४५७
२३२२५९३३९०
१९७२३९७२८५
३५०१९६१०५

३५०१९६१०५ × ६०
२१०११७६६३००
१९७२३९७२८५
१२८७७९३४५०
११८३४३८३७१
१०४३५५०७९ × ६०
६२६१३०४७४०
३९४४७९४५७
२३१६५१०१७०
२३६६८७६७४२
— ५०३६६५७२

रा अं क वि प्रवि
निशीथकालजो मध्यमबृहस्पतिः = ११ । १२ । १५ । ५३ । १६
धनं चालनफलम् = (+) १ । ५
११ । १२ । १६ । ५८ । १६

अत्र गणितेन मेषसङ्क्रान्तिकालजो मध्यमबृहस्पतिः ११।१२।१६।५८।१६ (राश्यादिः) आगच्छति । लक्ष्मीपतिस् तु ११।१२।१७।६ (राश्यादिः) इति लिखति । अत्र ७।४४ विकलादिमितम् अन्तरं जातम् ।

अत्रोदाहरणम् । गताब्दगण: १७ अंशै: ३० निघ्न: ५१० स्वस्य ५१० अद्रिगजांऽ८७शेन ५।५१।४३ युक्त: ५१५।५१।४३ । अब्दानां १७ द्विभूपांऽ१६२शेन ०।६।१७ सहित: ५१५।५८।० । इलाक्षि२१हीन: ४९४।५८।० । चक्राधिकत्वाच्चक्रतष्टो जातो गुरुमध्य: १३४।५८।० इति ।* आगता भगणा: संवत्सरानयनार्थं स्थाप्या: । विशेषं वर्षफलाधिकारे वक्ष्याम: ।

रा अं क वि

मेषसङ्क्रान्तिकालजो मध्यमबृहस्पति: = ११।१२।१७। ६

अंशादिबीजम् ऋणम् = (—) ३।१५।५५

११। ९। १।११

रा अं क वि

१२

(—) ११। ९। १। ११

२०। ५८। ४९

आचार्येण बृहस्पते: क्षेपक ऋणात्मक: स्वल्पान्तरेण २१ अंशै: परिमित: स्वीकृत: ।

* अत्र गणितम् ।

वर्षगण: = १७

बृहस्पतिध्रुव: = $(३० व + \frac{१}{८७} स्व)$ (अंशादि:) $+ \frac{१}{१६२}$ व (अंशादि:) — २१ अंशा:

$$\therefore ३० व + \frac{१}{८७} स्व = ३० \times १७ \times \frac{८८}{८७}$$

$$= \frac{१० \times १७ \times ८८}{२९}$$

$$= \frac{१० \times १४९६}{२९}$$

$$= \frac{१४९६०}{२९}$$

$$= ५१५।५१।४३$$

---

२९)१४९६०(५१५।५१।४३
१४५
४६
२९
१७०
१४५
२५×६०
१५००
१४५
५०
२९
२१

२१×६०
१२६०
११६
१००
८७
१३

$$\frac{\text{व}}{\text{१६२}} = \frac{\text{१७}}{\text{१६२}} = \text{०।६।१७}$$

१६२) १७ (०।६।१७
×६०
१०२०
९७२
४८×६०
२८८०
१६२
१२६०
११३४
१२६

बृहस्पतिध्रुवः = (५१५।५१।४३) (अंशादिः) + (०।६।१७) (अंशादिः)
— २१ अंशाः

= (५१५।५८।०) — २१
= ४९४।५८।०

अं क वि
अतो बृहस्पतिध्रुवः = १३४।५८।०

तत्त्वाश्वि२२५घ्नः स्वाभ्रवेदेश ११४० भागै-
र्युक्तः सार्द्धाष्टाक्षि २८।३० हीनः सितोच्चम् ।

अथ शुक्रशीघ्रोच्चसाधनमाह । तत्त्वाश्विघ्न इति । अब्दस्य प्रसङ्गाद् वर्षगणः तत्त्वाश्विभिः पञ्चविंशत्यधिकद्विशत्या घ्नो हतः ।

तत्त्वं पञ्चविंशतिः ।।१८३।।

इति नाममालायाम् । स्वस्य अभ्रवेदेशैः चत्वारिंशदधिकैकादशशत्या यो भागोंऽशस्तेन युक्तः ।

एकादश महेश्वराः ।।१३।।

इति मुहूर्त्तमालायाम् (संज्ञाप्रकरणे) । अर्द्धेन त्रिंशद्घटिकाभिः सहितानि अष्टाक्षीणि अष्टाविंशतिः तैः हीनः रहितः सितस्य शुक्रस्य उच्चं शीघ्रोच्चं स्यात् ।

शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च ।।३।।

(बृहज्जातके, ग्रहयोनिप्रभेदाध्याये)

इति वराहः ।

अत्रोपपत्तिर्गोलाद्यथा । तत्र रविशुक्रयोः पूर्वस्यां दिशि चक्रयन्त्रवेधेनान्तरभागा ज्ञेयाः । ते तयोः स्फुटयोरन्तरांशा जातास्तैः स्फुटार्काद् विशोधितैः स्फुटः शुक्रो भवति । ततः शुक्रस्य मन्दफलमानीय तत् स्फुटे शुक्रे धनर्णं व्यस्तं कार्यम् । रविश्च मध्यमः कार्यः । तयोर्यदन्तरं तच्छीघ्रफलं धनमृणं च ज्ञेयम् । एवं प्रतिदिनवेधेन तच्छीघ्रफलं परमं ज्ञातव्यम् । तत् तादृक् फलमर्कात्तिर्यक्स्थितेनोच्चेनाऽकृष्टस्य भवति । तच्च तिर्यक्स्थं त्रिभान्तरितस्य स्यात् । अतस्तत्र तदा त्रिभोनेन स्फुटशुक्रेण तुल्यं शीघ्रोच्चं ज्ञेयम् । एवं पुनरन्यस्मिन् पर्यये प्राच्यामेवान्यच्छीघ्रोच्चं ज्ञात्वा ततोऽनुपातः क्रियते । यद्येतत्कालान्तरदिनैस्तयोरुच्चयोरन्तरं लभ्यते तदैकेन किमिति । फलं तुङ्गगतिः । एवं बुधशीघ्र-

स्यापि ज्ञेयम् ।* शुक्रोच्चभगणाः ७०२२३७६ ।

सितशीघ्रस्य षट्सप्तत्रियमाऽश्विखभूधराः ७०२२३७६ ॥३२॥

(सूर्यसिद्धान्ते, मध्यमाधिकारे)

उक्तवद् भगणादिशुक्रशीघ्रोच्चवर्षवृद्धिः १।७।१५।११।५२।४८ ।**

---

* सिद्धान्तशिरोमणौ मध्यमाधिकारे भगणाध्याये भगणोपपत्तौ भास्करोक्तोऽयं विषयः । बुधो लक्ष्मीपतिना दृष्टो नाऽसीद् इत्यस्यैवाऽधिकारस्य १२ श्लोकस्य लक्ष्मीपतिव्याख्ययैव ज्ञायते । अत्र शुक्रशीघ्रोच्चस्य भगणज्ञानविषये भास्करोक्तं विषयम् उद्धरन् लक्ष्मीपतिर् भास्करस्य 'एवं बुधस्यापि' इति वाक्यम् अप्युद्धरति । भास्करलेखाद् भास्करेण बुधोऽपि दृष्ट आसीद् इति प्रतीयते । परन्तु शुक्रस्य प्रसङ्गे बुधस्य वर्णनं कुर्वन् भास्करो बुधं दृष्टवान् वा न दृष्टवान् इति वयं संशये पतामः ।

बृहस्पतेः शुक्रस्य चोदयाऽस्तादिकं तु लक्ष्मीपतिः स्वगणितेन सङ्गच्छते वा न सङ्गच्छत इति परीक्षितुम् उत्सुक आसीद् इति तदीयाल् लेखाज् ज्ञायते (पूर्णिमायाः २९ अङ्के प्रकाशितो देवीप्रसादभण्डारिणः गणेश दैवज्ञ र लक्ष्मीपति पाँडे इति लेखो द्रष्टव्यः) ।

** अत्र गणितम् ।

शुक्रशीघ्रोच्चस्य युगभगणाः = ७०२२३७६

$$\frac{७०२२३७६}{४३२००००} = \frac{७८०२६४}{४८००००} = \frac{९७५३३}{६००००} = \frac{३२५११}{२००००}$$

भ रा अं क वि प्रवि

= १ । ७ । १५ । ११ । ५२ । ४८

२००००)३२५११(१।७।१५।११।५२।४८
२००००
१२५११ × १२
५०००)१२५११ × ३
३७५३३
३५०००
२५३३ × ३०
५००)२५३३ × ३

५००)२५३३ × ३
७५९९
५००
२५९९
२५००
९९ × ६०
२५)९९ × ३

२५)९९ × ३
२९७
२५
४७
२५
२२ × ६०
५)२२ × १२

५)२२ × १२
२६४
२५
१४
१०
४ × ६०
१)४ × १२
४८

प्रतिवर्षजं बीजमंशादि ऋणम् ०।०।३।३६ । तत्संस्कृतस्फुटवर्षवृद्धिरंशादिः २२५।११।४९।१२ । अत्र खण्डद्वयेन तत्साधनं कृतम् । आद्यम् २२५ अतस्तत्त्वाब्धिनिघ्न इत्युक्तम् । द्वितीयं ०।११।४९।१२ चत्वारिंशदधिकैकादशशतैर्गुणितं भागस्थाने २२४।३४।४८ । स्वल्पान्तरत्वात् स्वाभ्रवेदेशभागैर्युक्त इति ।*

---

* अत्र गणितम् ।

अस्यैवाऽधिकारस्य १० श्लोकस्य गणिते शुक्रस्य बीजं साधितं वर्तते ।

		अं	क	वि	प्रवि
शुक्रशीघ्रोच्चस्य वार्षिकी गतिः	=	२२५	११	५२	४८
बीजस्य वार्षिकी गतिः	= (—)			३	३६
		२२५	११	४९	१२

एषा गतिः २२५ अंशानाम् आसन्ना वर्तते ।

क वि प्रवि

$$\text{११ । ४९ । १२} = \left(\frac{११}{६०} + \frac{४९}{६० \times ६०} + \frac{१२}{६० \times ६० \times ६०}\right)\text{(अंशादि)}$$

$$= \frac{(११ \times ६० \times ६०) + (४९ \times ६०) + १२}{६० \times ६० \times ६०}$$

$$= \frac{३९६०० + २९४० + १२}{२१६०००}$$

$$= \frac{४२५५२}{२१६०००}$$

$$= \frac{४७२८}{२४०००}$$

$$= \frac{५९१}{३०००}$$

$$= \frac{१९७}{१०००}$$

क्षेपकोपपत्तिस्तु । उक्तवद् ग्रन्थारम्भकालिकं सितोच्चम् ११।६। १९।३।१४ । बीजसंशादि ४।५३।५२।३० ऋणम् ११।१।२५।१०।४४ । चक्रपूरणाय अष्टाविंशत्यंशाः पञ्चत्रिंशद्घटिका न्यूनाः । अतोऽत्र पञ्च घटिकास्त्यक्त्वा सार्द्धाष्टाक्षिहीन इत्युक्तम् ।*

$$\frac{\text{१९७}}{\text{१०००}} \div \text{२२५} = \frac{\text{१९७}}{\text{१०००}} \times \frac{\text{१}}{\text{२२५}}$$

$$= \frac{\text{१९७}}{\text{२२५०००}}$$

$$= \frac{\text{१}}{\frac{\text{२२५०००}}{\text{१६७}}}$$

$$= \frac{\text{१}}{\text{११४२}\frac{\text{२६}}{\text{१६७}}}$$

$$\begin{array}{l}
\text{१९७)२२५०००(११४२}\\
\qquad\quad\underline{\text{१९७}}\\
\qquad\quad\;\text{२८०}\\
\qquad\quad\;\underline{\text{१९७}}\\
\qquad\qquad\text{८३०}\\
\qquad\qquad\underline{\text{७८८}}\\
\qquad\qquad\;\text{४२०}\\
\qquad\qquad\;\underline{\text{३९४}}\\
\qquad\qquad\quad\text{२६}
\end{array}$$

अत्र गणितेन हरः ११४२ (आसन्नः) आगच्छति । लक्ष्मीपतिना स्वल्पान्तरेण ११४० गृहीतः ।

अतः शुक्रशीघ्रोच्चस्य वार्षिकी गतिः $= \left(\text{२२५} + \frac{\text{२२५}}{\text{११४०}}\right)$ (अंशादिः)

* अत्र गणितम् ।

शुक्रशीघ्रोच्चस्य युगभगणाः = ७०२२३७६

युगसावनदिनानि = १५७७९१७८२८

अहर्गणः = १७८९०३५

$$\frac{\text{७०२२३७६}\times\text{१७८९०३५}}{\text{१५७७९१७८२८}}=\frac{\text{१७५५५९४}\times\text{१७८९०३५}}{\text{३९४४७९४५७}}$$

$$=\frac{\text{३१४०८१९१११७९०}}{\text{३९४४७९४५७}}$$

भ रा अं क वि प्रवि

= ७९६१ । ११ । ५ । ५८ । ३३ । ५२

```
    १७५५५९४
   ×१७८९०३५
   ---------
    ८७७७९७०
   ५२६६७८२
  १५८००३४६
 १४०४४७५२
१२२८९१५८
१७५५५९४
--------------
३१४०८१९१११७९०
```

```
३९४४७९४५७)३१४०८१९१११७९०(७९६१।११।५।५८।३३।५२
           २७६१३५६१९९
           ----------
            ३७९४६२९१२७
            ३५५०३१५११३
            ----------
             २४४३१४०१४९
             २३६६८७६७४२
             ----------
               ७६२६३४०७०
               ३९४४७९४५७
               ---------
               ३६८१५४६१३ × १२
               --------------
             ४४१७८५५३५६
             ३९४४७९४५७
             ----------
              ४७३०६०७८६
              ३९४४७९४५७
              ---------
               ७८५८१३२९ × ३०
              --------------
             २३५७४३९८७०
             १९७२३९७२८५
             ----------
              ३८५०४२५८५
```

```
  ३८५०४२५८५ × ६०
  ---------------
 २३१०२५५५१००
 १९७२३९७२८५
 -----------
  ३३७८५८२२५०
  ३१५५८३५६५६
  ----------
  २२२७४६५९४ × ६०
  ---------------
 १३३६४७९५६४०
 ११८३४३८३७१
 -----------
  १५३०४११९३०
  ११८३४३८३७१
  ----------
  ३४६९७३५५९ × ६०
  ---------------
 २०८१८४१३५४०
 १९७२३९७२८५
 -----------
  १०९४४४०६९०
   ७८८९५८९१४
  ----------
   ३०५४८१७७६
```

निशीथमेषार्ककालयोर् अन्तरं १३ घटीमितम् । अस्मिन् अन्तरे शुक्रशीघ्रोच्चस्य गतिः साध्यते ।

$$
\begin{aligned}
\text{धनं चालनफलम्} &= \frac{(९६।८)\times १३}{६०}\\
&= \frac{१२४९।४४}{६०}\\
&= २०।४९।४४\ (\text{कलादि})
\end{aligned}
$$

$$
\begin{array}{lll}
 & & \text{रा}\quad \text{अं}\quad \text{क}\quad \text{वि}\quad \text{प्रवि}\\
\text{निशीथकालजं शुक्रशीघ्रोच्चम्} & = & ११ । ५ । ५८ । ३३ । ५२\\
\text{धनं चालनफलम्} & = (+) & \underline{\qquad\quad २० । ४९ । ४४}\\
 & & ११ । ६ । १९ । २३ । ३६
\end{array}
$$

अत्र गणितेन मेषसङ्क्रान्तिकालजं शुक्रशीघ्रोच्चम् ११।६।१९।२३।३७ (राश्यादि) आगच्छति । लक्ष्मीपतिस् तु ११।६।१९।३।१४ (राश्यादि) लिखति । अत्र २०।२३ विकलादिमितम् अन्तरं जातम् ।

$$
\begin{array}{lll}
 & & \text{रा}\ \text{अं}\ \text{क}\ \text{वि}\ \text{प्रवि}\\
\text{मेषसङ्क्रान्तिकालजं शुक्रशीघ्रोच्चम्} & = & ११।६।१९। ३।१४\\
\text{अंशादिबीजम् ऋणम्} & = (-) & \underline{\quad ४।५३।५२।३०}\\
 & & ११।१।२५।१०।४४
\end{array}
$$

$$
\begin{array}{l}
\text{रा}\quad \text{अं}\quad \text{क}\quad \text{वि}\quad \text{प्रवि}\\
१२ ।\\
-\underline{११ ।\ १ । २५ । १० । ४४}\\
० । २८ । ३४ । ४९ । १६
\end{array}
$$

आचार्येण शुक्रशीघ्रोच्चस्य क्षेपक ऋणात्मकः स्वल्पान्तरेण २८ अंशैः ३० कलाभिः परिमितः स्वीकृतः ।

अत्रोदाहरणम् । अब्दगणः १७ तत्त्वाऽश्वि२२५निघ्नः ३८२५ स्वस्य ३८२५ अभ्रवेदेश११४०भागेन ३।२१।१९ सहितः ३८२८।२१।१९ सार्द्धाष्टाक्षि२८।३०हीनः ३७९९।५१।१९ । चक्राधिकत्वाच्चक्रतष्टं जातं शुक्रशीघ्रोच्चम् १९९।५१।१९ ।*

---

* अत्र गणितम् ।

वर्षगणः = १७

$$\text{शुक्रशीघ्रोच्चध्रुवः} = (\text{२२५ व} + \tfrac{\text{१}}{\text{११४०}}\ \text{स्व})(\text{अंशादिः}) - (\text{२८।३०})(\text{अंशादिः})$$

$$\text{२२५ व} + \frac{\text{१}}{\text{११४०}}\ \text{स्व} = \text{२२५} \times \text{१७} \times \frac{\text{११४१}}{\text{११४०}}$$

$$= \frac{\text{४५} \times \text{१९३९७}}{\text{२२८}}$$

$$= \frac{\text{८७२८६५}}{\text{२२८}}$$

$$= \text{३८२८ । २१ । १९}$$

```
  १९३९७
   × ४५
 -------
  ९६९८५
 ७७५८८
 -------
 ८७२८६५
```

```
२२८)८७२८६५(३८२८।२१।१९
    ६८४
    ----
    १८८८
    १८२४
    -----
      ६४६
      ४५६
      ----
      १९०५
      १८२४
      -----
        ८१ × ६०
        -------
   १९)८१ × ५
      -------
        ४०५
```

```
१९)४०५
   ३८
   --
    २५
    १९
    --
     ६ × ६०
    ------
    ३६०
    ३६१
    ---
    — १
```

अर्क१२घ्नोऽङ्गाक्षांश५६शनन्दर्त्तु६९युक्तो
वर्षाभ्राभ्रेन्द्रां १४०० शयुक् सूर्यसूनुः ॥१३॥

अथ शनैश्चरसाधनमाह। अर्कघ्न इति। अब्दः अर्कैर्द्वादशभिर्गुणितः अङ्गाक्षांशेन षट्पञ्चाशद्भागेन स्वस्येति शेषः नन्दर्त्तुभिः एकोनसप्तत्या च युक्तो योजितः वर्षस्य अब्दस्य अभ्राभ्रेन्द्रैः चतुर्दशशतैर्योऽशो भागस्तेन युग् युक्तः सूर्यस्य रवेः सूनुः पुत्रः स्यात्।

सूनुः स्याद् भ्रातृपुत्रयोः।

इति विश्वः।

कोणो मन्दः सूर्यपुत्रोऽसितश्च ॥२॥

(बृहज्जातके, ग्रहयोनिप्रभेदाध्याये)

इति वराहः।

अत्रोपपत्तिः। शनेर्युगभगणाः १४६५६८।

शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः १४६५६८ ॥३२॥ इति

(सूर्यसिद्धान्ते, मध्यमाधिकारे)

शुक्रशीघ्रोच्चध्रुवः = (३८२८।२१।१९) (अंशादिः)
— (२८।३०) (अंशादिः)

= ३७९९।५१।१९

३६०)३७९९(१०
३६००
१९९

अं क वि

अतः शुक्रशीघ्रोच्चध्रुवः = १९९।५१।१९

उक्तवद् वर्षवृद्धी राश्यादिः ०।१२।१२।५०।२४ ।* प्रतिवर्षजं बीजं धनमंशादि ०।०।३।३६ । बीजसंस्कृता स्फुटवर्षवृद्धिः ०।१२।१२।५४।० । अत्रांऽशादिसाधनाय खण्डत्रयम् । आद्यम् १२ अतोऽकंघ्न इति । द्वितीयं ०।१२।५१।२५ षट्पञ्चाशता गुणितम् अंशस्थाने

---

* अत्र गणितम् ।

शनेर् युगभगणाः = १४६५६८

$$\frac{१४६५६८}{४३२००००} = \frac{१८३२१}{५४००००} = \frac{६१०७}{१८००००}$$

रा अं क वि प्रवि

= ० । १२ । १२ । ५० । २४

१८००००) ६१०७ (०।०।१२।१२।५०।२४

$\underline{\times १२}$

१५०००) $\underline{६१०७ \times ३०}$

५००) ६१०७

$\underline{५००}$

११०७

$\underline{१०००}$

$\underline{१०७ \times ६०}$

२५) $\underline{१०७ \times ३}$

३२१

$\underline{२५}$

७१

$\underline{५०}$

२१

$\underline{२१ \times ६०}$

५) $\underline{२१ \times १२}$

२५२

$\underline{२५}$

$\underline{२ \times ६०}$

१) $\underline{२ \times १२}$

२४

द्वादश । अतोऽङ्गाक्षांशयुक्त इत्युक्तं स्वस्येति शेषोपि दृढमूल इति च । तृतीयं ०।०।२।३५ चतुर्दशशतैर्गुणितम् अंशस्थाने एकमतो वर्षाभ्राभ्रेन्द्रांशयुगिति ।*

---

* अत्र गणितम् ।

अस्यैवाऽधिकारस्य १० श्लोकस्य गणिते शनेर् बीजं साधितं वर्तते ।

	अं	क	वि	प्रवि
शनेर् वार्षिकी गतिः =	१२	१२	५०	२४
बीजस्य वार्षिकी गतिः = (+)			३	३६
	१२	१२	५४	०

एषा गतिः १२ अंशानाम् आसन्ना वर्तते ।

क वि

$$१२ । ५४ = \left(\frac{१२}{६०} + \frac{५४}{६०\times६०}\right) \text{(अंशादि)}$$

$$= \frac{१}{५} + \frac{३}{२०\times१०}$$

$$= \frac{४०+३}{२००}$$

$$= \frac{४३}{२००}$$

$$\frac{४३}{२००} \div १२ = \frac{४३}{२००} \times \frac{१}{१२}$$

$$= \frac{४३}{२४००}$$

$$= \frac{१}{\frac{२४००}{४३}}$$

$$= \frac{१}{५५\frac{३५}{४३}}$$

$$= \frac{१}{५६} \text{(स्वल्पान्तरेण)}$$

४३)२४००(५५
२१५
२५०
२१५
३५

पुनः

$\frac{१२}{५६} = \frac{३}{१४} = ०।१२।५१।२५$ (स्वल्पान्तरेण)

$$
\begin{array}{l}
१४)\ ३\ (०।१२।५१।२५ \\
\quad \times ६० \\
\hline
७)\ \underline{३ \times ३०} \qquad \underline{६ \times ६०} \qquad \underline{३ \times ६०} \\
\quad ९० \qquad\qquad ३६० \qquad\qquad १८० \\
\quad \underline{८४} \qquad\qquad \underline{३५७} \qquad\qquad \underline{१७५} \\
\quad\ ६ \qquad\qquad\quad ३ \qquad\qquad\quad ५
\end{array}
$$

क वि प्रवि

$$
\begin{array}{rr}
 & १२ । ५४ । ० \\
(-) & १२ । ५१ । २५ \\
\hline
 & २ । ३५
\end{array}
$$

वि प्रवि

$$२ । ३५ = \left(\frac{२}{६० \times ६०} + \frac{३५}{६० \times ६० \times ६०}\right) \text{ (अंशादि)}$$

$$= \frac{२}{६० \times ६०} + \frac{७}{६० \times ६० \times १२}$$

$$= \frac{२४ + ७}{६० \times ७२०}$$

$$= \frac{३१}{४३२००}$$

$$= \frac{१}{\frac{४३२००}{३१}}$$

$$= \frac{१}{१३९३\frac{१७}{३१}}$$

$$
\begin{array}{l}
३१)४३२००(१३९३ \\
\quad \underline{३१} \\
\quad १२२ \\
\quad \underline{\ ९३} \\
\quad २९० \\
\quad \underline{२७९} \\
\quad\ ११० \\
\quad\ \underline{\ ९३} \\
\quad\ \ १७
\end{array}
$$

क्षेपकोपपत्तिस्तु । उक्तवद् गणितागतो ग्रन्थारम्भकालिकः राश्यादिशनिः २।४।५।५८ । धनबीजमंशादि ४।५३।५३ बीजसंस्कृतशनिमध्यः २।८।५९।५१ अतो नन्दर्त्तुयुक्त इति ।*

अत्र गणितेन हरः १३९३ (आसन्नः) आगच्छति । लक्ष्मीपतिना स्वल्पान्तरेण १४०० स्वीकृतः ।

$$\text{अतः शनेर् वार्षिकी गतिः} = \left(\text{१२} + \frac{\text{१२}}{\text{५६}}\right) \text{ (अंशादिः)}$$

$$+ \frac{\text{१}}{\text{१४००}} \text{ (अंशादिः)}$$

* अत्र गणितम् ।

शनेर् युगभगणाः = १४६५६८
युगसावनदिनानि = १५७७९१७८२८
अहर्गणः = १७८९०३५

$$\frac{\text{१४६५६८} \times \text{१७८९०३५}}{\text{१५७७९१७८२८}} = \frac{\text{३६६४२} \times \text{१७८९०३५}}{\text{३९४४७९४५७}}$$

$$= \frac{\text{६५५५३८२०४७०}}{\text{३९४४७९४५७}}$$

$$\begin{array}{llllll} \text{भ} & \text{रा} & \text{अं} & \text{क} & \text{वि} & \text{प्रवि} \end{array}$$

$$= \text{१६६ । २ । ४ । ५ । ३१ । ३५}$$

$$\begin{array}{r}
\text{१७८९०३५} \\
\times\,\text{३६६४२} \\
\hline
\text{३५७८०७०} \\
\text{७१५६१४०} \\
\text{१०७३४२१०} \\
\text{१०७३४२१०} \\
\text{५३६७१०५} \\
\hline
\text{६५५५३८२०४७०}
\end{array}$$

```
३९४४७९४५७)६५५५३८२०४७०(१६।२।४।५।३१।३४
           ३९४४७९४५७
           २६१०५८७४७७
           २३६६८७६७४२
            २४३७१०७३५०
            २३६६८७६७४२              २०७६२०६३५×६०
              ७०२३०६०८×१२          १२४५७२३८१००
             ८४२७६७२९६             ११८३४३८३७१
             ७८८९५८९१४               ६२२८५४३९०
              ५३८०८३८२×३०            ३९४४७९४५७
           १६१४२५१४६०               २२८३७४९३३×६०
           १५७७९१७८२८              १३७०२४९५९८०
              ३६३३३६३२×६०          ११८३४३८३७१
           २१८००१७९२०               १८६८११२२७०
           १९७२३९७२८५               १५७७९१७८२८
            २०७६२०६३५                २९०१९४४४२
```

निशीथमेषार्ककालयोर् अन्तरं १३ घटीमितम् । अस्मिन् अन्तरे शनेर् गतिः साध्यते ।

$$\text{धनं चालनफलम्} = \frac{२\times१३}{६०} = \frac{१३}{३०} = ०।२६।० \ (\text{कलादि})$$

		रा	अं	क	वि	प्रवि
निशीथकालजो मध्यमशनिः	=	२	४	५	३१	३४
धनं चालनफलम्	= (+)			०	२६	०
		२	४	५	५७	३४
अंशादिबीजं धनं	= (+)		४	५३	५२	३०
		२	८	५९	५०	४

आचार्येण शनेः क्षेपकः स्वल्पान्तरेण ६९ अंशैः परिमितः स्वीकृतः ।

एवं क्षेपकवर्षवृद्धिज्ञाते एकवर्षेण इयं वर्षवृद्धिस्तदा गताब्दैः किमिति त्रैराशिकाल्लब्धं फलं क्षेपकेन युक्तं ग्रहः स्यादिति सर्वमनवद्यम् । ननु किमिदं त्रैराशिकं येनैवं सर्वगणितोपपत्तिव्याप्तिः स्यादिति चेदुच्यते तल्लक्षणं भास्करीये पाटीगणिते (लीलावत्याम्) ।

प्रमाणमिच्छा च समानजाती
आद्यन्तयोस्तत्फलमन्यजाति ।
मध्ये तदिच्छाहृतमाद्यहृत् स्याद्
इच्छाफलं व्यस्तविधिर्विलोमे ।। इति ।

अस्य विशेषस्तत्रैव द्रष्टव्यः ।

अत्रोदाहरणम् । अब्दगणः १७ अर्क १२ घ्नः २०४ स्वस्य २०४ अङ्गाक्षांश५६शेन ३।३६।३६ नन्दर्तुभि६९श्च युक्तः २७६।३६।३६ वर्षगणस्य १७ अभ्राभ्रेन्द्रां१४००शेन ०।०।४०।४० युक्तो जातः शनैश्चरमध्यः २७६।४०।१६।४० इति ।*

---

* अत्र गणितम् ।

वर्षगणः = १७

$$\text{शनिध्रुवः} = \left(\text{१२ व} + \frac{\text{१}}{\text{५६}}\text{स्व}\right)(\text{अंशादिः}) + \frac{\text{व}}{\text{१४००}}(\text{अंशादिः})$$
$$+ \text{६९ अंशाः}$$

$$\text{१२ व} + \frac{\text{१}}{\text{५६}}\text{स्व} = \text{१२} \times \text{१७} \times \frac{\text{५७}}{\text{५६}}$$
$$= \frac{\text{३} \times \text{१७} \times \text{५७}}{\text{१४}}$$
$$= \frac{\text{३} \times \text{९६९}}{\text{१४}}$$
$$= \frac{\text{२९०७}}{\text{१४}}$$
$$= \text{२०७ । ३८ । ३४ । १७}$$

```
१४)२९०७(२०७।३८।३४।१७
    २८          ७)९×३०      ४×६०      २×६०
    ---           -----      -----     -----
    १०७           २७०        २४०       १२०
     ९८           २१         २१          ७
     --           --         --         --
      ९×६०        ६०         ३०         ५०
     -----
  ७)९×३०          ५६         २८         ४९
    -----         --         --         --
                   ४          २          १
```

$$\frac{\text{व}}{\text{१४००}} = \frac{\text{१७}}{\text{१४००}} = \text{० । ० । ४३ । ४३}$$

```
          १४००) १७ (० । ० । ४३ । ४३
                ×६०
               -----
           ७०)१७×३
              -----
              ५१×६०                        ५×६
              ------                       ----
            ७)३०६                           ३००
              २८                            २८
              --                            --
               २६                            २०
               २१                            २१
               --                            --
                ५                            —१
```

शनिध्रुवः = (२०७।३८।३४।१७) (अंशादिः) + (०।०।४३।४३)(

+

= (२०७।३९।१८।०) + ६९

अं क वि प्रवि

= २७६।३९।१८।०

अत्र गणितेन शनिध्रुवोंऽशादिः २७६ । ३९ । १८ आगच्छति, त
तु २७६ । ४० । १९ । ४० इति लिखति । अत्र १ । १ । ४० कला
अन्तरं जातम् ।

एते गणितागता ग्रहाः सर्वे सङ्क्रान्तिकालिकाः ।

	चं	च उ	च पा	मं	बु शी	बृ	शु शी	श
७	२५५	२४७	९५	६२	१९८	१३४	१९९	२७६
१	१३	५६	५९	५०	२७	५८	५१	४०
८	३३	५४	१८	३६	२०	०	१९	२०
	३०	५६	५४					

तेषां सूर्योदयकालिककरणार्थम् अजादिघटच इत्यादिपूर्वोक्तरीत्या तं बीजम् ।

	चं	उ	पा	मं	बु शी	बृ	शु शी	श
३	३१४	२	१	१२	९७	१	३८	०
३	५४	३९	१६	३१	४८	५९	१७	४७
			ध					

घट्यादिबीजैः संस्कारिता गणितागता ग्रहा मेषार्कदिने स्वदेशज-यकालिका ग्रहा भवन्ति । सूर्यः ३५७।५१।५८ बीजेन २३।३३ : ३५७।२८।२५ सूर्योदयकालिकः सूर्यस्य ध्रुवको जातः । एवं बीजसंस्कारिता यथा ।

	चं	उ	पा	मं	बु शी	बृ	शु शी	श
७	२४९	२४७	९६	६२	१९६	१३४	१९९	२७६
२८	५८	५४	०	३८	४९	५६	१३	३९
२५	३९	१६	३५	५	३२	१	२	३३

अथाऽहर्गणादागतग्रहेषु क्षेपकार्थं देशान्तरमात्रसंस्कृतमेषार्क-तः सार्धितं बीजम् ।

	चं	उ	पा	मं	बु शी	बृ	शु शी	श
२	३०५	२	१	१२	९५	१	३७	०
३	५४	३५	१४	१०	०	५६	१२	४६
			ध					

तेन संस्कारिता गणितागता ग्रहाः क्षेपकार्थं यथा ।

सू	चं	उ	पा	मं	बु शी	बृ	शु शी	श
३५७	२५०	२४७	९६	६२	१९६	१३४	१९९	२७६
२९	७	५४	०	३८	५२	५६	१४	३९
५	३९	२०	३३	२६	०	४	५	३४

समाप्तोऽयं ग्रहध्रुवाधिकारः ।

अथ रत्नदीपे पञ्चाङ्गाधिकारः

गताब्दयुक्ता गजनन्दसूर्याः १२९८
स्वदिग्१०लवोना विहृताः खतर्कैः ६० ।
स्युस्तेऽयनांशाः

श्रीगुरुगणेशाभ्यान्नमः ॥
अथ स्पष्टाधिकारो व्याख्यायते ।

यात्राविवाहोत्सवजातकादौ
खेटैः स्फुटैरेव फलस्फुटत्वम् ।
स्यात् प्रोच्यते तेन नभश्चराणां
स्फुटक्रिया दृग्गणितैक्यकृद् या ॥१॥
(सिद्धान्तशिरोमणौ, स्पष्टाधिकारे)

इति भास्करीयात् ।

अत्रादौ चरस्याऽज्ञानात् स्फुटमेषार्कस्याऽप्यज्ञानम् । अस्याऽज्ञाने ग्रहा औदयिकाः कर्त्तुमशक्याः । अतश्चरस्योपजीव्याऽयनांशसाधनमाह । गताब्दयुक्ता इति । ग्रंन्थारम्भकालाद् गतवर्षास्तैर्योजिता गजनन्दसूर्या अष्टनवत्यधिकद्वादशशतानि स्वदिग्लवोनाः स्वकीयदशमभागेनोनिताः खतर्कैः षष्टचा विहृता भक्ताः ते अयनांशाः क्रान्तिपातस्यांशाः स्युः भवेयुरिति ।

अत्रोपपत्तिः । इष्टदिनार्द्धे तुरीयाऽदियन्त्रवेधेन सावयवान् उन्नतांशान् प्रसाध्य ते नवतितः शोध्या नतांशा भवन्ति । ततो

नताक्षयोरन्तरगोऽपमोऽस्माद् विलोमतः सायनभानुबाहुः ॥२३॥

इति त्रिप्रश्नोक्तरीत्या सायनभुजरूपः सूर्यः साध्यः । तात्कालिकगणितागतस्पष्टार्कस्यापि भुजः कार्यः । उभयोरन्तरम् अयनांशा

भवति । यदि गणितागताच्छायार्कोऽधिकस्तदा ते धनाख्या यदा ऊनास्तदा ऋणाख्या एव । उक्तं च भगवता ।

> प्राक् चक्रं चलितं हीने छायार्कात् करणागते ।।११।।
> अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाऽधिके । इति ।

(सूर्यसिद्धान्ते, त्रिप्रश्नाधिकारे)

अथाङ्कवासना । अष्टादशशतवर्षेषु लम्बस्य एकपदभोगः । तत्रायनांशानां २७ परमत्वम् । कलियुगारम्भे लम्बस्य भगणा एव २७१६५० तत्रायनांशाभावः ।* अष्टादशशतवर्षेषु राशित्रयम् अयनांशाः सप्तविंशतिः । षट्त्रिंशच्छतवर्षेषु राशिषट्कं तस्य भुजे कृतेंऽशाद्यभावाद् अयनांशाभावः । तत्र चक्रं प्रत्तीच्यां चलितम् । कलेश्चतुःपञ्चाशच्छतवर्षेषु नव राशयः अयनांशाः सप्तविंशतिः । द्वासप्ततिशतवर्षेषु द्वादश राशयः अयनांशाभावः । तत्र चक्रं प्राच्यां चलितं वर्त्तते । मध्येऽनुपातात् साध्यम् ।

---

* अत्र गणितम् ।

> त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते ।।९।।

(सूर्यसिद्धान्ते, त्रिप्रश्नाधिकारे)

एकस्मिन् युगे लम्बस्य भगणाः = ६००

सृष्टितो कल्यादौ यावद् व्यतीतानि वर्षाणि = १९५५८८००००

(ग्रहध्रुवाधिकारस्य ३ श्लोकस्य गणितं द्रष्टव्यम्)

$$\frac{६०० \times १९५५८८००००}{४३२००००} = \frac{१९५५८८००}{७२}$$

$$= \frac{२१७३२००}{८}$$

$$= २७१६५०$$

अथ ग्रन्थारम्भसमये कलिगताब्दा नागाङ्काष्टयुगमिताः ४८९८ षट्त्रिंशच्छतोनिताः १२९८ अष्टनवत्युत्तरद्वादशशतानि । अतो गताब्दयुक्ता गजनन्दसूर्या इत्युक्तम् । उक्तरीत्या वर्षे चतुःपञ्चाशत् पलानि तस्य वृद्धिः ।* दशमांशहीना षष्टिश्चतुःपञ्चाशद् भवति । अतः स्वदिगंशहीना इत्युक्तम् । अन्यथा वर्षे एककलावृद्धिः स्यात् । ननु मुञ्जालादिभिराचार्यैरुक्तैककलावर्षवृद्धित्यागे किं मानम् । तच्च शिरोमणौ (गोलबन्धाधिकारे) ।

अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम् ।
तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः १९९६६९ ॥१८॥

तेन एकोनषष्टिपलानि चतुःपञ्चाशदक्षराणि ५९।५४।२ वर्षवृद्धिः ।** न च सूर्यसिद्धान्तविरोधात् तदुपेक्ष्यमिति वाच्यम् ।

---

* यदि १८०० वर्षैर् २७ अंशास् तदैकेन वर्षेण किम् इत्यनुपातः क्रियते ।

$\frac{२७}{१८००} = \frac{३}{२००} =$ ५४ विकलाः

```
           अं  क  वि
२००)   ३ (० । ० । ५४
       ×६०
१०) ३×३
      ९×६०
 १) ९×६
      ५४
```

** अत्र गणितम् ।

एकस्मिन् कल्पे सौरवर्षाणि = ४३२०००००००

कल्पेऽयनभगणाः = १९९६६९

तत्र माधवः ।

विंशत्कृत्वो युगे भानां चक्रं प्राक् परिलम्बते ।
तद्गुणाद् भूदिनैर्भक्ताद् द्युगणाद् यदवाप्यते ।।
तत्संस्कृताद् ग्रहात् क्रान्तिच्छायाचरदलादिकम् ।

इति भगवतो वाक्यम् अस्यार्थः । युग इति एकस्मिन् चतुर्युगे दशभक्तशेषे ४३२००० विंशत्कृत्वो विंशतिवारान् विंशतिभगणान् प्रागपरलम्बनसहितभानां चक्रं ग्रहवत् प्राक्परं लम्बते । एतावता भगणदशकं भचक्रस्य प्राग्लम्बनं स्यादेव । एवं कलियुगे भगणा विंशतिः द्वापरे चत्वारिंशत् त्रेतायां षष्टिः सत्ये अशीतिः ८० । एकत्राङ्के चतुर्युगे शतद्वयम् २०० । एवं भगणशतद्वयेन सावनकल्पाहर्गणाद् व्यावहारिकयुगाहर्गणाद् वा गुणिताच्चतुर्युगभूदिनैर्भक्ताद् यदवाप्यते

```
                   वि  प्रवि  प्रप्रवि
  १९९६६९
 ----------- =     ५९ । ५४ । २
 ४३२००००००००
```

```
                               भ  रा  अं  क   वि   प्रवि  प्रप्रवि
४३२००००००००)१९९६६९(० । ० । ० । ० । ५९ । ५४ । २
              ×१२                         ९००७×६०
          -------------                   ---------
 ३६००००००००)१९९६६९×३०               ५००)९००७×३
          -------------                   --------
  १२००००००)१९९६६९×६०                    २७०२१
          -------------                   २५००
    २०००००)१९९६६९×६०                     -----
          -------------                    २०२१
     १००००)१९९६६९×३                        २०००
          -------------                     -----
           ५९९००७                            २१×६०
           ५९००००                          --------
          --------                      २५)२१×३
            ९००७                           --------
                                            ६३
                                            ५०
                                           ----
                                            १३
```

तदयनचलनमित्यर्थः। एवं प्रतिवर्षमेका लिप्ता।* षष्टिवर्षैर्भाग एकः। अष्टादशशतवर्षैरेको राशिः। षट्शताधिकैकविंशतिवर्षसहस्रै २१६०० भंगण एकः। चतुर्युगाब्दैरेभि ४३२०००० भंगणशतद्वयमुत्पद्यते। तेन साधनाऽहंगणं संगुण्य भूदिनैर्विभज्य ग्रहवल्लब्धं भचक्रस्य लम्बनं भगणादिकं ये भागास्ते वाऽयनांशाः। एतावता सूर्यसिद्धान्ते त्रिशदंशावधि चलनांशा जायन्ते इति।

मल्लारिस्तु येषां मते वर्षे एककलावृद्धिः तेषां मते चतुर्विंशतिभागपर्यन्तमयनवृद्धिरिति।**

एतत् सर्वमार्षविरुद्धम्। तथा च भगवद्वाक्यम्।

त्रिशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते।

---

* अत्र गणितम्।

कलियुगे सौरवर्षाणि = ४३२०००

कलियुगेऽयनभगणाः = २०

$$\frac{२०}{४३२०००} = \frac{१}{२१६००} = १ \text{ कला}$$

```
                 भ  रा  अं  क
२१६००)  १ (० । ० । ० । १
          ×१२
१८००) १×३०
  ६०) १×६०
    १)१
```

** अत्र मल्लारिः —

यस्मिन् पक्षे कलोपचयस्तस्मिन् पक्षे चतुर्विंशत्यंशाः परमाऽयनचलांशाः।

(१९८१ मिते वैक्रमाब्दे मुम्बय्यां वेङ्कटेश्वरमुद्रणालयेन प्रकाशितस्य सुधाकरद्विवेदिना सम्पादितस्य मल्लारि–विश्वनाथ–सुधाकरद्विवेदीविरचितटीकात्रयोपेतस्य ग्रहलाघवस्य ८२ पृष्ठात्।)

तद्गुणाद् भूदिनैर्भक्ताद् द्युगणाद् यदवाप्यते ।।९।।
तद्दोस्त्रि३घ्ना दशा१०प्तांशा विज्ञेया अयनाभिधाः ।

(सूर्यसिद्धान्ते, त्रिप्रश्नाधिकारे)

महायुगे राशिचक्रं त्रिंशत्कृत्यः त्रिंशद्गुणिताः कृत्यः विंशतिः षट्शतमित्यर्थः । स्पष्टमुक्तं सोमसिद्धान्ते ।

युगे षट्शतकृत्वो हि भचक्रं परिलम्बते ।* इति ।

शिवसिद्धान्तेऽपि ।

षट्शतं हि भचक्रं प्राग् लम्बते क्रान्तिपाततः । इति ।**

विशेषः सिद्धान्ततत्त्वविवेके (स्पष्टाधिकारे) ।

नाडीभवृत्तयोर्यत्र संपातः पात एव सः ।
चलांशसिद्ध्यै सौरोक्ता ज्ञेयास्तद्भगणा बुधैः ।।४५४।।
सृष्टयाद्यकाले किल मेषवक्त्रं
पूर्वं तु नाडीवलयस्थितं हि ।
ततश्च सप्ताश्वि२७लवैश्चलांशै-
र्भमण्डलं पश्चिमतोऽथ गत्वा ।।४५५।।
ततः परावर्त्य च तैस्तु भागै-
र्यथास्थितं मेषमुखं ततश्च ।

---

* गूढार्थप्रकाशे रङ्गनाथः —

युगे षट्शत६००कृत्वो हि भचक्रं प्राग् विलम्बते ।
इति सोमसिद्धान्तविरोधात् ।

(१९२८ मिते वैक्रमाब्दे कलकत्तायां भुवनचन्द्रबासकेन प्रकाशितस्य गूढार्थप्रकाशेन सहितस्य सूर्यसिद्धान्तस्य ११२ पृष्ठात् ।)

** अयम् एव श्लोको लक्ष्मीपतिना स्वसङ्ग्रहे स्थितस्य हस्तलिखितस्य गूढार्थप्रकाशस्य ६० पृष्ठेऽपि लिखितो वर्तते ।

तैरेव तच्चेन्द्रदिशीह भूत्वा
ततः परावर्त्यं लवैस्तु तैश्च ।।४५६।।
यथास्थितं मेषमुखं पुनश्च
स्वाकारतः स्वापमवृत्तगत्या ।
इत्थं हि देवैर्मुनिभिः स्वतन्त्रै-
रुदीरितं स्वीयकृतो यथार्थम् ।।४५७।।
चतुःप्रकारावगतोऽयमेको
ऽयनांशकानां भगणोऽथ ते च ।
युगे खखाङ्क ६०० प्रमिताः सहस्र१०००
घ्नास्ते भवेयुर्भगणाश्च कल्पे ।।४५८।।
सृष्टयादितो गताब्दा ये खखयुग्माद्रि७२००भाजिताः ।
भगणाद्यं फलं यत् स्याद् वर्षादौ सोऽयनग्रहः ।।४५९।।
भगणानां परित्यागाद् राश्याद्यस्य भुजांशकाः ।
ते तु त्रि३घ्ना दशा१०प्ताश्च विज्ञेया अयनांशकाः ।।४६०।।
चलांशकाश्च ते स्वर्णं तुलाजादिगते क्रमात् ।
अयनांशा ग्रहे ज्ञेयास्तत्संस्कारवशाच्च सः ।।४६१।।
चलाख्यखेटोऽयनखेचरश्च
ज्ञेयस्ततः क्रान्तिचरोदयाद्यम् ।
साध्यं तु संपातत एव तेषां
स्वरूपसिद्धया गणितावबोधात् ।।४६२।।
अन्येषामतथात्वेन संपातान्मेषवक्त्रतः ।
अदृष्टफलसिद्धयर्थं साधनं न कथञ्चन ।।४६३।।
चलार्कसंक्रमे पुण्यं कथमुक्तमिदं किल ।
नाशङ्कनीयं बिदुषा तदुक्तेरर्थवादतः ।।४६४।।
अर्काद्युक्तमबुद्ध्वैव तद्विरोधाच्छिरोमणौ ।
मुञ्जालोक्ताऽयनांशा ये प्रोक्तास्त्याज्या बुधैस्तु ते ।।४६५।।
कश्चित् परं तच्चलनं जिनां२४शैः
स्वीकृत्य तस्याऽप्ययनग्रहस्य ।

क्रान्त्यंशतुल्यानयनांशकांश्च
मन्दः सदैवाह न तन्मतं सत् ।।४६६।।
यतस्त्रिभागे चलने परस्य २४
तदुक्तरीत्या तु जिनज्यकार्द्धात् ।
चापं चलांशाश्चलने तथार्द्धे १२
जिनज्यकावर्गदलस्य मूलात् ।।४६७।।
चापं चलांशास्त्वयमग्रहोत्थ-
क्रान्त्यंशका एव तदुक्तरीत्या ।
भचक्रपूर्वापरदिग्भ्रमाद् यत्
सिद्धं न तत् किं गणितं फलार्थम् ।।४६८।। इति भद्रम् ।

अत्रोदाहरणम् । गताब्दाः १७ गजनन्दसूर्याः १२९८ तैर्युक्ताः १३१५ स्वस्य १३१५ दशमभागेन १३१।३० ऊनाः षष्ट्या ६० भक्ता लब्धा अयनांशाः १९।४३।३० इति ।*

---

* अत्र गणितम् ।

वर्षगणः = १७

$$\text{अयनांशाः} = \frac{(\text{व} + १२९८) - \frac{१}{१०}\,\text{स्व}}{६०}$$

$$= \frac{(१७+१२९८) \times \frac{९}{१०}}{६०}$$

$$= \frac{१३१५ \times ९}{६० \times १०}$$

$$= \frac{२६३ \times ३}{२० \times २}$$

$$= \frac{७८९}{४०}$$

अं क वि

= १९ । ४३ । ३०

पलभा भवेत् सा-
ऽयनाजसङ्क्रान्तिदिनार्द्धजा भा ॥१॥

अथ विषुवच्छायासाधनमाह । पलभेति । सायनः अयनांशसहितश्चासौ अजः तस्य सङ्क्रान्तिः मेषसङ्क्रान्तिः तस्य दिनस्य अर्द्धे जा जाता या भा छाया सा पलभा भवेत् । सायनसूर्यस्य मेषादिराशिभागकलादिशून्यदिने मध्याह्ने समभुवि द्वादशाङ्गुलशङ्कुः निवेश्यः । तस्य दक्षिणोत्तरा या छाया सा पलभा अक्षभा च । सा यावदङ्गुला तावदङ्गुला पलभा ज्ञेया इति । शङ्कुलक्षणं शिरोमणौ (यन्त्राधिकारे)।

समतलमस्तकपरिधिर्भ्रमसिद्धो दन्तिदन्तजः शङ्कुः ।
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम् ॥६॥ इति

ब्रह्मगुप्तः ।

मूले द्व्य२ङ्गुलविपुलः सूच्यग्रो द्वादशा१२ङ्गुलोच्छ्रायः ।
शङ्कुस्तलाग्रविद्धोऽग्रवेधलम्बादृजुर्ज्ञेयः ॥३६॥ इति ।
(ब्राह्मस्फुटसिद्धान्ते, यन्त्राधिकारे)

अत्र व्यवस्था तातचरणकृता यथा ।

दिङ्निर्णये द्व्य२ङ्गुलकर्णमूलः
सूचीमुखः शङ्कुरिना१२ङ्गुलः स्यात् ।
समाग्रमूलः किल कालनिर्णये
प्रोक्तोऽर्कतन्त्रागमहेतुविद्भिः ॥ इति ।

---

४०)७८९(१९।४३।३०
४०
३८९
३६०
२९×६०
२)२९×३

२)२९×३
८७
८६
१×६०
१)३०

अत्रोपपत्तिः । सायनसूर्यो यद्दिने मेषादौ तुलादौ वा तद्दिने सूर्यस्य नाडिकामण्डले स्थितिः । नाडिकामण्डलं निरक्षे पूर्वापरम् । अतस्तद्दिने मध्याह्ने निरक्षे शङ्कुच्छाया नास्ति सूर्यस्य खमध्यस्थितत्वात् । मध्यदेशे तु पूर्वापरं सममण्डलम् । अतस्तद्दिनेऽपि मध्याह्नेऽपि शङ्कुच्छाया भवत्येव । सैव पलभा । तस्याः पलभा विषुवद्भा उद्भा इति पर्यायाः । नेपालदेशे पलभा षडङ्गुलानि द्वादश व्यङ्गुलानि* ६।१२ ।

---

* अत्र क्षेत्रे ।



पू = पूर्वस्वस्तिकः
उ = उत्तरसमस्थानम्
ख = खस्वस्तिकः
पू द प उ = क्षितिजवृत्तम्
पू ख प = पूर्वापरवृत्तम्
ख नि चापः = अक्षांशाः

प = पश्चिमस्वस्तिकः
द = दक्षिणसमस्थानम्
नि = निरक्षखस्वस्तिकः
द नि ख उ = याम्योत्तरवृत्तम्
पू नि प = नाडीवृत्तम्
नि द चापः = लम्बांशाः

विषुवद्दिने रविर् निरक्षवृत्ते भवति । अतस् तस्मिन् दिने मध्याह्ने रविर् निरक्षखस्वस्तिके भवति । अतो विषुवद्दिने रवेर् नतांशा अक्षांशतुल्या भवति ।

पलभा खगुणै३०र्जिनैः२४ खरूपै१०
गुंणिता रामः३हृता चरार्द्धकानि ।

अथ चरखण्डसाधनमाह । पलभेति । पलभा त्रिष्ठा खगुणैस्त्रिंशता जिनैश्चतुर्विंशत्या खरूपैर्दशभिर्गुणिता रामहृता त्रिभिर्भक्ता चरा-

---



क्षि ति = क्षितिजधरातलम्
क्षि सू ख ति = याम्योत्तरवृत्तम्
सू = सूर्यबिम्बः (निरक्षखस्वस्तिकस्थः)
ख = खस्वस्तिकः
श छा = द्वादशाङ्गुलशङ्कुः
छा या = तस्य शङ्कोश् छाया
ख सू चापः = नतांशाः
सू क्षि चापः = उन्नतांशाः

विषुवद्दिने मध्याह्ने रवेर् नतांशा अक्षांशतुल्या भवन्तीति पूर्वम् एव कथितम् । अस्मिँश् चित्रे सूर्यो मध्याह्ने खमध्याद् दक्षिणतोऽक्षांशतुल्यैर् नतांशैर् नतो वर्तते । तश्मिन् काले सूर्यस्य तेजसा जायमाना श छा द्वादशाङ्गुलशङ्कोश् छाया छा या पलभासंज्ञां लभते ।

र्द्धकानि चरदलपलानि त्रिखण्डात्मकानि स्युः। दलम् इति तु यावद्गोलसिद्धं सर्वमर्द्धस्वरूपम्। उक्तं च शिरोमणौ (स्पष्टाधिकारे)

अर्द्धज्याग्रे खेचरो मध्यसूत्रात्
तिर्यक्संस्थो जायते येन तेन।
अर्द्धज्याभिः सर्वकर्म ग्रहाणा-
मर्द्धज्यैव ज्याभिधानाऽत्र वेद्या ॥२॥ इति

अत्रोपपत्तिः। एकाङ्गुलपलभां प्रकल्प्य एक–द्वि–त्रि–राशीनां पृथक् क्रान्तिज्या साध्या।*

---

* क्रान्तिज्यासाधनरीतेर् उपपत्तिं कमलाकर आह।

गोले चापक्षेत्रजाता सुयुक्तिः
क्रान्तिक्षेत्रोक्तप्रकारस्य रीत्या।
तावत् तेनाऽसंशयं क्रान्तिजात-
सूक्ष्मक्षेत्रादुत्थितां तां वदामि ॥५५॥

यत् स्यान्नाडीक्रान्तिवृत्तैक्यचिह्न-
मूर्ध्वं कृत्वा गोलमध्यं प्रकल्प्य।
तद्गोलस्याधःस्थितं यच्च खण्डं
छित्त्वा त्यक्त्वा चोर्ध्वखण्डं समायाम् ॥५६॥

भूमौ स्थाप्यं येन तच्चाऽयनाख्यं
भूमिष्ठं स्याद् वृत्तमस्याऽस्ति केन्द्रम्।
तत् स्यादाद्यं भूस्थितं यत् ततोऽस्ति
मध्यं यावत् तूर्ध्वगं मध्यसूत्रम् ॥५७॥

याम्योत्तरौ स्वाऽयनवृत्तलग्नौ
ध्रुवौ तयोर्मध्यविलग्नवृत्तम्।
याम्योत्तरं प्रागपरं च नाड्या-
ह्वयं भवृत्तं किल तत्र तिर्यक् ॥५८॥

मध्याद् भवृत्ते खचरावधि स्यु-
र्भुजांशकाः कोटिलवाः कृतश्च ।
मध्याच्च गोलाङ्घ्रिसमानि तानि
दृश्यानि वृत्तानि भवन्ति यावत् ॥५९॥

खेटोपरिस्थं ध्रुवयोर्विलग्नं
तदिष्टसंज्ञं त्वथ तद्ध्रुवाच्च ।
द्युज्यांशकैर्यत् खचरावधि स्यात्
वृत्तं खगस्य द्युनिशाभिधं तत् ॥६०॥

तथैव मध्याद् भुजभागकैश्च
वृत्तं कृतं तत् तु भुजांशवृत्तम् ।
नाड्याह्वयाच्चोभयतस्तदिष्ट-
वृत्तैक्ययुग्मं तु समान्तरेऽस्ति ॥६१॥

तदैक्यबद्धं किल यच्च तत् स्यात्
पूर्णज्यका सूत्रमथाद्यकेन्द्रात् ।
तन्मध्यसूत्रे खगकोटिजीवा-
न्तरे द्वितीयं किल केन्द्रमूह्यम् ॥६२॥

तत्केन्द्रतः क्रान्तिवृतौ खगेन्द्रं
यावद् भुजज्या विषुवेऽपि वृत्तो ।
भुजांशवृत्तावधि सैव दोर्ज्या
तद्वृत्तमध्यस्थितसूत्ररूपा ॥६३॥

नाड्याह्वये तद्विषुवांशचिह्नं
यत्रेष्टवृत्तं युतमाद्यकेन्द्रात् ।
तच्चिह्नगं त्विष्टवृतिस्थमध्य-
सूत्रं तयोर्योग इहाऽस्त्ववश्यम् ॥६४॥

पूर्णज्यकासूत्रदलेऽथ तेन
सैवेष्टवृत्तो च भुजोत्थवृत्तो ।
क्रान्त्यंशकानामथ तद्गतानां
ज्या खेटनाडीवलयान्तरे स्यात् ।।६५।।

आद्यकेन्द्राच्च तद्योगावधि द्युज्या, ग्रहावधि ।
त्रिज्या तौ कोटिकर्णौ स्तो बाहुः क्रान्तिज्यका तयोः ।।६६।।

आद्यकेन्द्रात् तथा भूमौ सूत्रे नाडीभवृत्तगे ।
तयोरायनवृत्तेऽन्तः परक्रान्त्यंशकाः किल ।।६७।।

तेषां ज्या नाडिकासूत्रात् तिर्यक्स्था भूभवृत्तगा ।
आद्यकेन्द्रात् तथा कार्यं भुजजीवोत्थमण्डलम् ।।६८।।

त्रिज्याकर्णे परक्रान्तिज्यका दोर्ज्याश्रुतौ च का ।
अनुपाताद् भुजज्योत्थवृतौ दोर्ज्याऽपमज्यका ।।६९।।

चलांशसंस्कृतात् खेटाद् दोर्ज्योत्कृष्टाऽपमज्यया ।
गुणिता त्रिगुणाप्ता स्याच्चापमिष्टापमस्ततः ।।७०।।

चलसंस्कृतखेटस्य गोलदिक् स भवेदिह ।
अतो ज्ञेया परक्रान्तिर्विलोमगणिताद् बुधैः ।।७१।।

अथ याम्योत्तरे सूत्रेऽपमज्यां चाद्यकेन्द्रतः ।
दत्त्वा केन्द्रमहोरात्रवृत्तस्याऽत्र प्रकल्पयेत् ।।७२।।

(सिद्धान्ततत्त्वविवेके, त्रिप्रश्नाधिकारे)



ध्रु = उत्तरध्रुवस्थानम्
व = दक्षिणध्रुवस्थानम्
गो वृ सं षु वि = नाडीवृत्तम्
गो त सं क्रा ग्र = क्रान्तिवृत्तम्
गो, सं बिन्दू = नाडीवृत्तक्रान्तिवृत्तयोः सम्पातौ = गोलसन्धी
ध्रु क्रा षु व त वृ = अयनप्रोतवृत्तम्
ग्र = क्रान्तिवृत्तस्थो ग्रहः
ध्रु ग्र वि व = ध्रुवप्रोतवृत्तम्

नाडीवृत्तस्योपरि ध्रुवप्रोतवृत्तं लम्बरूपं भवति । अतः गो वि ग्र कोणः समकोणो भवति, गो वि ग्र चापक्षेत्रं चापजात्यसंज्ञां प्राप्नोति । अस्मिंश् चाप-

जात्ये गो ग्र चापः कर्णसंज्ञां, गो वि, वि ग्र चापयोर् मध्ये एकतरः कोटिसंज्ञाम् अन्यतरश् च भुजसंज्ञां प्राप्नोति । नाडीवृत्त–क्रान्तिवृत्त–ध्रुवप्रोतवृत्तस्थैश् चापैर् जायमानम् इदं चापजात्यं क्रान्तिक्षेत्रम् इति कथ्यते । अस्मिन् क्रान्तिक्षेत्रे क्रान्तिवृत्तस्थः गो ग्र चापः भुजांशाः, नाडीवृत्तस्थः गो वि चापः विषुवांशास् तथा ध्रुवप्रोतवृत्तस्थः वि ग्र चापः क्रान्त्यंशा इति संज्ञा लभन्ते ।



ध्रु = उत्तरध्रुवः
व = दक्षिणध्रुवः
ग्र = ग्रहः
ना भु गो = नाडीवृत्तस्य चतुर्थोऽशः
गो = गोलसन्धिः (अत्र खस्वस्तिक इव कल्पितः)
क्रा ग्र गो = क्रान्तिवृत्तस्य चतुर्थोंऽशः
ना ध्रु व = अयनप्रोतवृत्तम् (अत्र क्षितिजवृत्तम् इव कल्पितम्)
ध्रु ग्र वि ज व = ग्रहोपरिगतं ध्रुवप्रोतवृत्तम् (इष्टवृत्तम्, अस्य वृत्तस्याऽत्र अर्धम् एव दर्शितम्)
ध्रु ल हो गो र व = ध्रुवौ गोलसन्धिं च गच्छद् याम्योत्तराकारम् अर्धवृत्तम्

भु ग्र ल र ज = गोलसन्धि पृष्ठकेन्द्रं प्रकल्प्य भुजांशचापैः कृतं भुजांशवृत्ताख्यं लघुवृत्तम्

त द थ = भूकेन्द्रं केन्द्रं प्रकल्प्य भुजांशज्यातुल्यया त्रिज्यया कृतं भुजांशवृत्तस्य समानान्तरं वृत्तम् ।

अ ग्र हो = ग्रहोपरिगतस्याऽहोरात्रवृत्तस्य चतुर्थांशः

गो ल चापः = गो ग्र चापः = गो भु चापः = गो र चापः = भुजांशाः

गो वि चापः = विषुवांशाः

ग्र वि चापः = क्रान्त्यंशाः



व ना अ क्रा ध्रु = अयनप्रोतवृत्तस्यार्धम् भू = भूकेन्द्रम् (भाबकेन्द्रम्)

द थ ह त = भूकेन्द्रं केन्द्रं प्रकल्प्य भुजांशज्यातुल्यया त्रिज्यया कृतं भुजांशवृत्तस्य समानान्तरम् अर्धवृत्तम्

च अ = द्युज्या

ह फ = क्रान्तिज्या

भू प = परमाल्पद्युज्या

क्रा प = परमक्रान्तिज्या

भू ह = भुजांशज्या

भू क्रा = त्रिज्या

क्रा ना चापः = परमक्रान्त्यंशाः

अत्र भू क्रा प, भू ह फ त्रिभुजे सजातीये स्तः । अतः

$$\text{ह फ} = \frac{\text{क्रा प} \times \text{भू ह}}{\text{भू क्रा}}$$

सा क्रान्तिज्या विषुवद्भाघ्नी द्वादशोद्धृता क्षितिज्या भवति ।*

अर्थात्

$$\text{क्रान्तिज्या} = \frac{\text{परमक्रान्तिज्या} \times \text{भुजांशज्या}}{\text{त्रिज्या}}$$

इत्युपपन्नम् ।

(इमानि क्षेत्राणि त्रिभुवनविश्वविद्यालये ज्यौतिषाचार्यपरीक्षार्थम् अधीयानैर् विद्यार्थिभिर् मङ्गलदासप्रधानाङ्ग–सम्वराजाचार्य–मेघनाथाचार्यैः सम्पादितस्य २०२४ मितेवै क्रमाब्दे त्रिभुवनविश्वविद्यालयेन प्रकाशितस्य संक्षिप्त गोलविमर्श तथा हिन्दू गणितको उत्कर्ष नामकस्य पुस्तकस्य २२, ३५, ४० पृष्ठेभ्य उद्धृतानि ।)

* क्षितिज्यासाधनरीतेर् उपपत्तिः ।

अस्यैव ग्रन्थस्य १४ पृष्ठस्थं क्षेत्रं द्रष्टव्यम् । तत्र भू ध्रु ल, भू ज श जात्यत्रिभुजे सजातीये स्तः । अतः

$$\text{श ज} = \frac{\text{ध्रु ल} \times \text{भू श}}{\text{भू ल}}$$

अर्थात्

$$\text{कुज्या} = \frac{\text{अक्षज्या} \times \text{क्रान्तिज्या}}{\text{लम्बज्या}}$$

पुनर् अस्यैव ग्रन्थस्य १५९ पृष्ठस्थं क्षेत्रं द्रष्टव्यम् । तत्र श या छा जात्यत्रिभुजे सू या क्षि कोणः सू क्षि चापतुल्यो वर्तते । सू क्षि चापस् तु लम्बांशतुल्यो वर्तते । अतः या श छा कोणोऽक्षांशतुल्यो भवति । अतः श या छा जात्यत्रिभुजम् अक्षक्षेत्रसंज्ञां लभते । अतः

$$\frac{\text{अक्षज्या}}{\text{लम्बज्या}} = \frac{\text{पलभा}}{१२}$$

इति सिद्ध्यति । अतः

$$\text{क्षितिज्या} = \frac{\text{पलभा} \times \text{क्रान्तिज्या}}{१२}$$

इत्युपपन्नम् ।

सा त्रिज्यागुणा द्युज्याभक्ता चरज्या भवति ।* चरज्याया चापकलाश्चरासवो भवन्ति । ते षड्भिर्विभक्ताः पलात्मकानि । तानि अधो:धशोधितानि

---

* चरसाधनरीतेर् उपपत्तिः ।



पू द प रा उ अ = क्षितिजवृत्तम्
द नि हो ध्रु उ = याम्योत्तरवृत्तम्
पू नि प = नाडीवृत्तम्
अ हो रा = अहोरात्रवृत्तम्
प ध्रु कु पू = उन्मण्डलम्
ध्रु अ च = अहोरात्रवृत्तक्षितिजवृत्तयोः सम्पातोपरिगतस्य ध्रुवप्रोतवृत्तस्य चतुर्थोऽशः
अ कु = कुज्याचापः
पू च = चरचापः

अस्य क्षेत्रस्य दर्शनेन कुज्याचापोऽहोरात्रवृत्ते भवति चरचापस् तु नाडीवृत्ते भवति, तथा ते वृत्ते समानान्तरे भवत इति च स्फुटीभवति ।



के = केन्द्रम्

अ हो रा = अहोरात्रवृत्तम्

ना डो वृ = नाडीवृत्तम्

के रा = द्युज्या

के वृ = त्रिज्या

अ रा चापः = कुज्याचापः

ना वृ चापः = चरचापः

कु रा = कुज्या

च वृ = चरज्या

अत्र के रा कु, के वृ च जात्यत्रिभुजे सजातीये स्तः । अतः

$$\text{च वृ} = \frac{\text{रा कु} \times \text{के वृ}}{\text{के रा}}$$

अर्थात्

$$\text{चरज्या} = \frac{\text{कुज्या} \times \text{त्रिज्या}}{\text{द्युज्या}}$$

इत्युपपन्नम् ।

दशनागसत्र्यंशगुणा भवन्ति । अत्राचार्येण त्रिभिः संगुण्य स्थापितानि । अतः खगुणैरित्यादि । अतोऽनुपातः यद्येकाङ्गुलपलभया एतानि चरखण्डानि तदेष्टया किमिति । एवं चरखण्डानि स्युः ।* अतः पलभेति ।

अत्र धूलीकर्म । पलभा १ एकराशिज्या १७१९ क्रान्तिज्या ६९८।३० द्युज्या ३३६६।१७ क्षितिज्या ५८।१२ चरं प्राणात्मकम् ५९।२६ । द्विराशिज्या २९७७ क्रान्तिज्या १२०९।४१ द्युज्या ३२१८।९ क्षितिज्या १००।४८ चरम् १०७।४१ । राशित्रयस्य ज्या ३४३८ क्रान्तिज्या १३९७ द्युज्या ३१४१।२२ क्षितिज्या ११६।२५ चरम् १२७।२४ । अधोधःशोधितानि ५९।२६ ४८।१५ १९।४३ । एतानि षडुद्धृतानि पलात्मकानि चरखण्डानि ९।५४ ८।२ ३।१७ । स्वल्पान्तरत्वादत्र दशनागसत्र्यंशगुणरूपाणि स्वीकृतानि ।** अथ तच्चरं षड्गुणं प्राणात्मकम् ।

---

* सिद्धान्तशिरोमणौ स्पष्टाधिकारे ४७-५१ श्लोकेषु भास्करोक्तोऽयं भावः ।

** अत्र गणितम् ।

एकराशेर् भुजज्या = १७१९

$$\text{क्रान्तिज्या} = \frac{\text{भुजज्या} \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

$$\text{एकराशेर् क्रान्तिज्या} = \frac{१७१९ \times १३९७}{३४३८}$$

$$= \frac{१३९७}{२}$$

$$= ६९८ \,।\, ३०$$

$$\text{द्युज्या} = \sqrt{(\text{त्रिज्या})^{२} - (\text{क्रान्तिज्या})^{२}}$$

$$= \sqrt{(३४३८)^{२} - (६९८।३०)^{२}}$$

$$= \sqrt{११८१९८४४ - ४८७९०२।१५}$$

$$= \sqrt{११३३१९४१।४५}$$

$$= ३३६६।१७$$

६९८।३० = ६९८·५

६९८·५
६९८२५
१११०४
११६१
३६
४८७९०२·२५

३४३८
५४९४४
२०४९
२५६
९
११८१९८४४

११८१९८४४
—४८७९०२·२५
११३३१९४१·७५

३
३
६३
३
६६६
६
६७२६
६
६७३२२
२
६७३२४९
९
६७३२५८

११३३१९४१·७५ | ३३६६·२९
९
२३३
१८९
४४१९
३९९६
४२३४१
४०३५६
१९८५७५
१३४६४४
६३९३१००
६०५९२४१
३३३८५९

पलभा = १

क्रान्तिज्या = ६९८ । ३०

$$\text{क्षितिज्या} = \frac{\text{क्रान्तिज्या} \times \text{पलभा}}{\text{१२}}$$

$$= \frac{(\text{६९८।३०}) \times \text{१}}{\text{१२}}$$

$$= \text{५८ । १२ । ३०} = \text{५८।१२ (स्वल्पान्तरेण)}$$

$$\text{चरज्या} = \frac{\text{क्षितिज्या} \times \text{त्रिज्या}}{\text{द्युज्या}}$$

$$= \frac{(\text{५८।१२}) \times \text{३४३८}}{\text{३३६६।१७}}$$

$$= \frac{\text{२०००९१।३६}}{\text{३३६६।१७}}$$

$$= \frac{\text{१२००५४९६}}{\text{२०१९७७}}$$

$$= \text{५९ । २६}$$

$$\begin{array}{r|l}
\multicolumn{2}{l}{\text{३४३८}} \\
\times(\text{५८} & \text{१२}) \\ \hline
\text{२७५०४} & \text{४१२५६} \\
\text{१७१९०} & \\ \hline
\text{१९९४०४} & \\ \cline{2-2}
\text{६८७} & \text{३६} \\ \hline
\text{२०००९१} &
\end{array}
\qquad
\begin{array}{rr}
\multicolumn{2}{l}{\text{२०१९७७)१२००५४९६(५९।२६}} \\
\underline{\text{१००९८८५}} & \underline{\text{८८८५३} \times \text{६०}} \\
\text{१९०६६४६} & \text{५३३११८०} \\
\underline{\text{१८१७७९३}} & \underline{\text{४०३९५४}} \\
\text{८८८५३} & \text{१२९१६४०} \\
 & \underline{\text{१२११८६२}} \\
 & \text{७९७७८}
\end{array}$$

राशिद्वयस्य भुजज्या = २९७७

$$\text{क्रान्तिज्या} = \frac{\text{भुजज्या} \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

$$\text{राशिद्वयस्य क्रान्तिज्या} = \frac{\text{२९७७} \times \text{१३९७}}{\text{३४३८}}$$

$$= \frac{\text{४१५८८६९}}{\text{३४३८}}$$

$$= \text{१२०९ । ४१}$$

३४३८
५४९४४
२०४९
२५६
९
११८१९८४४

६९८।३० = ६९८·५
६९८·५
६९८२५
१११०४
११६१
३६
४८७९०२·२५

११८१९८४४
—४८७९०२·२५
११३३१९४१·७५

३
३
६३
३
६६६
६
६७२६
६
६७३२२
२
६७३२४९
९
६७३२५८

। । । ।
११३३१९४१·७५ | ३३६६·२९
९
२३३
१८९
४४१९
३९९६
४२३४१
४०३५६
१९८५७५
१३४६४४
६३९३१००
६०५९२४१
३३३८५९

पलभा = १

क्रान्तिज्या = ६९८ । ३०

$$\text{क्षितिज्या} = \frac{\text{क्रान्तिज्या} \times \text{पलभा}}{१२}$$

$$= \frac{(६९८।३०) \times १}{१२}$$

$$= ५८ । १२ । ३० \; = ५८।१२ \; (\text{स्वल्पान्तरेण})$$

$$\text{चरज्या} = \frac{\text{क्षितिज्या} \times \text{त्रिज्या}}{\text{द्युज्या}}$$

$$= \frac{(५८।१२) \times ३४३८}{३३६६।१७}$$

$$= \frac{२०००९।३६}{३३६६।१७}$$

$$= \frac{१२००५४९६}{२०१९७७}$$

$$= ५९ । २६$$

```
  ३४३८              २०१९७७)१२००५४९६(५९।२६
 ×(५८ | १२)                 १००९८८५      ८८८५३×६०
 ----------                 -------      --------
 २७५०४ | ४१२५६               १९०६६४६     ५३३११८०
१७१९०  |                    १८१७७९३      ४०३९५४
------                      -------      -------
१९९४०४ |                      ८८८५३     १२९१६४०
        ----                             १२११८६२
   ६८७ | ३६                              -------
  -----                                   ७९७७८
२०००९१
```

राशिद्वयस्य भुजज्या = २९७७

$$\text{क्रान्तिज्या} = \frac{\text{भुजज्या} \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

$$\text{राशिद्वयस्य क्रान्तिज्या} = \frac{२९७७ \times १३९७}{३४३८}$$

$$= \frac{४१५८८६९}{३४३८}$$

$$= १२०९ । ४१$$

२९७७
×१३९७
२०८३९
२६७९३
८९३१
२९७७
४१५८८६९

३४३८)४१५८८६९(१२०९।४१
३४३८
७२०८
६८७६
३३२६९
३०९४२
२३२७

२३२७×६०
५७३)२३२७०
२२९२
३५०
५७३
— २२३

$$\text{द्युज्या} = \sqrt{(\text{त्रिज्या})^{\text{२}} - (\text{क्रान्तिज्या})^{\text{२}}}$$
$$= \sqrt{(\text{३४३८})^{\text{२}} - (\text{१२०९.६८})^{\text{२}}}$$
$$= \sqrt{\text{११८१९८४४} - \text{१४६३३२५.७}}$$
$$= \sqrt{\text{१०३५६५१८.३}}$$
$$= \text{३२१८.१५}$$
$$= \text{३२१८ । ९}$$

१२०९।४१ = १२०९·६८
१९३५४२४
१४५११६
२१६८१
१४४
१४६३३२५·७०२४

११८१९८४४
—१४६३३२५·७
१०३५६५१८·३

३
३
६२
२
६४१
१
६४२८
८
६४३६१
१
६४३६२५
५
६४३६३०

१०३५६५१८·३(३२१८·१५
९
१३५
१२४
११६५
६४१
५२४१८
५१४२४
९९४३०
६४३६१
३५०६९००
३२१८१२५
२८८७७५

$$\text{क्षितिज्या} = \frac{\text{क्रान्तिज्या} \times \text{पलभा}}{\text{१२}}$$

$$= \frac{(\text{१२०९।४१}) \times \text{१}}{\text{१२}}$$

$$= \text{१००।४८ (स्वल्पान्तरेण)}$$

$$\text{चरज्या} = \frac{\text{क्षितिज्या} \times \text{त्रिज्या}}{\text{द्युज्या}}$$

$$= \frac{(\text{१००।४८}) \times \text{३४३८}}{\text{३२१८।९}}$$

$$= \frac{\text{३४६५५०।२४}}{\text{३२१८।९}}$$

$$= \frac{\text{२०७९३०२४}}{\text{१९३०८९}}$$

$$= \text{१०७।४१}$$

```
     ३४३८
×(१०० | ४८)
-----------------
३४३८०० |  २७५०४
        | १३७५२
        ----------
        | १६५०२४
        ----------
   २७५० | २४
--------
३४६५५०
```

```
१९३०८९)२०७९३०२४(१०७।४१
        १९३०८९
        -------
        १४८४१२४
        १३५१६२३
        -------
         १३२५०१×६०
         ---------
        ७९५००६०
        ७७२३५६
        -------
         २२६५००
         १९३०८९
         ------
          ३३४११
```

राशित्रयस्य ज्या — ३४३८

राशित्रयस्य क्रान्तिज्या — १३९७

द्युज्या $= \sqrt{(\text{त्रिज्या})^{२} - (\text{क्रान्तिज्या})^{२}}$

$= \sqrt{(३४३८)^{२} - (१३९७)^{२}}$

$= \sqrt{११८१९८४४ - १९५१६०९}$

$= \sqrt{९८६८२३५}$

$= ३१४१·३७$

$= ३१४१।२२$

१३९७

१९५०९

२४२१

१६९

१९५१६०९

११८१९८४४

−१९५१६०९

९८६८२३५

	९८६८२३५ | ३१४१·३७
३	
३	९
६१	८६
१	६१
६२४	२५८२
४	२४९६
६२८१	८६३५
१	६२८१
६२८२३	२३५४००
३	१८८४६९
६२८२६७	४६९३१००
७	४३९७८६९
६२८२७४	२९५२३१

क्षितिज्या $= \dfrac{\text{क्रान्तिज्या} \times \text{पलभा}}{१२}$

$= \dfrac{१३९७}{१२} = ११६।२५$

$$\text{चरज्या} = \frac{\text{क्षितिज्या} \times \text{त्रिज्या}}{\text{द्युज्या}}$$

$$= \frac{(११६।२५) \times ३४३८}{३९४१।२२}$$

$$= \frac{४००२४०।३०}{३१४१।२२}$$

$$= \frac{२४०१४४३०}{१८८४८२}$$

$$= १२७।२४$$

```
    ३४३८                    १८८४८२)२४०१४४३०(१२७।२४
   ११६ | २५                  १८८४८२            ७७२१६×६०
  ------------------        --------          -----------
  २०६२८ | ८५९५०              ५१६६२३          ४६३२९६०
  ३४३८  |                    ३७६९६४          ३७६९६४
                             --------        -----------
 ३४३८   |                    १३९६५९०          ८६३३२०
 --------                    १३१९३७४          ७५३९२८
 ३९८८०८ | ८५९५०              --------        ---------
                              ७७२१६          १०९३९२
   १४३२ | ३०
 ----------
 ४००२४०
```

अस्वात्मकं प्रथमं चरखण्डम् = ५९।२६

अस्वात्मकं द्वितीयं चरखण्डम् = (१०७।४१) — (५९।२६) = ४८।१५

अस्वात्मकं तृतीयं चरखण्डम् = (१२७।२४) — (१०७।४१) = १९।४३

$$\frac{५९।२६}{६} = ९।५४$$

$$\frac{४८।१५}{६} = ८।२$$

$$\frac{१९।४३}{६} = ३।१७$$

स्वल्पान्तरेण चरखण्डानि = १०, ८, ३।२०

एतानि त्रिभिर् गुणितानि = ३०, २४, १०

प्राणात्मकस्य बहुत्वे धनुः सम्पद्यते । तेन धनुषा स्थूलं चरं सूक्ष्मं भवति । पलात्मकस्य स्वल्पत्वाच्चापासंभवस्तज्जातानि खण्डानि ज्यारूपाणि । तज्जातं फलं चरमपि ज्यारूपमतः स्थूलतरम् । परन्त्वयमष्टाङ्गुलपलभापर्यन्तं न विशेषान्तरम् । तस्मादधिके विशेषान्तरम् । वृत्तक्षेत्रे परिधेर्नियतत्वादिति ।

अत्रोदाहृतिः । पलभा ६।१२ स्थानत्रये स्थाप्या ६।१२ ६।१२ ६।१२ । क्रमात् खगुणै ३० र्गुणिता १८६ जिनै २४ र्गुणिता १४८।४८ दिग्भि१०र्गुणिता ६२ रामै३र्हृताः । जातानि चरार्द्धखण्डानि प्रथमराशेः ६२ द्वितीयराशेः ४९।३६ तृतीयराशेः २०।४० ।* उक्तं च–

नेपालदेशे पलभा रसाङ्गुला
पञ्चांशयुक्ता ६।१२ थ चरार्द्धकानि ।
पक्षर्त्तवः ६२ शून्यधराः ५० कुपक्षाः २१
पलात्मकानीति भुजर्क्षतो विदुः ।। इति

---

* अथ गणितम् ।

$\text{पलभा} = \text{प} = ६।१२$

$$\text{पलात्मकं प्रथमं चरखण्डम्} = \frac{१० \text{प}}{३} = १० \times (६।१२) = ६२$$

$$\text{पलात्मकं द्वितीयं चरखण्डम्} = \frac{२४ \text{प}}{३} = ८ \times (६।१२) = ४९।३६$$

$$\text{पलात्मकं तृतीयं चरखण्डम्} = \frac{१० \text{प}}{३} = \frac{१० \times (६।१२)}{३} = \frac{६२}{३}$$

$$= २०।४०$$

अयनांशयुगर्कदोर्भुजानां
युतिरग्रचघ्नलवांश३०युक् चरार्द्धम् ॥२॥

अथ चरसाधनमाह । अयनांशयुगर्कदोर्भुजानामिति । अयनांशयुक्तस्य अर्कस्य दोर्भुजः कर्त्तव्यः। तत्र यद् भं राशिः तस्माज्जातानां तत्तुल्यचरखण्डानां युतिर्योगः कर्त्तव्यः । शेषमंशादि अग्रचघ्नम् एष्यखण्डेन गुणितम् । तस्य यो लवांशस्त्रिशद्भागस्तेन युग् युक्ता चरखण्डयुतिः चरार्द्धम् अभीष्टदिनजं चरपलं स्यात् ।

अत्रोपपत्तिः । निरक्षक्षितिजमण्डलस्योन्मण्डलसंज्ञा । तस्य स्वक्षितिजस्य च यावदन्तरं तावच्चरम् । तद् दक्षिणोत्तररूपं विषुवद्वृत्ताद् द्युज्यावृत्तं यावत् । तत्साधनोपायः । अत्र प्रतिराशिखण्डानि संत्यज्य भुजराशिमितयोगः कर्त्तव्यः । शेषात् त्रैराशिकम् । यदि त्रिंशता भागैरेष्यखण्डतुल्यं लभ्यते तदा शेषमितैः किमिति । अत्र क्षेत्रतः साध्यते । क्रान्तिवृत्ते सूर्यस्य भ्रमणात् क्रान्तिज्या भुजः त्रिज्या कर्णः तस्य कोटिः सैव द्युज्या । यदि द्वादशकोटौ पलभा भुजस्तदा क्रान्तिज्याकोटौ किमिति फलं क्षितिजोन्मण्डलयोर्मध्येऽहोरात्रवृत्ते ज्यारूपा कुज्या स्यात् । यदि द्युज्याव्यासार्द्धे एतावती क्षितिज्या तदा त्रिज्यावृत्ते किमिति फलं चरज्या । तद्धनुश्चरं स्यादिति । तथा च शिरोमणौ (त्रिप्रश्नवासनाधिकारे) ।

उन्मण्डलक्ष्मावलयान्तराले
द्युरात्रवृत्ते चरखण्डकालः ।
तज्ज्याऽत्र कुज्या चरशिञ्जिनी स्याद्
व्यासार्द्धवृत्ते परिणामिता सा ॥१॥

निरक्षदेशे क्षितिजाख्यवृत्त-
मुन्मण्डलं तज्जगुरन्यदेशे ।
स्वे स्वे कुजेऽर्कस्य समुद्गमोऽस्मा-
च्चरार्द्धमर्कोदययोस्तु मध्ये ॥२॥ इति

अत्रोदाहरणम् । स्पष्टार्कः ०।०।० । अयनांशाः १९।४३।३० । सायमार्कः १९।४३।३० नवत्यंशतो न्यूनत्वात् स्वयमेव भुजः १९।४३।३० । राशिभोगो नास्ति । एष्येण प्रथमखण्डेन ६२ गुणितः १२२२।५७।० त्रिंशद्भक्तः । लब्धं पलात्मकं चरम् ४०।४५।५४ इति ।*

---

* अत्र गणितम् ।

$$\begin{array}{lcr} & & \text{अं} \quad \text{क} \quad \text{वि} \\ \text{स्पष्टसूर्यः} & = & ०\,।\,०\,।\,० \\ \text{अयनांशाः} & = & (+)\,१९\,।\,४३\,।\,३० \\ \hline \text{सायनसूर्यः} & = & १९\,।\,४३\,।\,३० \end{array}$$

अतः सायनसूर्यभुजः = १९ । ४३ । ३०

$$\text{पलात्मकं चरम्} = \frac{(१९।४३।३०)\times ६२}{३०}$$

$$= \frac{(१९।४३।३०)\times ३१}{१५}$$

$$= \frac{६११।२८।३०}{१५}$$

$$= ४०।४५।५४$$

$$\begin{array}{r|r|r} \multicolumn{3}{r}{१९।४३।३०} \\ \multicolumn{3}{r}{\times ३१} \\ \hline ५८९ & १३३३ & ९३० \\ & १५ & \\ \cline{2-2} २२ & १३४८ & ३० \\ \hline ६११ & २८ & \end{array}$$

$$\begin{array}{l} १५)\,६११।२८।३०\,(४०।४५।५४ \\ ६० \\ \hline ११\times ६० + २८ \\ \hline ६८८ \\ \underline{६०} \\ ८८ \\ \underline{७५} \\ १३ \end{array} \qquad \begin{array}{l} १३\times ६० + ३० \\ \hline ८१० \\ \underline{७५} \\ ६० \\ \underline{६०} \\ \times \end{array}$$

अजादिगार्कवासराद् गतो भवेदहर्गणो
ऽथवा मधोः सितात् तिथेर्गणः समादितिथ्ययुक् ।
अधश्चतूरसै६४र्हृताऽवमैर्विहीनितो भवेदहर्गणः

अथाहर्गणज्ञामाऽभावे प्रतिदिनजग्रहानयनस्य दुर्घटत्वादहर्गणसाधनमाह । अजादिगार्कवासरादिति । अजो मेषस्तस्यादिगे अर्के यो वासरस्तस्माद् गतो दिनसमूहः अहर्गणः भवेत् ।

अत्रोपपत्तिः । ग्रहगतिसाधनं सावनेन भवति सावनदिनस्य लोके व्यवहारात् । उक्तं च भगवता ।

मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते ॥१९॥ इति
(सूर्यसिद्धान्ते, मानाधिकारे)

शिरोमणौ (कालमानाध्याये) ।

इनोदयद्वयाऽन्तरं तदर्कसावनं दिनम् ।
तदेव मेदिनीदिनम् ॥२०॥ इति

प्रकारान्तरेणाऽहर्गणानयनमाह । अथवेति । वा पक्षान्तरं मधोः चैत्रस्य सितात् शुक्लपक्षप्रतिपदः तिथेर्गणः तिथिसमूहः समादितिथिः मेषार्कदिनजतिथिः तया अयुग् हीनः । अधः स्थानद्वये स्थाप्यः । एकत्र चतूरसैः चतुःषष्टया हृतः भक्तः । लब्धानि अवमानि तिथिक्षयाः । तैर्विहीनितः अपरत्रस्थः अहर्गणः भवेदिति ।

अत्रोपपत्तिः । चैत्रशुक्लप्रतिपदि सृष्टेरारम्भात् तस्माद् गततिथयो ग्राह्याः । अत्र ग्रन्थे मेषार्कदिने ध्रुवकस्य साधितत्वाद् मेषार्कदिनजतिथ्या ऊन इत्युक्तम् । तिथीनां चान्द्रत्वादहर्गणस्य सावनत्वाच्चान्द्रसावनमध्येऽवमस्य स्थानम् । चतुःषष्टया तिथिभिरेकोऽवमो भवति । अत्र चैत्रादितो गणने मध्येऽधिमासश्चेत् सोऽपि ग्राह्यः । अन्यथाऽहर्गणे एकमासस्याऽन्तरं पतति । अथ यदि

तिथिक्षया यमार्थाश्विद्व्यष्टव्योमशराश्विनः २५०८२२५२ ।।३८।।
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

एतैरवमदिनैः

चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः १६०३००००८० ।।३७।।
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति चान्द्रदिवसा लभ्यन्ते तदैकावमेन किमिति लब्धानि चान्द्रदिनानि ६३।५४।३५ ।* स्वल्पान्तरत्वाच्चतूरसैर्हृता इत्युक्तम् । सावनेभ्यश्चान्द्राणामाधिक्याद् विहीन इत्युक्तम् । यद्यपि त्रैराशिकस्य सावयवत्वादवमानयनं सावयवं युक्तं तथापि सावयवं न गृह्यते । सावयवानयने

---

* अत्र गणितम् ।

$$\frac{१६०३००००८०}{२५०८२२५२} = \frac{४००७५००२०}{६२७०५६३}$$

दि व प
= ६३ । ५४ । ३५

```
६२७०५६३)४००७५००२०(६३।५४।३५
         ३७६२३३७८
          २४५१६२४०
          १८८११६८९
           ५७०४५५१×६०                 ३६६२६५८×६०
         ३४२२७३०६०                २१९७५९४८०
         ३१३५२८१५                 १८८११६८९
          २८७४४९१०                  ३१६४२५९०
          २५०८२२५२                  ३१३५२८१५
           ३६६२६५८                    २८९७७५
```

तु तिथ्यन्तकालेऽहर्गणः स्यान्न तु सूर्योदयकाले । अतः सूर्योदयसामयिकार्थं दिनमेव गृह्यते इति । उक्तं च शिरोमणौ (मध्यगतिवासनाधिकारे) ।

तिथ्यन्तसूर्योदययोस्तु मध्ये
सदैव तिष्ठत्यवमावशेषम् ।
त्यक्तेन तेनोदयकालिकः स्यात्
तिथ्यन्तकाले द्युगणोऽन्यथातः ।।१८।। इति

उदाहरणम् । (१८७१ वैक्रमाब्दे १७३६ शकाब्दे) श्रावणकृष्णामायां रवावहर्गणः साध्यते । चैत्रसिताद्याद् गततिथयः ११९ समादितिथिः कृष्णषष्ठी २१ अनेन रहिताः ९८ । अधः ९८ चतूरसै ६४ हृता लब्धमवमम् १ अनेनोनिता अहर्गणो जातः ९७ । मेषार्काद् गणितेऽपि स एवाहर्गणः । अहर्गणे ९७ सप्ततष्टे शेषम् ६ । समादिवारः सोमस्तेन युक्तो जातो वर्त्तमानोऽर्कस्य वारः ।* यदि वारो न मिलति तदा वारानुसन्धानेन अहर्गणः सैको निरेको वा कार्यः । उक्तं च शिरोमणौ (अधिमासादिनिर्णयाधिकारे) ।

अभीष्टवारार्थमहर्गणश्चेत्
सैको निरेकस्तिथयोऽपि तद्वत् ।।१।।

---

* अत्र गणितम् ।

वर्षगणः = १७

१८७१ वैक्रमाब्दे मेषसङ्क्रान्तिः सोमवासरे २२ घटीषु ७ पलेष्वभवत् (ग्रहध्रुवाधिकारस्य ३ श्लोकस्य गणितं द्रष्टव्यम्) ।

वर्षौघो धरणीशशाङ्क११गुणितः स्वाऽभ्राऽद्रिभू१७०भागयुक्
स्यात् तिथ्यादिफलं स्वकीयखमही१०भागाढ्यवर्षव्रजम् ।
वेदेन्द्रैर्१४४ विभजेद् घटीमुखफलं स्यात् तत्फलद्वन्द्वजे
योगे विश्व१३मितास् तिथीर् नख२०घटीर् युञ्जीत शुद्धिर् भवेत् ।।९।।

एषा शुद्धिस् त्रिशता ३० तक्षणीया
लब्ध्या तुल्याः स्युः प्रयाताऽधिमासाः ।
शिष्टा सङ्ख्या या भवेत् तां वदन्ति
विज्ञाः शुद्धि प्रक्रियायाः प्रसङ्गे ।।१०।।

(प्रतिसंस्कृते रत्नदीपे, पञ्चाङ्गाधिकारे)

$$\text{शुद्धिः} = \left(११\,\text{व} + \frac{१}{१७०}\text{स्व}\right)(\text{तिथ्यादिः}) + \left(\frac{\text{व} + \frac{१}{१०}\text{स्व}}{१४४}\right)(\text{घट्यादिः})$$

$$+ \; १३ \; \text{तिथयः} \; २० \; \text{घटयः}$$

$$११\,\text{व} + \frac{१}{१७०}\text{स्व} = ११ \times १७ \times \frac{१७१}{१७०}$$

$$= \frac{११ \times १७१}{१०}$$

$$= \frac{१८८१}{१०}$$

$$= १८८ \,।\, ६$$

$$\frac{\text{व} + \frac{१}{१०}\text{स्व}}{१४४} = \frac{१७ \times \frac{११}{१०}}{१४४} = \frac{१८७}{१० \times १४४} = \frac{१८७}{१४४०}$$

$$= ० \,।\, ८ \; (\text{स्वल्पान्तरेण})$$

१४४०) १८७(०।७
×६०
२४)१८७
१६८
१९

$$\text{शुद्धिः} = (\overset{\text{ति}}{१८८} \,।\, \overset{\text{घ}}{६}) + (\overset{\text{घ}}{०} \,।\, \overset{\text{प}}{८}) + (\overset{\text{ति}}{१३} \,।\, \overset{\text{घ}}{२०})$$

$$= \overset{\text{ति}}{२०१} \,।\, \overset{\text{घ}}{२६} \,।\, \overset{\text{प}}{८}$$

---

३०)२०१(६
१८०
२१

ति घ प
अतः शुद्धिः = २१ । २६ । ८

वर्षादितिथिः = शुद्धितिथिः = २१

याता यावत् तिथिमभिमतां चैत्रशुक्लादितिथ्याश्
चान्द्रा मासाः खगुण३०निहता वर्तमानस्य मासः ।
शुक्लस्यादेर् विगततिथिभिः संयुता वर्तमान-
सौराऽब्दादिस्थतिथिरहिताः स्यात् तिथीनां गणोऽत्र ।।११।।

(प्रतिसंस्कृते रत्नदीपे, पञ्चाङ्गाधिकारे)

अत्र गणनायाम् अमान्तमासा ग्राह्याः । अस्माकं देशे लौकिकव्यवहारे तु पूर्णान्तमासा गृह्यन्ते । अत्र गणिते गतमासाश् चैत्र-वैशाख-ज्येष्ठाः, वर्तमानस्याऽऽषाढमासस्याऽमायां गततिथिः २९ ।

तिथिगणः = (व्यतीताश् चैत्रशुक्लादयश् चान्द्रमासाः) × ३० + (वर्तमानस्य चान्द्रमासस्य शुक्लप्रतिपदो व्यतीतास् तिथयः)
— शुद्धिः
= ३ × ३० + २९ — २१
= ९० + ८
= ९८

तिथिगणं विभजेच् श्रुतिशत्रु६४भिः
क्षयतिथिप्रमितिः फलमुच्यते ।
क्षयतिथीस् तिथिसञ्चयतस् त्यजेद्
भवति शेषमितिर् द्युगणोऽथवा ।।१२।।

(प्रतिसंस्कृते रत्नदीपे, पञ्चाङ्गाधिकारे)

अवमदिनम् $= \frac{\text{तिथिगणः}}{\text{६४}}$ (अत्र पूर्णा लब्धिर् एव ग्राह्या)

$= \frac{\text{९८}}{\text{६४}}$

६४)९८(१
६४
३४

अतोऽवमदिनम् = १

अहर्गणः = तिथिगणः — अवमदिनम्
= ९८ — १
= ९७

७)९७(१३
९१
६ शेषम्

अहर्गणपरीक्षा—

मेषादौ वारः = २
६ + २ = ८

७)८(१
७
१ शेषम्

अभीष्टतिथौ वारो रविवारः। अतोऽहर्गणः शुद्धः।

अथ सौरमासाद् अहर्गणः साध्यते।

तत्राऽऽदावभीष्टतिथौ वर्तमानः सौरमासस् तस्य मासस्य व्यतीताः सौरा दिवसाश् च ज्ञेया भवन्ति।

वा घ प
मेषसङ्क्रान्तिः = २ । २२ । ७
वृषस्य क्षेपकः = (+)२ । ५७ । १
वृषसङ्क्रान्तिः = ५ । १९ । ८

मेषसङ्क्रान्तिः = २ । २२ । ७
मिथुनस्य क्षेपकः = (+)६ । २३ । १
मिथुनसङ्क्रान्तिः = १ । ४५ । ८

मेषसङ्क्रान्तिः = २ । २२ । ७
कर्कटस्य क्षेपकः = (+)३ । ० । ५१
कर्कटसङ्क्रान्तिः = ५ । २२ । ५८

(मकरन्दसारण्या इमे क्षेपका गृहीताः।)

एतावता गणितेन बृहस्पतिवासरे कर्कटसङ्क्रान्तिर् बभूवेति ज्ञायते। अस्माकम् अभीष्टतिथावर्थाद् आषाढकृष्णाऽमायां (पूर्णान्तमानेन श्रावणकृष्णाऽमायां) रविवारो वर्तते। पूर्वाऽनीतोऽहर्गणश् च ९७ मितो वर्तते। अतस् तस्मिन् दिवसे सौरस्य श्रावणस्य चतुर्थो दिवस इति निश्चीयते।

वैशाखाद्याः सौरमासा अतीता
ये स्युः सङ्ख्या तद्भवा कुत्रि३१निघ्नी।
यातैर् घस्रैर् इष्टसौरस्य मासो
युक्ताः, सिध्येद् ईप्सितो घस्रसङ्घः॥६॥

(प्रतिसंस्कृते रत्नदीपे, पञ्चाङ्गाधिकारे)

अहर्गणः = (व्यतीतानां वैशाखादीनां सौरमासानां सङ्ख्या) × ३१
+ (वर्तमानस्य सौरमासस्य व्यतीतानां दिवसानां सङ्ख्या)
= ३ × ३१ + ३
= ९३ + ३
= ९६

अब्दपः = २
अहर्गणः = + ९६
९८

७)९८(१४
९८
×

अत्र शनिवार आगतः। अस्माकम् अभीष्टवारस् तु रविवारो वर्तते।

घस्रस्तोमे वर्षनाथेन युक्ते
सिद्धयेत् स्वीयो वासरः सप्त७तष्टे।
किञ्चित् क्षिप्त्वाऽहर्गणे वाऽपहाय
सङ्ग्रन्तव्यो वासरोऽहर्गणेन॥८॥

(प्रतिसंस्कृते रत्नदीपे, पञ्चाङ्गाधिकारे)

अतो वाराऽनुरोधेन

अहर्गणः = गणितागतोऽहर्गणः + १
= ९६ + १
= ९७

रवेर्गजाद्रयों ७८ शका मृदूच्चजाः ।।३।।

अथ सूर्यस्य मन्दोच्चमाह । रवेरिति । सूर्यस्य गजाद्रयोंऽशा अष्टसप्तत्यंशा मृदूच्चजा मन्दोच्चभवाः स्युरिति ।

अत्रोपपत्तिः । मिथुनस्थे रवौ कस्मिंश्चिद्दिने रेवतीयोगतारोदयाद् यावतीभिर्घटिकाभीः रविरुदितस्तावतीभिर्मीनान्ताल्लग्नं साध्यम् । यल्लग्नं तदेव स्फुटरविर्ज्ञेयः । एवमन्यस्मिन् दिवसेऽपि । तयोः स्फुटार्कयोरन्तरं स्पष्टगतिः । एवं स्फुटगतयो ज्ञातव्याः । यस्मिन् दिने गतेः परमाल्पत्वं तद्दिने यावान् सूर्यस्तावदेव रवेरुच्चं वेदितव्यम् ।* तस्योच्चस्य चलनं वर्षशतेनापि नोपलक्ष्यते । किन्तु अतीन्द्रियैर्देवैः कल्पे भगणा निबद्धाः । यथा ।

प्राग्गतेः सूर्यमन्दस्य कल्पे सप्ताष्टवह्नयः ३८७ ।।४१।। इति

(सूर्यसिद्धान्ते, मध्यमाधिकारे)

ग्रन्थारम्भसमये सृष्टितो गताब्दाः १९५५८८४८९८ ।

कल्पजचक्रहतास्तु गताब्दाः
कल्पसमाविहृता भगणाद्याः ।
स्युर्ध्रुवका दिनकृद्गणान्ते
पातमृदूच्चचलोच्चखगानाम् ।।६।।

(सिद्धान्तशिरोमणौ, प्रत्यब्दशुद्ध्यधिकारे)

इति रीत्या भगणादिमन्दोच्चम् १७५।२।१७।१७।१७ ।** अत्राचार्येण मन्दोच्चस्य पूर्वगतित्वात् त्रिचत्वारिंशद्घटिकाऽधिका गृहीता । अतो गजाद्रयोंऽशा इति ।।३।।

---

* सिद्धान्तशिरोमणौ भगणाध्याये भगणोपपत्तौ भास्करोक्तोऽयं विषयः ।

** अत्रत्या प्रक्रिया ग्रहध्रुवाधिकारस्य ३ श्लोकस्य गणिते द्रष्टव्या ।

खाद्र्यं ७०शोनोऽहर्गणोऽर्को ध्रुवाढ्यो
ऽहर्वृन्दाभ्रेष्विन्दु१५०भागैः कलोनः ।

अथाहर्गणात् सूर्यसाधनमाह । खाद्र्यंशोन इति । अहर्गणः खाद्र्यंशोनः स्वस्य सप्ततिभागेन हीनः अहर्वृन्दमहर्गणस्तस्य अभ्रेष्विन्दुभागेन पञ्चाशदधिकशतांशेन कलोनः कलायां रहितः ध्रुवाढ्यः पूर्वोक्तध्रुवकयुक्तः अर्कः सूर्यो भवति ।

अत्रोपपत्तिः । यदि युगसावनदिनैर्युगसूर्यभगणा लभ्यन्ते तदैकसावनदिनेन किमिति लब्धं सूर्यस्य दिनगतिरंशादिः ०।५६।८।१० ।* इयं खण्डद्वयेन साध्यते । आद्यमंशादि ०।५६।८।२४ । द्वितीयं कलादि ०।०।२४ । प्रथममंशस्थान एकः स्थापितः । तस्याधिकत्वादाद्येनोनिते जातम् ०।०।५१।२६ । सप्तत्या गुणितमंशस्थाने जातमेकमतः खाद्र्यंशोनोऽहर्गण इत्युक्तम् । द्वितीयं ०।०।२४ । पञ्चाशदधिकशतेन गुणितं जातं कलास्थाने एकमतोऽहर्वृन्दाभ्रेष्विन्दुभागेन कलोन इत्युक्तम् ।**

---

* अत्रत्या प्रक्रिया ग्रहध्रुवाधिकारस्य ४ श्लोकस्य गणिते द्रष्टव्या ।

** अत्र गणितम् ।

	अं	क	वि	प्रवि	प्रप्रवि	प्रप्रप्रवि	प्रप्रप्रप्रवि
सूर्यस्य दैनिकी गतिः =	०	५९	८	१०	१०	२४	१२

एषा गतिः १ अंशस्याऽऽसन्ना वर्तते ।

$\overset{१}{(—)}$ ०।५९। ८।१०।१०।२४।१२

०। ०।५१।४९।४९।३५।४८

(५१ । ४९ । ४९ । ३५ । ४८) विकलादिः

= ३१०९ । ४९ । ३५ । ४८ प्रतिविकलादिः

= १८६५८९ । ३५ । ४८ प्रप्रविकलादिः

= १११९५३७५ । ४८ प्रप्रप्रविकलादिः

= ६७१७२२५४८ प्रप्रप्रप्रविकलाः

१ अंशः = ६० कलाः

= ३६०० विकलाः

= २१६००० प्रतिविकलाः

= १२९६०००० प्रप्रविकलाः

= ७७७६००००० प्रप्रप्रविकलाः

= ४६६५६०००००० प्रप्रप्रप्रविकलाः

६७१७२२५४८ मितम् अन्तरं स्वैकदिनेन भवति चेत् ४६६५६०००००० मितम् अन्तरं कियद्भिर् दिनैर् भवतीत्यनुपातः क्रियते ।

$$\frac{१\times ४६६५६००००००}{६७१७२२५४८} = \frac{११६६४०००००००}{१६७९३०६३७}$$

$$= ६९\frac{७६७८६०४७}{१६७९३०६३७}$$

१६७९३०६३७)११६६४०००००००(६९

१००७५८३८२२

१५८८१६१७८०

१५११३७५७३३

७६७८६०४७

एतावता गणितेन किञ्चिद् न्यूनया ७० (सप्तत्या) दिवसैः सूर्यः किञ्चिद् अधिकान् (७० — १ =) ६९ अंशान् भुङ्क्त इति ज्ञातम् । सूर्यः ७० दिवसैर् ६९ अंशान् भुङ्क्त इति स्वीकृते सूर्यस्य दैनिकी गतिर् ०।५९।८।३४।१७।८।३४ (अंशादिः) भवति । एषा गतिर् वास्तवगत्या किञ्चिद् अधिका वर्तते ।

```
           अं   क   वि  प्रवि प्रप्रवि प्रप्रप्रवि प्रप्रप्रप्रवि
७०) ६९ (० । ५९ । ८ । ३४ । १७ ।  ८ ।  ३४
  ×६०   १×६०   ४×६०   २×६०   १×६०   ४×६०
७)४१४   ६०     २४०    १२०    ६०     २४०
  ३५    ५६     २१     ७      ५६     २१
   ६४    ४      ३०    ५०     ४       ३०
   ६३           २८    ४९             २८
    १            २     १              २
```

परन्तु

```
                          ० । ५९ । ८ । ३४ । १७ ।  ८ । ३४
सिद्धान्तोक्ता गतिः = (—) ० । ५९ । ८ । १० । १० । २४ । १२
अन्तरम्           =      ० ।  ० । ० । २४ ।  ६ । ४४ । २२
```

(२४ । ६ । ४४ । २२) प्रतिविकलादिः

= १४४६ । ४४ । २२ प्रप्रविकलादिः

= ८६८०४ । २२ प्रप्रप्रविकलादिः

= ५२०८२६२ प्रप्रप्रप्रविकलाः

१ कला = ७७७६०००००० प्रप्रप्रप्रविकलाः

५२०८२६२ प्रप्रप्रप्रविकलामितम् अन्तरं त्वेकदिनेन भवति चेद् एककला (७७७६०००००० प्रप्रप्रप्रविकला) मितम् अन्तरं कियद्भिर् दिनैर् भवतीत्यनुपातः क्रियते ।

```
७७७६००००००    ३८८८०००००         २६०४१३१)३८८८००००० (१४९
---------- = ---------                  २६०४१३१
 ५२०८२६२      २६०४१३१                  ---------
                    ७८४४८१              १२८३८६९०
             = १४९ -------              १०४१६५२४
                   २६०४१३१              ---------
             = १५० (स्वल्पान्तरेण)        २४२२१६६०
                                         २३४३७१७९
                                         ---------
                                          ७८४४८१
```

एतावता गणितेन सूर्यस्यांऽशादिका गतिः $\frac{६९}{७०}$ भवतीति स्वीकृते सति १५० दिवसैर् एका कलाऽधिका भवतीति ज्ञायते ।

अतः सूर्यस्य दैनिकी गतिः = $\frac{६९}{७०}$ (अंशादिः) − $\frac{१}{१५०}$ (कलादिः)

अहर्गणस्य समारम्भात् साधितत्वात् समारम्भजेऽर्केऽहर्गणोत्पन्नः सूर्यो योज्यः । अतो ध्रुवाढ्य इत्युक्तम् । अत्राचार्येण किञ्चित् स्थूला गतिः स्वीकृता तच्च ०।५९।८।१०।१७।३४।१७ । सिद्धान्तोक्ता गतिः ०।५९।८।१०।१०।२४।१२ । वर्षपर्यन्तमहर्गणस्य प्रयोजनादेव वर्षे त्रिचत्वारिंशदक्षराणामन्तरत्वान्न दोष इति ।*

---

* अत्र गणितम् ।

	अं	क	वि	प्रवि	प्रप्रवि	प्रप्रप्रवि	प्रप्रप्रप्रवि
$\frac{६९}{७०}$ (अंशादि) =	०	५९	८	३४	१७	८	३४
$\frac{१}{१५०}$ (कलादि) = (—)		०	०	२४	०	०	०
		५९	८	१०	१७	८	३४

अत्र गणितेन आचार्यस्वीकृता गतिः ०।५९।८।१०।१७।८।३४ (अंशादिः) आगच्छति । लक्ष्मीपतिस् तु ०।५९।८।१०।१७।३४।१७ (अंशादिः) इति लिखति । अत्र २५ । ४३ प्रप्रप्रविकलादिमितम् अन्तरं जातम् ।

	अं	क	वि	प्रवि	प्रप्रवि	प्रप्रप्रवि	प्रप्रप्रप्रवि
आचार्यस्वीकृता गतिः =	०	५९	८	१०	१७	३४	१७
वास्तवगतिः =(—)	०	५९	८	१०	१०	२४	१२
एकस्मिन् दिनेऽन्तरम्					७	१०	५

एकस्मिन् वर्षेऽन्तरम् = (७।१०।५) × ३६५

= २६१६ । २० । २५ प्रप्रविकलादि

= ४३ । ३६ । २० । २५ प्रतिविकलादि

३६५

×(७।१०।५)

२५५५ | ३६५० | १८२५

| ३० |

६१ | ३६८० | २५

२६१६ | २०

अत्रोदाहृतिः । पूर्वसाधितोऽहर्गणः ९७ । स्वस्य ९७ खाद्रयंशभागः १।२३।८ अनेनोनितः ९५।३६।५२ अहर्वृन्दस्य ९७ अभ्रेष्विन्दु १५० भागेन ०।४८ कलासु हीनः ९५।३६।४ चरसंस्काररहितसमादिदिनस्य सूर्योदयकालिकसूर्यध्रुवकेण ३५७।२९।५ युक्तो जातः सूर्यः ४५३।५।९ । चक्राधिकत्वाच्चक्र३६०तष्टो जातः सूर्यमध्यः ९३।५।९ ।*

---

* अत्र गणितम् ।

$$\text{अहर्गणः} = \text{अ} = ९७$$

$$\text{अहर्गणोत्पन्नः सूर्यः} = \left(\text{अ} - \frac{१}{७०}\text{स्व}\right)(\text{अंशादिः}) - \left(\frac{\text{अ}}{१५०}\right)(\text{कलादिः})$$

$$\left(\text{अ} - \frac{१}{७०}\text{स्व}\right) = ९७ \times \frac{६९}{७०} = \frac{६६९३}{७०} = ९५ ।३६। ५१$$

```
   ९७
  ×६९
 ----
  ८७३
 ५८२
 ----
 ६६९३
```

$$\frac{\text{अ}}{१५०} = \frac{९७}{१५०} = ० । ३९$$

```
७०)६६९३(९५।३६।५१                                 १५०) ९७ (०।३९
   ६३०          ४३×६०        ६×६०               ×६०    ५)९७×२
   ----         ------       ----               ----    ------
    ३९३      ७)२५८          ३६०             ५)९७×२    १९४
    ३५०         २१           ३५               ----     १५
    ----        ----         ----                       ----
     ४३          ४८           १०                         ४४
                 ४२            ७                         ४५
                ----         ----                       ----
                  ६             ३                        — १
```

अतोऽहर्गणोत्पन्नः सूर्यः = (९५।३६।५१)(अंशादिः)— (०।३९)(कलादिः)

अं क वि

= ९५ । ३६ । १२

द्विष्ठः शुद्धो मार्दवोच्चात् स्वमस्वं
मान्दं केन्द्रं भार्द्ध१८०भागाल्पपुष्टे ।।४।।

अथ स्पष्टीकरणं विवक्षुस्तदुपजीव्यकेन्द्रसाधनमाह । द्विष्ठ इति। मध्यग्रहः द्विष्ठः स्थानद्वये स्थाप्यः । एकत्र मार्दवोच्चाद् मृदूच्चतः शुद्धः शोधनीयः मान्दं मन्दफलसाधनयोग्यं केन्द्रं भवति । भं भचक्रं द्वादशराश्यात्मकं तस्यार्द्धं षड्राश्यात्मकं तस्य भागा अंशा अशीत्यधिकशतम् । तस्माद् अल्पपुष्टे न्यूनाधिके केन्द्रे स्वमस्वं धनर्णं कार्यम्। अशीत्यधिकशतादूने केन्द्रे मेषादिकेन्द्रत्वात् तस्मादागतं फलं ग्रहे धनं कार्यम् । अधिके तुलादिकेन्द्रत्वात् फलं हीनं कार्यमित्यर्थः । उक्तं च भगवता ।

मेषादिकेन्द्रे सर्वेषां मान्दे शैघ्रे च कर्मणि ।
धनं ग्रहाणां लिप्तादि तुलादावृणमेव च ।।४५।। इति
(सूर्यसिद्धान्ते, स्पष्टाधिकारे)

अत्रोपपत्तिः । मध्यमाधिकारोक्तरीत्या आगतो ग्रहः मध्यकक्षावृत्तपरिधौ भ्रमति । तद् मन्दनीचोच्चवृत्तस्य मध्यस्थानम् । तस्य

गणितेनाऽहर्गणोत्पन्नः सूर्यः ९५।३६।१२ (अंशादिः) आगच्छति । लक्ष्मीपतिस्तु ९५।३६।४ (अंशादिः) इति लिखति । अत्र ८ विकलामितम् अन्तरं जातम् ।

वर्षारम्भदिनजः सूर्योदयकालिकश् चरसंस्काररहितः सूर्यध्रुवो ग्रहध्रुवाधिकारस्य १३ श्लोकस्य प्रक्रियायां साधितो वर्तते ।

अं क वि
अहर्गणोत्पन्नः सूर्यः = ९५ । ३६ । ४
सूर्यध्रुवः = (+)३५७ । २९ । ५
४५३ । ५ । ९

अं क वि
अतो मध्यमसूर्यः = ९३ । ५ । ९

परिधौ मन्दग्रहो भ्रमति। स शीघ्रनीचोच्चवृत्तस्य मध्यः। तस्य परिधौ स्फुटग्रहो दृश्यते । उक्तं च ।

मध्यगत्या स्वकक्षाख्यवृत्तो व्रजे-
न्मन्दनीचोच्चवृत्तस्य मध्यं यतः ।
तद्वृतौ शीघ्रनीचोच्चमध्यं तथा
शीघ्रनीचोच्चवृत्तो स्फुटः खेचरः ॥३४॥ इति

(सिद्धान्तशिरोमणौ, छेद्यकाधिकारे)

शीघ्रमण्डलस्य मान्दमण्डलानुसारित्वाद् मन्दस्पष्टे ग्रहे शीघ्रफलसंस्कारः । तद्वृत्तद्वयमध्यं केन्द्रसंज्ञं ग्रहोच्चान्तरम् । यत उच्चात् तावत्येवान्तरे ग्रहो भवति । उक्तं च भास्कराचार्येण ।

वृत्तस्य मध्यं किल केन्द्रमुक्तं
केन्द्रं ग्रहोच्चान्तरमुच्यतेऽतः ।
यतोऽन्तरे तावति तुङ्गदेशा-
न्नीचोच्चवृत्तस्य सदैव केन्द्रम् ॥४१॥ इति

(सिद्धान्तशिरोमणौ, छेद्यकाधिकारे)

यद्यपि ग्रहभगणापेक्षया मन्दभगणानामल्पत्वाद् ग्रहाद् मन्दोच्चशोधनं युक्तम् । तथाप्याचार्येण शीघ्रमन्दफलयोर्धनर्णताकथनलाघवात् फलवैषम्याभावाच्च उच्चाद् ग्रहः शोधितः ।

धनर्णोपपत्तिः । मेषादिकेन्द्रे ग्रहादुच्चं पूर्वस्यां भवति । तेन ग्रहः पूर्वस्यामाकृष्यते । पूर्वाकर्षितो ग्रहः मध्यादधिको भवति । अतो फलं धनम् । तुलादिकेन्द्रे ग्रहादुच्चं पश्चिमायां भवति । तेन ग्रहः प्रतीच्यामाकृष्यते । तत्राकर्षितो ग्रहः मध्यमाद् हीनो भवति । तत्र फलमृणम् । अतः स्वमस्वं भार्द्धभागाल्पपुष्टे इति ।*

---

* अत्रत्यं क्षेत्रं १९४ पृष्ठे द्रष्टव्यम् ।



उ स्प म नि मि स्पा = कक्षावृत्तम्

उ = सूर्यस्य मन्दोच्चम् = २ । १८ (राश्यादि)

नि = सूर्यस्य मन्दनीचम् = ८ । १८ (राश्यादि)

म = कक्षावृत्ते मध्यमः सूर्यः = १ । ३ (राश्यादिः)

म बिन्दुं केन्द्रं प्रकल्प्याऽन्त्यफलत्रिज्यया कृतं नीचोच्चवृत्तम् = ऊ नी मा अस्मिन् नीचोच्चवृत्ते ऊ = उच्चम्, नी = नीचम्, मा = मध्यमः सूर्यः

भू = भूकेन्द्रम्

भू मा = सूर्यकर्णः

स्प = कक्षावृत्ते स्पष्टसूर्यस्थानम्

विभार्द्ध१८०भागं खनवा९०धिकं चेत्
तच्छोधितं दोः कथितं किलाऽर्यैः ।

अथ केन्द्रात् फलसाधनार्थं भुजसाधनमाह । विभार्द्धभागमिति । पूर्वसाधितं केन्द्रं विभार्द्धभागं भार्द्धभागैः अशीत्यधिकशतेन हीनं कार्यम् । विभार्द्धभागे कृतेऽप्यकृतेऽपि खनवाधिकं चेद् नवत्यंशतोऽधिकं चेत् तच्छोधितं तच्छब्देन पूर्वपरामर्शाद् भार्द्धभागात् शोधितं सद् दोः भुज इति आर्यैः वासनाज्ञैः कथितम् उक्तमिति ।

अत्रोपपत्तिः । द्वादशराश्यात्मके चक्रे राशित्रयात्मकानि चत्वारि पदानि विषमसमसंज्ञकानि भवन्ति । राशित्रयं यावद् विषमपदम् । षड्राशि यावत् समपदम् । नवराशि यावद् विषमपदम् । द्वादशराशि यावत् समपदम् । एकस्मिन् पदे नवत्यंशाः । अथ समायां भूमौ त्रिज्यातुल्यकर्कटकेन वृत्तं कृत्वा भगणांशैरङ्क्यम् । तन्मध्ये पूर्वापरां याम्योत्तरां च रेखां कृत्वा प्राच्याः सकाशात् सव्यक्रमेण पदानि कल्प्यानि वृत्ते रेखावच्छिन्नानि । तेषां क्रमेणायुग्मयुग्मसंज्ञा च । तत्र प्रथमपदे

म बिन्दोः स्प बिन्दुः पूर्वस्यां वर्तते । म बिन्दोः उ बिन्दुश् च पूर्वस्यां वर्तते । अतो मध्यमसूर्यस्थानात् स्पष्टसूर्यस्थानम् अधिकतरम् उच्चस्याऽऽसन्नतरं च वर्तते । अत उच्चेन सूर्यः स्वसन्निकृष्टम् आकृष्ट इति प्रतीयते ।

मि = कक्षावृत्ते मध्यमः सूर्यः = ४ । ३ (राश्यादिः)

मि बिन्दुं केन्द्रं प्रकल्प्याऽन्त्यफलत्रिज्यया कृतं नीचोच्चवृत्तम् = ऊ$_३$ मी नी$_३$ अस्मिन् नीचोच्चवृत्ते ऊ$_३$ = उच्चम्, नी$_३$ = नीचम्, मी = मध्यमः सूर्यः

भू मी = सूर्यकर्णः
स्पा = कक्षावृत्ते स्पष्टसूर्यस्थानम्

मि बिन्दोः स्पा बिन्दुः पश्चिमायां वर्तते । मि बिन्दोः उ बिन्दुश् च पश्चिमायां वर्तते । अतो मध्यमसूर्यस्थानात् स्पष्टसूर्यस्थानम् अल्पतरम् उच्चस्याऽऽसन्नतरं च वर्तते । अत उच्चेन सूर्यः स्वसन्निकृष्टम् आकृष्ट इति प्रतीयते ।

प्राच्याः सकाशाद् वृत्तोऽभीष्टस्थाने बिन्दुः कार्यः । तस्य बिन्दोः प्राच्यपरायाश्च यदन्तरं सा दोर्ज्या । बिन्दोर्याम्योत्तरायाश्च यदन्तरं सा कोटिज्या । तद्धनुषी भुजकोटिसंज्ञे । अथ यथा यथा स बिन्दुरग्रतश्चाल्यते तथा तथा दोर्ज्योपचीयते कोटिज्याऽपचीयते । पदान्तं प्राप्ते बिन्दौ कोटेरभावः दोर्ज्या च व्यासार्द्धतुल्या स्यात् । अतः खनवांशेभ्य ऊने केन्द्रे गत एव भुजः । ततो द्वितीयपदे कोटेरुपचयः तत्पदान्ते कोटिः परमा भुजाभावः ।* अतः खनवाधिकं चेद् भार्द्धभागेभ्यः शोध्यमिति । ततस्तृतीयपदे यो गतः स एव दोः । पदज्ञानार्थं विभार्द्धभागः कृतः । चतुर्थे एष्यज्ञानार्थं भार्द्धभागेभ्यः शोधितः । यद्यपि चतुर्थपदे क्रियागौरवं तथाप्युक्तिलाघवान्न दोषः । उक्तं च रसोनं त्रिभार्द्धं रसाच्छोधितं दोरिति ।**

---

* सिद्धान्तशिरोमणौ स्पष्टाधिकारे १८–२१ श्लोकानां वासनाभाष्ये भास्करोक्तोऽयं विषयः ।

** अत्रत्यं क्षेत्रं १९७ पृष्ठे द्रष्टव्यम् ।

प्रथमे पदे —

पू च चापः = ४५ अंशाः

पू च चापस्य ज्या = च अ

द्वितीये पदे —

पू द चा चापः = १२० अंशाः

पू द चा चापस्य ज्या = चा आ

= चा प चापस्य ज्या

= (पू द प — पू द चा) चापस्य ज्या

= (१८० — १२०) अंशानां ज्या

= ६० अंशानां ज्या

अर्थात्,

इष्टचापस्य ज्या = १८० अंशेभ्यो रहितस्येष्टचापस्य ज्या

तृतीये पदे —

पू द प चि चापः = २१५ अंशाः


द
चा
का
क
च
प
इ
आ
ई
अ
पू
चि
कि
की
ची
उ

पू द प चि चापस्य ज्या = चि इ
= प चि चापस्य ज्या
= (पू द प चि — पू द प) चापस्य ज्या
= (२१५ — १८०) अंशानां ज्या
= ३५ अंशानां ज्या

अर्थात्,

इष्टचापस्य ज्या = १८० अंशै रहितस्येष्टचापस्य ज्या

चतुर्थे पदे —

पू द प उ ची चापः = २९५ अंशाः

पू द प उ ची चापस्य ज्या = ची ई
= ची पू चापस्य ज्या
= (पू द प उ पू — पू द प उ ची) चापस्य ज्या
= (३६० — २९५) अंशानां ज्या
= ६५ अंशानां ज्या

अर्थात्,

इष्टचापस्य ज्या = ३६० अंशेभ्यो रहितस्येष्टचापस्य ज्या

येषाम् अंशानां ज्या सारणीतः साध्यते, तेंऽशा भुजांशा इति कथ्यन्ते। यथा —

प्रथमे पदे भुजांशाः = पू च = ४५ अंशाः
द्वितीये पदे भुजांशाः = चा प = ६० अंशाः
तृतीये पदे भुजांशाः = प चि = ३५ अंशाः
चतुर्थे पदे भुजांशाः = ची पू = ६५ अंशाः

भुजांशै रहिता ९० अंशाः कोटयंशाः कथ्यन्ते। यथा —

प्रथमे पदे कोटयंशाः = च द = (९० — ४५) अंशाः = ४५ अंशाः
द्वितीये पदे कोटयंशाः = द चा = (९० — ६०) अंशाः = ३० अंशाः
तृतीये पदे कोटयंशाः = चि उ = (९० — ३५) अंशाः = ५५ अंशाः
चतुर्थे पदे कोटयंशाः = उ ची = (९० — ६५) अंशाः = २५ अंशाः

कोटयंशानां ज्या कोटिज्या कथ्यते। यथा —

प्रथमे पदे कोटयंशाः = च द, कोटिज्या = च क
द्वितीये पदे कोटयंशाः = द चा, कोटिज्या = चा का
तृतीये पदे कोटयंशाः = चि उ, कोटिज्या = चि कि
चतुर्थे पदे कोटयंशाः = उ ची, कोटिज्या = ची की

अभीष्टचापस्य ज्याया मूलात् प्रथमपदादिं यावत् स्थितं पूर्वापरव्यासखण्डं तस्य चापस्योत्क्रमज्या कथ्यते। यथा —

प्रथमे पदे पू च चापस्योत्क्रमज्या = अ पू
द्वितीये पदे पू द चा चापस्योत्क्रमज्या = आ पू
तृतीये पदे पू द प चि चापस्योत्क्रमज्या = इ पू
चतुर्थे पदे पू द प उ ची चापस्योत्क्रमज्या = ई पू

ज्योत्पत्तेः विनोपपत्तिज्ञानाऽसम्भवात् सोच्यते । समायां भूमावभीष्टत्रिज्यामिताङ्गुलेन कर्कटकेन वृत्तं विलिख्य दिगङ्कितं चक्रांशैः पदैश्चाऽङ्कितं कार्यम् । तत्रैकस्मिन् वृत्तचतुर्थांशे नवतिर्नवतिर्भागा भवन्ति । ततो यावन्ति ज्यार्द्धानि कार्याणि तावद्भिर्भागैरेकैकं वृत्तचतुर्थांशं विभज्य तत्र चिह्नानि कार्याणि । तद्यथा यत्र चतुर्विंशतिर्ज्याः साध्यास्तत्र चतुर्विंशतिर्भवन्ति । एवं द्वितीयपदेऽपि । ततो दिक्चिह्नादुभयतश्चिह्नद्वयोपरिगतं सूत्रं ज्यारूपं भवति ।* एवं चतुर्विंशतिः ज्या भवन्तीति ।**

अभीष्टचापस्य कोटिज्याया मूलात् प्रथमपदान्तं यावत् स्थितं याम्योत्तरव्यासखण्डं तस्य चापस्य कोटच्युत्क्रमज्या कथ्यते । यथा —

प्रथमे पदे पू च चापस्य कोटच्युत्क्रमज्या = क द
द्वितीये पदे पू द चा चापस्य कोटच्युत्क्रमज्या = का द
तृतीये पदे पू द प चि चापस्य कोटच्युत्क्रमज्या = कि द
चतुर्थे पदे पू द प उ ची चापस्य कोटच्युत्क्रमज्या = की द

* सिद्धान्तशिरोमणेर् ज्योत्पत्त्यधिकारे ज्योपपत्तौ भास्करोक्तोऽयं विषयः ।

** अत्र क्षेत्रम् ।



दोर्दिग्१०लवात् स्युः खलु मान्दखण्डा
भोग्यान्तरघ्नांशदशांश१०शयुक्ताः ॥५॥

अथ सूर्यस्य मन्दफलसाधनमाह । दोर्दिग्लवादिति । भुजांशानां दशमभागतः मान्दखण्डाः । खण्ड्यते खडि भेदने कर्मणि घञ् । खण्डशब्दः पुंलिङ्गे नपुंसके च ।

भित्तं शकलखण्डे वा पुंसि । इत्यमरः (दिग्वर्गे)

वक्ष्यमाणा मान्दाङ्काः स्युः । खलु शब्दः स्फुटमान्दाङ्कबोधनार्थः । भोग्य एष्यखण्डः तेन गतखण्डस्य यदन्तरं तेन हृतः अंशः अंशाविशेषः तस्य दशांशः दशमभागस्तेन युक्तो मान्दखण्डो भवेत् ।

अत्रोपपत्तिः । फलसाधनार्थं नव ज्याखण्डाः कल्पिताः । तस्मात् साधितं मान्दं स्थापितम् । अतस्तज्ज्ञानार्थं दशभक्तमित्युक्तम् । दशांशान्तरे फलसाधनार्थमनुपातः । यदि दशांशैरेष्यखण्डान्तरं लभ्यते तर्हि एतावता किमिति ।

रवेस्त्रिपक्षा२३ विषयाब्धयः ४५ षट्-
तर्काः६६ शराष्टौ८५ कुदिशो१०१ब्धिरुद्राः११४ ।
त्र्यर्का १२३ गजार्काः १२८ कुगुणेन्दवः १३१ स्युः
षष्ट्यु६०द्धृतास्ते खलु मन्दभागाः ॥६॥

च द चापः = ३० अंशाः

द चा चापः = ३० अंशाः

च द चा चापः = ६० अंशाः

चतुर्विंशती ज्यासु साध्यमानासु ३० अंशानां च द चापस्य ज्या अ च अष्टमी ज्या भवति । च चा रेखा च ६० अंशानां पूर्णज्या वर्तते । ६० अंशानां पूर्णज्याया अर्धं ३० अंशानां ज्या भवति ।

अथ सूर्यस्य मान्दाङ्कानाह । रवेरिति । सूर्यस्य एते नव मान्दाङ्काः । त्रिपक्षाः त्रयोविंशतिः । विषयाब्धयः पञ्चचत्वारिंशत् । षट्तर्काः षट्षष्टिः । शराष्टौ पञ्चाशीतिः । कुदिश एकाधिकं शतम् । अब्धिरुद्राः चतुर्दशाधिकं शतम् । त्र्यर्काः त्रयोविंशत्यधिकं शतम् । गजार्का अष्टाविंशत्यधिकं शतम् । कुगुणेन्दव एकत्रिंशदधिकं शतम् । ते पूर्वोक्ता मान्दखण्डाः षष्टयुद्धृताः षष्टिभक्ता मन्दभागा मन्दफलसम्बन्ध्यंशाः स्युः । खलु शब्दो धातुत्वसूचनार्थम् ।

अत्रोपपत्तिः । भपञ्जरेऽश्विन्यादीनां ताराणां वलयं तद्भूमेः समन्तात् तुल्येऽन्तरे वर्तते । यस्मिन् वृत्ते ग्रहो भ्रमति तस्य मध्यं न भूमध्ये । अतो भूस्थो द्रष्टा भवलये मध्यमस्थाने ग्रहं न पश्यति किन्तु अन्यत्र पश्यति । तयोर्भवलये यदन्तरं तद् ग्रहस्य फलमिति ।*

०	१	२	३	४	५	६	७	८	९	
०	२३	४५	६६	८५	१०१	११४	१२३	१२८	१३१	सूर्यस्य खण्डाः
२३	२२	२१	१९	१६	१३	९	५	३	०	खण्डान्तराणि
१	१	२	३	३	४	४	२	३	०	तदन्तराणि

अथ च्छेद्यकेनोपपत्तिः । समायां भूमौ त्रिज्याप्रमाणकर्कटकेन वृत्तं लिखेत् । तत् कक्षावृत्तम् । यस्य ग्रहस्य च्छेद्यकं क्रियते तस्य मध्यभुक्तिपञ्चदशांशेन मध्यबिन्दोः भूवृत्तं लिखेत् । तद् भूवृत्तं लम्बनावनतिदर्शनार्थं कर्त्तव्यम् । अन्यथा बिन्दुरेव भूः कल्प्यः । कक्षावृत्तं भगणांशकलादिभिश्चिह्नितव्यम् । तत्रेष्टस्थाने मेषादिं प्रकल्प्य एवं कृते यत्र राश्यंशकलादिव्यवस्थितो ग्रहोऽस्ति तत्र ग्रहचिह्नं कार्यम् । एवं मन्दोच्चं शीघ्रोच्चं वा दत्त्वा ग्रहोच्चयोरग्रे चिह्ने कार्ये । भूमध्यचिह्नोच्चचिह्नयोरुपरिगा रेखा कार्या । सा कुमध्यादुभयभागव्यापिनी

---

* सिद्धान्तशिरोमणौ छेद्यकाधिकारे ७ श्लोके भास्करोक्तोऽयं विषयः ।

तुङ्गसूत्रगता भवति । तत उच्चरेखाप्रमितकर्कटकेन रेखाप्रान्तयोरुत्पादितवृत्तद्वयसम्पातेन यौ मत्स्यमुखपुच्छौ भवतस्तयोर्भूमध्यस्थ चोपरिगता अन्या तिर्यग् रेखा कार्या । अथ ग्रहस्य मान्दा शैघ्रा वा परमफलस्य ज्या साऽन्त्यफलज्या । तावत्प्रमाणं सूत्रं भूमध्याद् उच्चरेखायां दत्त्वा तदग्रचिह्नात् त्रिज्यामितेन कर्कटकेन वृत्तं लिखेदेतद् मन्दशीघ्रयोरन्यतरस्य प्रतिमण्डलाभिघं वृत्तं भवति । योर्ध्वरूपोच्चरेखा पूर्वं कृता सैव प्रतिमण्डलगता रेखा । किन्तु तन्मध्ये पूर्ववद् मध्येऽन्या तिर्यग् रेखा कार्या । प्रतिमण्डलमपि चक्रांशैरङ्क्यम् । अथोच्चरेखोपरि नीयमाना रेखा यत्र लगति तत्र प्रतिमण्डलेऽप्युच्चं कल्प्यम् । तस्मादुच्चराशिभागान् विलोमतो गणयित्वा तदग्रे मेषादिः कल्प्यः । ततो ग्रहोऽनुलोमं देयः । तत्र ग्रहोच्चयोरन्तरं तत् केन्द्रम् । उच्चरेखायां तिर्यग् ग्रहगामिनी रेखा सा दोर्ज्या । प्रतिमण्डलमध्ये या तिर्यग् रेखा तद्ग्रहयोरन्तरं सा कोटिज्योर्ध्वाधररेखारूपा । कक्षावृत्तप्रतिवृत्तयोर्मध्यस्थे ये तिर्यग्रेखे तयोरन्तरं सर्वत्रान्त्यफलज्यातुल्यमेव स्यात् । अतोऽन्त्यफलज्याग्रादुपरि प्रतिवृत्तस्य कोटिज्या मृगादौ केन्द्रे भवति कर्कादौ तु तदधः । अतः कोटिज्याऽन्त्यफलज्ययोर्योगवियोगौ कार्यौ । तथा कृते सति कक्षामध्यगतिर्यग्रेखावधिः स्फुटा कोटिर्भवति । कोटितलभूमध्ययोरन्तरं दोर्ज्या । स भुजः । तत्कोटिवर्गैक्यपदं कर्णः । कर्णो नाम प्रतिमण्डलस्थग्रहकुमध्ययोरन्तरसूत्रम् । तत् सूत्रं कक्षाख्यमण्डले यत्र लग्नं तत्र स्फुटग्रहः । स्फुटमध्ययोरन्तरं फलम् । तच्च मध्यग्रहात् स्फुटे ग्रहेऽधिके धनं यतः पृष्ठस्थतो मध्यो धनफलेनाऽग्रतो याति । मध्यात् पृष्ठगे स्पष्टग्रहे ऋणं यतोऽग्रगतो मध्यः पृष्ठे ऋणादेवायाति । एवं मन्दफलेन मन्दस्फुटः शीघ्रफलेन स्फुटो भवतीति ।*

इति प्रतिमण्डलानुसारि च्छेद्यकम् ।**

---

* सिद्धान्तशिरोमणौ छेद्यकाधिकारे १०–१७ श्लोकानां वासनाभाष्ये भास्करोक्तोऽयं विषयः ।

** अत्रत्यं क्षेत्रम् २०३ पृष्ठे द्रष्टव्यम् ।

प्रतिवृत्तभङ्गिः



उ स्वा नि स्प = कक्षावृत्तम्
भू = कक्षावृत्तस्य केन्द्रम् = भूकेन्द्रम्
ऊ मी नी मा = प्रतिवृत्तम्
के = प्रतिवृत्तस्य केन्द्रम्
वि मी = भू के = उ ऊ = अन्त्यफलज्या
नि = कक्षावृत्ते नीचम्
उ = कक्षावृत्त उच्चम्
नी = प्रतिवृत्ते नीचम्
ऊ = प्रतिवृत्त उच्चम्

मकरादिकेन्द्रे —

म = कक्षावृत्ते मध्यमो ग्रहः
मा = प्रतिवृत्ते मध्यमो ग्रहः
ऊ मा = केन्द्रभुजांशाः
मा ल = केन्द्रभुजज्या
मा त = केन्द्रकोटिज्या
त लि = अन्त्यफलज्या

अथ नीचोच्चवृत्तानुसारि च्छेद्यकं यथा । प्राग्वत् कक्षावृत्तं चक्रांशाङ्कितं कृत्वा तत्र मध्यग्रहो देयः । ग्रहचिह्नादन्त्यफलज्यामितकर्कटकेन मान्देन शैघ्रेण वा वृत्तं लिखेत् । तद् नीचोच्चसंज्ञकं वृत्तम् । अथ भूमध्याद् ग्रहोपरिगता रेखा किञ्चिद् दीर्घा कार्या । सा नीचोच्चवृत्तस्योच्चा रेखा । भूमेर्दूरतरप्रदेशे रेखायुते उच्चं कल्प्यम् । आसन्ने नीचं कल्प्यम् । ताभ्यां मत्स्यमुत्पाद्य तिर्यग् रेखा कार्या । भगणांशाङ्किते मान्दे नीचोच्चवृत्ते ग्रहः केन्द्रगत्या विलोमं भ्रमति । शैघ्रेऽनुलोमकेन्द्रगत्या भ्रमति । अतो मृदुकेन्द्रं विलोमं देयं शीघ्रकेन्द्रमनुलोमं देयम् । उच्चस्थानाद् निजनीचोच्चवृत्ते मान्दं शैघ्रं केन्द्रं यत्र सव्यापसव्यक्रमेणांशकलादौ सम्भवति तदग्रचिह्नसमाप्तिस्थाने ग्रहो देयः । तत्रापि ग्रहोच्चयोरन्तरं यत् सा दोर्ज्या । ग्रहतिर्यग्रेखयोरन्तरं कोटिज्या । इदं नीचोच्चवृत्तमन्त्य फलज्यया किल कृतम् । अस्मिन् ये भुजकोटिज्ये भवतः ते भुजफलकोटिफलरूपे । अथ कक्षावृत्तं त्रिज्यया रचितम् । अतः मृगादौ

कोटिः = मा लि = मा त + त लि = कोटिज्या + अन्त्यफलज्या

भुजः = भू लि = मा ल = भुजज्या

ग्रहकर्णः = भू मा = $\sqrt{(\text{मा लि})^2 + (\text{भू लि})^2}$

$= \sqrt{(\text{कोटिः})^2 + (\text{भुजः})^2}$

स्प = कक्षावृत्ते स्पष्टग्रहः म स्प = फलम्

कर्कटादिकेन्द्रे —

मि = कक्षावृत्ते मध्यमो ग्रहः मी = प्रतिवृत्ते मध्यमो ग्रहः

नी मी = केन्द्रभुजांशाः मी ला = केन्द्रभुजज्या

मी ली = केन्द्रकोटिज्या ता ली = अन्त्यफलज्या

कोटिः = मी ता = मी ली — ता ली = कोटिज्या — अन्त्यफलज्या

भुजः = ता भू = मी ला = भुजज्या

ग्रहकर्णः = भू मी = $\sqrt{(\text{मी ता})^2 + (\text{ता भू})^2}$

$= \sqrt{(\text{कोटिः})^2 + (\text{भुजः})^2}$

स्पा = कक्षावृत्ते स्पष्टग्रहः मि स्पा = फलम्

केन्द्रे त्रिज्याग्रादुपरि कोटिफलं भवति कर्कादावधः । अतस्तदैक्यान्तरं स्पष्टा कोटिः । एवं त्र्यस्रं भवति । तत्र नीचोच्चवृत्ते भुजज्यातुल्यो भुजः । भूमध्यग्रहयोरन्तरं कर्णः । दोःकोटिवर्गैक्यपदं स कर्ण इति प्रसिद्धम् । तत्रापि प्राग्वत् कक्षावृत्ते कर्णसूत्रसक्ते स्फुटो ग्रहो भवति । स्फुटमध्ययोरन्तरं फलम् ।* धनर्णं प्राग्वत् । उक्तं च गोलादेशे ।

नीचोच्चवृत्तभङ्गिः



---

* सिद्धान्तशिरोमणौ छेद्यकाधिकारे २४–२९ श्लोकानां वासनाभाष्ये भास्करोक्तोऽयं विषयः ।

उ मि नि म = कक्षावृत्तम्

भू = भूकेन्द्रम्

उ = कक्षावृत्त उच्चम्

नि = कक्षावृत्ते नीचम्

मकरादिकेन्द्रे —

म = कक्षावृत्ते मध्यमो ग्रहः

ऊ मा नी = म बिन्दुं केन्द्रं प्रकल्प्याऽन्त्यफलत्रिज्यया कृतं नीचोच्चवृत्तम्

ऊ = नीचोच्चवृत्त उच्चम्

नी = नीचोच्चवृत्ते नीचम्

मा = नीचोच्चवृत्ते मध्यमो ग्रहः

मा ल = भुजफलम्

म ल = कोटिफलम्

कोटिः = भू ल = भू म + म ल = त्रिज्या + कोटिफलम्

भुजः = मा ल = भुजफलम्

$$\text{ग्रहकर्णः} = \text{भू मा} = \sqrt{(\text{भू ल})^{२} + (\text{मा ल})^{२}}$$
$$= \sqrt{(\text{कोटिः})^{२} + (\text{भुजः})^{२}}$$

स्प = कक्षावृत्ते स्पष्टग्रहः　　म स्प = फलम्

कर्कटादिकेन्द्रे —

मि = कक्षावृत्ते मध्यमो ग्रहः

ऊ$_{१}$ नी$_{३}$ मी = मि बिन्दुं केन्द्रं प्रकल्प्याऽन्त्यफलत्रिज्यया कृतं नीचोच्चवृत्तम्

ऊ$_{१}$ = नीचोच्चवृत्त उच्चम्

नी$_{१}$ = नीचोच्चवृत्ते नीचम्

मी = नीचोच्चवृत्ते मध्यमो ग्रहः

मी ला = भुजफलम्

मि ला = कोटिफलम्

कोटिः = भू ला = भू मि — मि ला = त्रिज्या — कोटिफलम्

भुजः = मी ला = भुजफलम्

$$\text{ग्रहकर्णः} = \text{भू मी} = \sqrt{(\text{भू ला})^{२} + (\text{मी ला})^{२}}$$
$$= \sqrt{(\text{कोटिः})^{२} + (\text{भुजः})^{२}}$$

स्पा = कक्षावृत्ते स्पष्टग्रहः　　मि स्पा = फलम्

राशिक्रमानुसंरुद्धे मार्गे चेत् स्पष्टखेटतः ।।४२।।
यदा मध्यग्रहोऽग्रे चेत् तदा फलमृणं भवेत् ।
स्पष्टात् पूर्वं मध्यखेटे फलं तच्च धनं भवेत् ।।४३।। इति ।

(दामोदरीये गोलादेशे, स्पष्टगतिवासनाधिकारे)

अत्र शिरोमण्यादिषु स्वरसाद् मान्दे वृत्ते ग्रहः केन्द्रगत्या विलोमं भ्रमतीत्युक्तं । तथाप्यत्र ग्रन्थे सव्यभ्रमेण ग्रहचिह्नं कार्यं फलवैषम्याभावादिति ।

इति नीचोच्चवृत्तानुसारि च्छेद्यकम् ।

अथाङ्कवासना । एकपदे नव ज्याः साधिताः । ताः सूर्यस्य
परिधिभागैर्गुणिता भांशैर्भक्ता मान्दफलज्याः । तद्धनुर्मान्दं फलम् । एवं
साधिता मान्दा नव खण्डाः स्थापिताः । यथा । एकराशिज्या १७१९ ।
अत्राचार्येण सूर्यस्यौजयुग्मपरिधिभेदो न कृतः स्वल्पान्तरत्वात् । परि-
ध्यंशास्तु त्रयोदशांशास्त्रिचत्वारिंशद्घटिकाः १३।४३ स्वीकृताः ।

रवेर्मन्दपरिध्यंशा मनवः १४ शीतगो रदाः ३२ ।
युग्मान्ते विषमान्ते च नख२०लिप्तोनितास्तयोः ।।३४।।

(सूर्यसिद्धान्ते, स्पष्टाधिकारे)

इति भगवतोक्तविषमान्तपरिध्यंशेषु त्रिलिप्ताधिकाः परिध्यंशाः
१३।४३ । एभिर्गुणिता ज्या २३६०७।३६ भांशै३६०र्भक्ता । लब्धं फलम्
६५।३४ । तत्त्वयमादूनत्वात् स्वयमेव धनुः । जातं मान्दं फलम् ६५।३४ ।
अत्राचार्येण चतुस्त्रिंशत्पलत्यागापेक्षया षड्विंशतिपलसङ्ग्रहो युक्त
इति मत्वा षट्तर्का इत्युक्तम् । त्रिज्या ३४३८ परिध्यंशैर्गुणिता ।
४७१५७।५४ भांशैर्भक्ता लब्धा परमफलज्या १३०।५९ । अतः कुगुणेन्दव
अथ गतिफलवासना। अद्यतनश्वस्तनग्रहयोरन्तरं गतिः। अत एव ग्रहफलयोरन्तरं गतिफलं भवितुमर्हति। अथ तत्साधनम्। अद्यतनश्वस्तनकेन्द्रयोरन्तरं केन्द्रगतिः। भुजज्याकरणे यद्भोग्यखण्डं तेन सा गुण्या शरद्विदस्रै २२५ भाज्या। तत्र तावत् तात्कालिकभोग्यखण्डकरणायाऽनुपातः। यदि त्रिज्यातुल्यया कोटिज्ययाऽऽद्यं भोग्यखण्डं शरद्विदस्रतुल्यं लभ्यते तदेष्टया किमित्यत्र कोटिज्यायाः शरद्विदस्रा गुणस्त्रिज्या हरः। फलं तात्कालिकं स्फुटभोग्यखण्डं तेन केन्द्रगतिर्गुणनीया शरद्विदस्रै भाज्या। अत्र शरद्विदस्रमितयोर्गुणकभाजकयोस्तुल्यत्वान्नाशे कृते केन्द्रगतेः कोटिज्या गुणस्त्रिज्या हरः स्यात्। फलमद्यतनश्वस्तनकेन्द्रदोर्ज्ययोरन्तरं भवति। तत्फलकरणार्थं स्वपरिधिना गुण्यं भांशै ३६० र्भाज्यम्। पूर्वं किल गुणकः कोटिज्या सा यावत् परिधिना गुण्यते भांशैर्ह्रियते तावत् कोटिफलं जायत इत्युपपन्नं कोटीफलघ्नी मृदुकेन्द्रभुक्तिरित्यादि।

(सिद्धान्तशिरोमणौ, स्पष्टाधिकारे ३६–३८ श्लोकानां वासनाभाष्ये)

$$\text{केन्द्रगतिः} = \text{श्वस्तनकेन्द्रम्} - \text{अद्यतनकेन्द्रम्}$$

$$\text{केन्द्रज्यान्तरम्} = \frac{\text{केन्द्रगतिः} \times \text{भोग्यखण्डम्}}{\text{२२५}}$$

$$\text{तात्कालिकं भोग्यखण्डम्} = \frac{\text{२२५} \times \text{केन्द्रकोटिज्या}}{\text{त्रिज्या}}$$

$$\text{तात्कालिकं केन्द्रज्यान्तरम्} = \frac{\text{केन्द्रगतिः} \times \text{२२५} \times \text{केन्द्रकोटिज्या}}{\text{२२५} \times \text{त्रिज्या}}$$

$$= \frac{\text{केन्द्रगतिः} \times \text{केन्द्रकोटिज्या}}{\text{त्रिज्या}}$$

$$\text{गतिफलम्} = \frac{\text{तात्कालिकं केन्द्रज्यान्तरम्} \times \text{मन्दपरिधिः}}{\text{३६०}}$$

$$= \frac{\text{केन्द्रगतिः} \times \text{केन्द्रकोटिज्या} \times \text{मन्दपरिधिः}}{\text{त्रिज्या} \times \text{३६०}}$$

$$= \frac{\text{केन्द्रगतिः} \times \text{कोटिफलम्}}{\text{त्रिज्या}}$$

यदा कोटिज्या परमाऽर्थात् त्रिज्यामिता भवति तदा २२५ मितं भोग्यखण्डं भवति, तस्मात् स्वकीयया कोटिज्यया कियद् भोग्यखण्डं लभ्येतेति त्रैराशिकेन भास्करः स्फुटं भोग्यखण्डम् आनयतीति तदीयाल् लेखाद् अवगम्यते ।

अत्र कमलाकरो वदति— यदा ज्याया अभावस् तदा कोटिज्यायाः परमत्वं भोग्यखण्डस्याऽपि परमत्वम् इति भास्करेण यद् उक्तं तत्र वयं वदामः, ज्याया अभावे कोटिज्यायाः परमत्वं ज्यायाः परमत्वे च कोटिज्याया अभाव इति नियमम् अनुसृत्य कृतोऽनुपातः शुद्धं फलम् आनयति चेज् ज्याया अभावे कोट्युत्क्रमज्यायाः परमत्वं ज्यायाः परमत्वे कोट्युत्क्रमज्याया अभाव इति नियमम् अनुसृत्य किमिति अनुपातो न क्रियते ? अतो भास्करोक्तोऽयं नियमो न विद्वद्भिः सम्मान्य इति । यथा ।

शिरोमणौ ज्यकाभोग्यखण्डं स्पष्टं कृतं तु यत् ।
स्थूले सूक्ष्मत्वविश्वासात् तदर्थं किञ्चिदुच्यते ।।१७५।।
अन्वयव्यतिरेकाभ्यां चेत् स कोटेः क्रमज्यया ।
अनुपातः कथं नो स तदा कोट्युत्क्रमज्यया ।।१७६।।

(सिद्धान्ततत्त्वविवेके, स्पष्टाधिकारे ज्यानयनविधौ)

भास्करेण ज्यायास् तात्कालिकी गतिस् त्रिज्याभक्ता कोटिज्या भवतीति यत् कथितं तद् न समीचीनम् इति कमलाकरो वदति । सुधाकरस् तु तत् समी-

---

चीनं किन्तु भास्करस् तस्य सूत्रस्योपपत्ति न जानाति स्मेति वदति । अतस् तदर्थं किञ्चिद् उच्यते ।

समध्रुवकदम्बानामुपरि द्युचरान्नयेत् ।।४५।।
सूत्राणि वृत्तरूपाणि वलनानि तदन्तरे ।
अक्षजं वलनं मध्ये स्यात् समध्रुवसूत्रयोः ।।४६।।
कदम्बसमसूत्रान्तरायनं च त्रिभे ग्रहात् ।
कदम्बसमसूत्रान्तः स्फुटं सर्वदिशां च तत् ।।४७।।
अथवा परितः खेटात् खाङ्क९०भागान्तरे न्यसेत् ।
त्रिज्यावृत्तं ततस्तत्र विषुवत्समवृत्तयोः ।।४८।।
मध्येऽक्षवलनं विद्याद् विषुवत्क्रान्तिवृत्तयोः ।
अन्तरं चायनं क्रान्तिसमवृत्तान्तरे स्फुटम् ।।४९।।

(सिद्धान्तशिरोमणौ, ग्रहणवासनाधिकारे)

ग्रहगतसमप्रोतध्रुवप्रोतवृत्तयोर् अन्तर्वर्ती ग्रहत्रिज्यावृत्तगतश् चापोऽक्षवलनम् । ग्रहगतध्रुवप्रोतकदम्बप्रोतवृत्तयोर् अन्तर्वर्ती ग्रहत्रिज्यावृत्तगतश् चाप आयनवलनम् । ग्रहगतसमप्रोतकदम्बप्रोतवृत्तयोर् अन्तर्वर्ती ग्रहत्रिज्यावृत्तगतश् चापः स्पष्टवलनम् । अथवा । ग्रहत्रिज्यावृत्ते पूर्वापरनाडीवृत्तयोर् अन्तर्वर्ती चाप आयनचापोऽक्षवलनम् । ग्रहत्रिज्यावृत्ते नाडीक्रान्तिवृत्तयोर् अन्तर्वर्ती चापः स्पष्टवलनम् । वलनम् । ग्रहत्रिज्यावृत्ते पूर्वापरक्रान्तिवृत्तयोर् अन्तर्वर्ती चापः स्पष्टवलनम् । इति वलनपरिभाषा ।

यत् खस्वस्तिकगे रवौ भवलये दृग्वृत्तवत् संस्थिते
प्रत्यक्षं वलनं कुजे त्रिभयुतार्काग्रासमं दृश्यते ।
त्वं चेदुत्क्रमजीवयाऽनयसि तत् तादृक् सखे गोलविद्
मन्ये तद्धि मलं तदेव वलनं धीवृद्धिदाद्योदितम् ।।३८।।

(सिद्धान्तशिरोमणौ, चन्द्रग्रहणाधिकारे)

अथ दृष्टान्तः । यत्र किल वृषभान्तक्रान्तितुल्योऽक्षः २०।३८ । तत्र वृषभान्तस्थोऽर्को दिनार्धे खस्वस्तिके भवति । तदा क्रान्तिवृत्तं दृङ्मण्डलाकारं स्यात् । सत्रिगृहोऽर्को राशिपञ्चकं सिंहान्तः । स च तदा

क्षितिजे वर्तते । तत् प्राच्यपरयोरन्तरं क्षितिजे प्रत्यक्षं वलनं दृश्यते । सा च सिंहान्तस्याऽग्रा । तत् कथं सत्रिगृहार्कोत्क्रमक्रान्तिर्वलनम् । अतोऽसत् । अस्मदानयनं विना नेदमग्रारूपं वलनमुत्पद्यत इत्यर्थः ।

(सिद्धान्तशिरोमणौ, ग्रहणवासनाधिकारे)



ख = खस्वस्तिकः

पू = पूर्वस्वस्तिकः

प = पश्चिमस्वस्तिकः

पू द प उ = क्षितिजवृत्तम्

पू ख प = पूर्वापरवृत्तम्

सि ख मी कु = क्रान्तिवृत्तम्

ख = वृषभान्तः

कु = कुम्भान्तः

नि = निरक्षखस्वस्तिकः

द = दक्षिणसमस्थानम्

उ = उत्तरसमस्थानम्

द नि ख उ = याम्योत्तरवृत्तम्

पू नि प = नाडीवृत्तम्

सि = सिंहान्तः

मी = मीनान्तः (गोलसन्धिः)

पू सि चापः = सिंहान्तस्याऽग्राचापः

क्रान्तिज्यके कर्णगुणे विभक्ते
कोटया भुजेनाप्तमिताऽग्रका स्यात् ।
आद्यं द्वितीयं समशङ्कुः ।।२०।।

(सिद्धान्तशिरोमणौ, त्रिप्रश्नाधिकारे)

इति सूत्रेण

$$\text{अग्रा} = \frac{\text{क्रान्तिज्या} \times \text{त्रिज्या}}{\text{लम्बज्या}} \;\ldots\;\ldots\;\ldots\; (१)$$

जिनांशमौर्व्या१३९७ गुणितार्कदोर्ज्या
त्रिज्यो३४३८ द्धृता क्रान्तिगुणः ।।४७।।

(सिद्धान्तशिरोमणौ, स्पष्टाधिकारे)

इति सूत्रेण

$$\text{क्रान्तिज्या} = \frac{\text{सूर्यभुजज्या} \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

(१) समीकरणे क्रान्तिज्याया उत्थापनेन

$$\text{अग्रा} = \frac{\text{सूर्यभुजज्या} \times \text{परमक्रान्तिज्या}}{\text{लम्बज्या}}$$

$\text{सिंहान्तस्य ज्या} = \text{ज्या } १५० = \text{ज्या } (९० + ६०)$

इष्टांऽशकानां गगनाङ्क९०भागैः
समन्वितानां भवति ज्यका या ।
सा जायतेऽभीष्टलवोत्थकोज्या ।।२७।।

(पूर्णिमायाः ५५ अङ्के, १ पृष्ठे)

इति सूत्रेण

$\text{सिंहान्तस्य ज्या} = \text{वृषभान्तस्य कोज्या}$

अतः

$$\text{सिंहान्तस्याऽग्रा} = \frac{\text{वृषभान्तस्य कोज्या} \times \text{परमक्रान्तिज्या}}{\text{लम्बज्या}}$$

उपरि २५२ पृष्ठस्थे क्षेत्रे वृषभान्तस्थः सूर्यः खमध्ये वर्तते। खमध्याद् ध्रुवावधि लम्बांशा भवन्ति। ग्रहाद् ध्रुवावधि च द्युज्याचापांशा भवन्ति। खमध्यस्थे वृषभान्तस्थे सूर्ये द्युज्याचापांशा लम्बांशमिता भवन्ति। अतो वृषभान्तस्थे खमध्यगते सूर्ये

$$\text{सिंहान्तस्याऽग्रा} = \frac{\text{वृषभान्तस्य कोज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

क्षितिजे क्रान्तिनाडीवृत्तयोर् अन्तरालवर्तिनश् चापांशा आयनवलनांशा भवन्तीति पूर्वम् एव कथितम्। अतो वृषभान्तस्थे खमध्यगते सूर्ये

$$\text{आयनवलनज्या} = \frac{\text{वृषभान्तस्य कोज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

वृषभान्तस्य कोज्या = ज्या (९० — ६०) = ज्या ३०

अतः

वृषभान्तकोज्या = १७१९

वृषभान्तकोटयुत्क्रमज्या = उत्क्रमज्या ३० = ४६१

अतो ग्रहस्य कोटिज्या परमक्रान्तिज्यया गुणनीया द्युज्यया भक्तव्येत्यनेन सूत्रेण साधिताऽऽयनवलनज्या शुद्धा भवति ग्रहस्य कोटयुत्क्रमज्या परमक्रान्तिज्यया गुणनीया द्युज्यया भक्तव्येत्यनेन सूत्रेण साधिताऽऽयनवलनज्याऽशुद्धा भवतीति भास्करो वदति। इति प्रकारेण

युतायनांशोडुपकोटिशिञ्जिनी
जिनांशमौर्व्या१३९७ गुणिता विभाजिता ॥२१॥
द्युजीवया लब्धफलस्य कार्मुकं
भवेच्छशाङ्कायनदिक्कमायनम्।

(सिद्धान्तशिरोमणौ, चन्द्रग्रहणाधिकारे)

$$\text{आयनवलनज्या} = \frac{\text{ग्रहकोटिज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

इति स्वकीयसूत्रस्योपपत्तिम् अपि भास्करः प्रदर्शयति।

उत्क्रमज्यया साधितस्य वलनस्याऽसाधुत्वं भास्करेण बहुभिः प्रकारैः प्रदर्शितम् । तेषु प्रकारेष्वेकः प्रकारोऽस्माभिर् अत्र प्रदर्शितः । प्रकृतविषयस्योपपादनार्थं भास्करोक्तम् अन्यं प्रकारं च प्रदर्शयामः ।

द्युज्यावृत्तापवृत्तैक्ये न्यसेद् वा रविमण्डलम् ।
बिम्बाग्रे वलनं तद् यदन्तरं वृत्तयोस्तयोः ॥६९॥
विम्बान्तबिम्बमध्योत्थक्रान्तिमौर्व्योस्तदन्तरम् ।
अर्कदोर्भोग्यखण्डघ्नं बिम्बार्धं तत्त्वदस्र २२५ हृत् ॥७०॥
जिनज्याघ्नं त्रिभज्याप्तमेवं स्यादन्तरं हि तत् ।
विम्बार्धहृत् त्रिभज्याघ्नमेवं त्रिज्यागतं भवेत् ॥७१॥
गुणहारकबिम्बार्धत्रिज्यानाशे कृते सति ।
भोग्यखण्डं जिनांशज्यागुणं तत्त्वाश्विभाजितम् ॥७२॥
सत्रिभार्कात् क्रमक्रान्तेस्तत् तुल्यं जायतेऽथवा ।
क्रमक्रान्तेरिदं वीक्ष्य भ्रान्ति त्यजत बालिशाः ॥७३॥
नामितं छत्रवद्बिम्बं तिर्यक् क्रान्तिस्तु सा समा ।
अत्र द्युज्याऽनुपातो यस्तत्तिर्यक्करणाय सः ॥७४॥

क्रान्तिवृत्तेऽर्कस्थानेऽर्कबिम्बं मुद्रिकाकारं विन्यस्य बिम्बपरिधौ यत्र स्वाहोरात्रवृत्तं लग्नं यत्र च क्रान्तिवृत्तं तयोरन्तरं यद् दक्षिणोत्तरं तत् तत्र बिम्बे प्राच्यपरयोर्वलनम् । तच्चार्कक्रान्तेर्बिम्बार्धकलायुततत् तत्र बिम्बे प्राच्यपरयोर्वलनम् ।

क्रान्तिवृत्तेऽर्कस्थानेऽर्कबिम्बं मुद्रिकाकारं विन्यस्य बिम्बपरिधौ यत्र स्वाहोरात्रवृत्तं लग्नं यत्र च क्रान्तिवृत्तं तयोरन्तरं यद् दक्षिणोत्तरं तत् तत्र बिम्बे प्राच्यपरयोर्वलनम् । तच्चार्कक्रान्तेर्बिम्बार्धकलायुतक्रान्तेश्चान्तरम् ।

उपरि २५२ पृष्ठस्थे क्षेत्रे वृषभान्तस्थः सूर्यः खमध्ये वर्तते । खमध्याद् ध्रुवावधि लम्बांशा भवन्ति । ग्रहाद् ध्रुवावधि च द्युज्याचापांशा भवन्ति । खमध्यस्थे वृषभान्तस्थे सूर्ये द्युज्याचापांशा लम्बांशमिता भवन्ति । अतो वृषभान्तस्थे खमध्यगते सूर्ये

$$\text{सिंहान्तस्याऽग्रा} = \frac{\text{वृषभान्तस्य कोज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

क्षितिजे क्रान्तिनाडीवृत्तयोर् अन्तरालवर्तिनश् चापांशा आयनवलनांशा भवन्तीति पूर्वम् एव कथितम् । अतो वृषभान्तस्थे खमध्यगते सूर्ये

$$\text{आयनवलनज्या} = \frac{\text{वृषभान्तस्य कोज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

वृषभान्तस्य कोज्या = ज्या (९० — ६०) = ज्या ३०

अतः

वृषभान्तकोज्या = १७१९

वृषभान्तकोटयुत्क्रमज्या = उत्क्रमज्या ३० = ४६१

अतो ग्रहस्य कोटिज्या परमक्रान्तिज्यया गुणनीया द्युज्यया भक्तव्येत्यनेन सूत्रेण साधिताऽऽयनवलनज्या शुद्धा भवति ग्रहस्य कोटयुत्क्रमज्या परमक्रान्तिज्यया गुणनीया द्युज्यया भक्तव्येत्यनेन सूत्रेण साधिताऽऽयनवलनज्याऽशुद्धा भवतीति भास्करो वदति । इति प्रकारेण

युतायनांशोडुपकोटिशिञ्जिनी
जिनांशमौर्व्या१३९७ गुणिता विभाजिता ।।२१।।
द्युजीवया लब्धफलस्य कार्मुकं
भवेच्छशाङ्कायनदिक्कमायनम् ।

(सिद्धान्तशिरोमणौ, चन्द्रग्रहणाधिकारे।

$$\text{आयनवलनज्या} = \frac{\text{ग्रहकोटिज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

इति स्वकीयसूत्रस्योपपत्तिम् अपि भास्करः प्रदर्शयति ।

उत्क्रमज्यया साधितस्य वलनस्याऽसाधुत्वं भास्करेण बहुभिः प्रकारैः प्रदर्शितम् । तेषु प्रकारेष्वेकः प्रकारोऽस्माभिर् अत्र प्रदर्शितः । प्रकृतविषयस्योपपादनार्थं भास्करोक्तम् अन्यं प्रकारं च प्रदर्शयामः ।

द्युज्यावृत्तापवृत्तैक्ये न्यसेद् वा रविमण्डलम् ।
बिम्बाग्रे वलनं तद् यदन्तरं वृत्तयोस्तयोः ॥६९॥
बिम्बान्तबिम्बमध्योत्थक्रान्तिमौर्व्योस्तदन्तरम् ।
अर्कदोर्भोग्यखण्डघ्नं बिम्बार्धं तत्त्वदस्र २२५ हृत् ॥७०॥
जिनज्याघ्नं त्रिभज्याप्तमेवं स्यादन्तरं हि तत् ।
बिम्बार्धहृत् त्रिभज्याघ्नमेवं त्रिज्यागतं भवेत् ॥७१॥
गुणहारकबिम्बार्धत्रिज्यानाशे कृते सति ।
भोग्यखण्डं जिनांशज्यागुणं तत्त्वाश्विभाजितम् ॥७२॥
सत्रिभार्कात् क्रमक्रान्तेस्तत् तुल्यं जायतेऽथवा ।
क्रमक्रान्तेरिदं वीक्ष्य भ्रान्तिं त्यजत बालिशाः ॥७३॥
नामितं छत्रवद्बिम्बं तिर्यक् क्रान्तिस्तु सा समा ।
अत्र द्युज्याऽनुपातो यस्तत्तिर्यक्करणाय सः ॥७४॥

क्रान्तिवृत्तेऽर्कस्थानेऽर्कबिम्बं मुद्रिकाकारं विन्यस्य बिम्बपरिधौ यत्र स्वाहोरात्रवृत्तं लग्नं यत्र च क्रान्तिवृत्तं तयोरन्तरं यद् दक्षिणोत्तरं तत् तत्र बिम्बे प्राच्यपरयोर्वलनम् । तच्चार्कक्रान्तेर्बिम्बार्धकलायुतस्यार्कस्य क्रान्तेश्चान्तरम् । अतस्तस्याऽनयनम् । रविदोर्ज्यायां क्रियमाणायां यद् भोग्यखण्डं तेन मानार्धकला गुण्याः शरद्विदस्रैः २२५ भज्याः । फलं दोर्ज्ययोरन्तरं स्यात् । तत्र तावत् स्फुटभोग्यखण्डज्ञानायाऽनुपातः । यदि त्रिज्यातुल्यायां कोटौ प्रथमं ज्यार्धं शरद्विदस्रा भोग्यखण्डं तदाऽभिमतायामस्यां किमिति । फलं स्फुटं भोग्यखण्डम् । तेन गुणितं बिम्बार्धं शरद्विदस्रैर्भाज्यम् । एवं स्थिते शरद्विदस्रमितयोर्गुणहरयोर्नाशे कृते बिम्बार्धस्य कोटिज्या गुणस्त्रिज्या हरः । फलं दोर्ज्ययोरन्तरम् । ततः क्रान्त्यर्थमनुपातः । यदि त्रिज्यया जिनज्या लभ्यते तदाऽनेन दोर्ज्यान्तरेण किमिति । फलं क्रान्तिज्यान्तरम् । तद

बिम्बव्यासार्धवृत्ते वलमम् । अथान्योऽनुपातः । यदि बिम्बव्यासार्धवृत्त एतावद् वलनं तदा त्रिज्याव्यासार्धवृत्ते किमिति । अत्र त्रिज्यातुल्ययोर्गुणहरयोस्तथा बिम्बार्धमितयोश्च तुल्यत्वान्नाशे कृते कोटिज्याया जिनांशज्या गुणस्त्रिज्या हरः । फलं कोटिक्रमक्रान्तिज्या । तत् त्रिज्यावृत्ते वलनम् । एवं विषुवद्वृत्तस्थित एव ग्रहे । यतो भूमध्यात् खस्वस्तिकस्थबिम्बमध्यं प्रति यत् सूत्रं नीयते तत् त्रिज्यासूत्रं दण्डवत् । तदुपरिस्थं बिम्बं छत्रवत् समन्तात् सममेव । यत् तत्परितस्त्रिज्यावृत्तं यत्र च वलनज्या देया तदपि भूसममेव स्थितम् । अतस्तत्र यथागतमेव वलनम् । यदा किल मेषान्ते ग्रहस्तदा तत्क्रान्त्या खस्वस्तिकादुत्तरे नतं बिम्बं स्यात् । त्रिज्यासूत्रं तदा कर्णरूपम् । बिम्बमध्याच्च लम्बसूत्रं ध्रुवयष्टयग्रं द्युज्या । सा तत्र कोटिः । क्रान्तिज्या भुजः । यथा किञ्चित् कर्णस्थितया धृते दण्डे छत्रमपि तत्स्पर्धिन्यां दिशि कर्णरूपं भवति । तत्र वलनज्ययाऽपि कर्णरूपिण्या भवितव्यम् । यत् पूर्वमानीतं क्रान्त्यन्तरं लम्बसूत्रप्रतिस्पर्धि तत् कोटिरूपं जातम् । तस्य कर्णकरणायाऽनुपातः यदि द्युज्याकोट्या त्रिज्याकर्णस्तदाऽनया किमिति । पूर्वं कोटिज्याया जिनज्या गुणस्त्रिज्या हरः । इदानीं त्रिज्या गुणो द्युज्या हरः । अत्रापि त्रिज्यातुल्ययोर्गुणहरयोर्नाशे कृते कोटिज्या जिनज्यागुणा द्युज्यया भक्ता वलनं स्यादित्युपपन्नम् ।

(सिद्धान्तशिरोमणौ, ग्रहणवासनाधिकारे)

सिद्धान्ततत्त्वविवेकस्य सूर्यग्रहणाधिकारस्य २८४ श्लोकस्य व्याख्यायां कोपाख्येन मुरलीधरेण लिखितां टिप्पणीं दृष्ट्वाऽत्र क्षेत्रे रचिते । यथा—

व सू डी ध्रु = सूर्योपरिगतं ध्रुवप्रोतवृत्तम्
अ सू = अहोरात्रवृत्तस्य चतुर्थोऽशः
ना डी वृ = नाडीवृत्तम्
क्रा सू = क्रान्तिवृत्तस्य चतुर्थोऽशः
सू = अहोरात्रक्रान्तिवृत्तयोः सम्पातबिन्दुः = सूर्यकेन्द्रम्
यो सू = सू बिन्दोः ध्रुवप्रोतवृत्तस्पर्शरेखा
सू डी चापः = सू भू डी कोणः = सू यो भू कोणः = सूर्यक्रान्त्यंशाः
व सू चापः = सू भू यो कोणः = द्युज्याचापांशाः


डी
सू
वृ
ध्रु
भू
अ
ना
क्रा
व
यो



सू = अहोरात्रक्रान्तिवृत्तयोः सम्पातबिन्दुः = सूर्यकेन्द्रम्

स्प क्रा अ र्श = सू बिन्दौ गोलस्पर्शकरं धरातलं विरचय्य तस्मिन् धरातले सू बिन्दुम् एव केन्द्रं प्रकल्प्य सूर्यबिम्बदलरूपया त्रिज्यया कृतं वृत्तम् ।

सू क्रा = सू बिन्दोः क्रान्तिवृत्तस्पर्शरेखा

सू अ = सू बिन्दोर् अहोरात्रवृत्तस्पर्शरेखा

स्प र्श = सू बिन्दोर् ध्रुवप्रोतवृत्तस्पर्शरेखा

क्रा सू अ कोणः = आयनवलनांशाः

क्रा = सूर्यबिम्बप्रान्तः

सू बिन्दोर् नाडीवृत्तधरातलोपरि कृता लम्बरेखा सूर्यबिम्बमध्यस्य क्रान्तिज्या भवति ।

$$\text{सूर्यबिम्बमध्यक्रान्तिज्या} = \frac{\text{सूर्यभुजांशज्या} \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

$$= \frac{\text{ज्या सू} \times \text{ज्या प}}{\text{त्रि}}$$

क्रा बिन्दोर् नाडीवृत्तधरातलोपरि कृता लम्बरेखा सूर्यबिम्बप्रान्तस्य क्रान्तिज्या भवति ।

$$\text{सूर्यबिम्बप्रान्तक्रान्तिज्या} = \frac{(\text{सूर्यबिम्बदलसहितस्य सूर्यभुजांशस्य ज्या}) \times \text{परमक्रान्तिज्या}}{\text{त्रिज्या}}$$

$$= \frac{\text{ज्या }(\text{सू} + \text{वि}) \times \text{ज्या प}}{\text{त्रि}}$$

यत्र वि = सूर्यबिम्बदलमानम्

$$\text{सूर्यबिम्बप्रान्तक्रान्तिज्या} - \text{सूर्यबिम्बमध्यक्रान्तिज्या} = \frac{\text{ज्या प}}{\text{त्रि}}\left[\text{ज्या }(\text{सू} + \text{वि}) - \text{ज्या सू}\right]$$

सूर्यबिम्बप्रान्त–सूर्यबिम्बमध्यक्रान्तिज्ययोर् अन्तरं कोटिः, सूर्यबिम्बप्रान्तजाऽऽयनवलनज्या कर्णः, कोटिकर्णयोर् मूलगताऽहोरात्रवृत्तधरातलस्था रेखा भुज इत्येकं जात्यत्रिभुजम् उत्पद्यते । कोटिकर्णयोर् अन्तर्गतः कोणः सू यो, भू यो रेखयोर् योगेन सञ्जातेन यो बिन्दुगतेन कोणेन तुल्यो भवति । यतः कर्णरेखा सू यो रेखायाः समानान्तरा, कोटिरेखा च भू यो रेखायाः समानान्तरा वर्तते ।

दशमी प्रतिज्ञा

रेखाद्वय्याः संयुतायाः समेतं रेखायुग्मं चेत् समानान्तरं स्यात् ।
रेखाद्वय्योर् एतयोः संयुतिभ्यां जातौ कोणौ तुल्यमानौ भवेताम् ।।
रेखाद्वय्योर् अत्र नाऽवश्यकः स्याद् एकत्रैव क्ष्मातले संनिवासः ।
(रेखागणिते, ११ अध्याये)

अत्र यो बिन्दुगतकोणश्च सूर्यक्रान्तिसमः । अतः पूर्वोक्ते जात्यत्रिभुजे भुजकर्णाभ्याम् उत्पन्नः कोटिसम्मुखः कोणः द्युज्याचापांशमितो भवति । अतः

शिञ्जिन्यः कोणसञ्जाताः साकं दोर्भिः स्वसंमुखैः ।
भजन्ते समनिष्पत्ति क्षेत्रे जाते त्रिभिर् भुजैः ।।५५।।
(पूर्णिमायाः ५५ अङ्के, ११ पृष्ठे)

इत्यनेन सूत्रेण

सूर्यबिम्बप्रान्तजाऽऽयनवलनज्या

$$= (\text{सूर्यबिम्बप्रान्तक्रान्तिज्या} - \text{सूर्यबिम्बमध्यक्रान्तिज्या}) \times \frac{\text{त्रिज्या}}{\text{द्युज्या}}$$

$$= \frac{\text{ज्या प}}{\text{त्रिज्या}} [\text{ज्या } (\text{सु} + \text{वि}) - \text{ज्या सू}] \times \frac{\text{त्रिज्या}}{\text{द्युज्या}}$$

$$= \frac{\text{ज्या प}}{\text{द्युज्या}} [\text{ज्या } (\text{सु} + \text{वि}) - \text{ज्या सू}]$$

एषाऽऽयनवलनज्या बिम्बप्रान्तगता सम्पन्ना । अपेक्षिता तु त्रिज्यावृत्तगताऽस्ति । अतः

त्रिज्यावृत्तगताऽऽयनवलनज्या

$$= \frac{\text{ज्या प}}{\text{द्युज्या}} [\text{ज्या } (\text{सु} + \text{वि}) - \text{ज्या सू}] \times \frac{\text{त्रि}}{\text{वि}}$$

$$\text{पूर्वं साधिताऽऽयनवलनज्या} = \frac{\text{सूर्यकोटिज्या} \times \text{परमक्रान्तिज्या}}{\text{द्युज्या}}$$

$$= \frac{\text{कोज्या सू} \times \text{ज्या प}}{\text{द्युज्या}}$$

अतः

$$\frac{\text{ज्या प} \times [\text{ज्या } (\text{सु} + \text{वि}) - \text{ज्या सू}] \times \text{त्रि}}{\text{द्युज्या} \times \text{वि}} = \frac{\text{कोज्या सू} \times \text{ज्या प}}{\text{द्युज्या}}$$

$$\text{कोज्या सू} = \frac{[\text{ज्या } (\text{सु} + \text{वि}) - \text{ज्या सू}] \times \text{त्रि}}{\text{वि}}$$

अतः

$$\frac{\text{ज्या } (\text{सू} + \text{वि}) - \text{ज्या सू}}{\text{वि}} = \frac{\text{कोज्या सू}}{\text{त्रि}}$$

एतद् रूपं च सुधाकरस्य चलनकलनस्य १२ पृष्ठाद् उपर्युद्धृतेन सूत्रेण साम्यं भजते । अतो भास्करोऽस्य सूत्रस्योपपत्तिं न जानाति स्मेति सुधाकरोक्तिर् विदुषां मनोग्राहिणी भवितुं नार्हति । कमलाकरस् तु द्वेषबुद्ध्याऽबुद्ध्वैव कथितवानिति स्फुटीभवति ।

सूर्योनचन्द्रार्क१२लवाद् गताः स्यु-
स्तिथ्योऽवशिष्टोनपपी१२विलिप्ताः ।
गत्यन्तराप्ता घटिकाः स्युरेष्या
वारः समाद्याढ्यगणाद्रि७शेषात् ॥१२॥

अथ पञ्चाङ्गानयनं विवक्षुस्तदन्यतमतिथिसाधनमाह । सूर्योनचन्द्रार्कलवादिति । आदित्यस्पष्टेन ऊनितश्चन्द्रश्चन्द्रस्पष्टस्तस्यार्कलवाद् द्वादशभागाल्लब्धा गतास्तिथयः स्युः । तद्द्वितीया वर्त्तमाना तिथिः । तस्या एष्यघटीसाधनमाह । अवशिष्टं द्वादशभक्तशेषं तेनोना पपीः द्वादश तस्य विलिप्ता विकला गत्योः सूर्यचन्द्रयोर्गत्योरन्तरेण विवरेण आप्ता भक्ता एष्या भोग्या घटिकाः स्युः । द्वादशभक्तशेषस्य विकला गत्यन्तरभक्ता भुक्ता घटिका भवन्ति । ताः षष्टिशुद्धा गतविकला तिथिविश्रामकालः स्यात् ।

अथ वारसाधनमाह । समादिः वर्षादिस्तेन तद्दिनजवारसङ्ख्यया आढ्यः युक्तः गणः अहर्गणः तस्य अद्रयः सप्त तैः शेषाद् वारः सूर्यात् क्रमेण वारः स्यादिति ।

अत्रोपपत्तिः । दर्शान्तकाले सूर्यचन्द्रौ राश्यादिभिस्तुल्यौ । दर्शान्ताद्दर्शान्तं यावच्चान्द्रमासः । तत्र त्रिंशत् तिथयः ।

रवीन्द्वोर्युतेः संयुतिर्यावदन्या
विधोर्मास एतच्च पैत्रं द्युरात्रम् ॥१६॥
(सिद्धान्तशिरोमणौ, कालमानाध्याये)

इति भास्करीयात् । चन्द्रस्य गतिबाहुल्यात् सूर्यात् तस्याग्रे गमनात् सूर्योनचन्द्र इत्युक्तम् । यदि तिथीनां त्रिंशता ३० अर्कोनचन्द्रचक्रांशा ३६० लभ्यन्ते तदैकया किमिति फलं द्वादश । स तिथिहरो जातः । अतोऽर्कलवादित्युक्तम् । यच्छेषं तद् गतभागाः । तद् द्वादशपतितं भोग्यभागाः । अतोऽनुपातः । सूर्यचन्द्रगत्यन्तरतुल्याभिर्गता गम्या वा षष्टिघटिका लभ्यन्ते तदाऽऽभिः किमिति फलं गता गम्या वा घटिकाः स्युरिति । अतः गत्यन्तराप्ता इति । अथाऽहर्गणस्य मेषार्कदिनात्

साधितत्वाद् मेषार्कदिनजवारयुक्तोऽहर्गणः वारो भवितुमर्हति । अतः समाद्याढचगणाद्रिशेषादिति ।

अत्रोदाहरणम् । स्पष्टसूर्यः ३५९।३६।३४ गतिः ५८।५१ स्पष्टचन्द्रः २४९।५१।५९ गतिः ७२२।१५ सूर्योनचन्द्रः २५०।१५।२५ द्वादशभक्तः । लब्धाः तिथयः २० । कृष्णपक्षस्य पञ्चमी भुक्ता षष्ठी भोग्या । शेषं १०।१५।२५ द्वादश १२ शुद्धम् १।४४।३५ वारद्वयं षष्टचा सवर्णितम् ६२७५ तद् भाज्यम् । सूर्यचन्द्रयोर्गत्यन्तरम् ६६३।२४ स हरः । हरस्य सावयवत्वाद् भाज्यः षष्टिगुणितः ३७६५०० हरश्च षष्टिगुणितः ३९८०४ । हरेण भक्तं लब्धं षष्ठीतिथेर्भोग्यघटचः ९ । शेषं १८२६४ षष्टिगुणं १०९५८४० हरेण भक्तं पलानि २७ । वैशाखकृष्णषष्ठीघटचः ९।२७ सोमवासरे । अथ भुक्तघटीसाधनम् । द्वादशभक्तशेषं १०।१५।२५ वारत्रयं षष्टिसवर्णितं भाज्यः २२१५५०० । हरेण ३९८०४ भक्तं लब्धं षष्ठीभुक्तघटचः ५५।३९ । अतः सूर्यवासरे पञ्चमीघटचः ४।२१ इति ।*

---

* अत्र गणितम् ।

स्पष्टसूर्यः = ३५९ । ३६ । ३४ (अंशादिः)
(अस्यैवाधिकारस्य ६$\frac{१}{२}$ श्लोकस्य प्रक्रियायाम्)
सूर्यस्य स्पष्टा गतिः = ५८ । ५१ (कलादिः)
(अस्यैवाधिकारस्य ११ श्लोकस्य प्रक्रियायाम्)
स्पष्टचन्द्रः = २४९ । ५१ । ५९ (अंशादिः)
(अस्यैवाधिकारस्य १० श्लोकस्य प्रक्रियायाम्)
चन्द्रस्य स्पष्टा गतिः = ७२२ । १५ (कलादिः)
(अस्यैवाधिकारस्य ११ श्लोकस्य प्रक्रियायाम्)

अं क वि	क वि
२४९।५१।५९	७२२।१५
(—) ३५९।३६।३४	(—) ५८।५१
२५०।१५।२५ सूर्योनचन्द्रः	६६३।२४ सूर्याचन्द्रमसोर् गत्यन्तरम्

---

१२)२५०।१५।२५(२० गततिथिसङ्ख्या
२४०
१०।१५।२५ शेषम्

कृष्णपक्षस्य पञ्चमी तिथिर् गता, षष्ठी तिथिश् च वर्तमाना वर्तते ।

$$\text{१२} - (\text{१०।१५।२५}) = \text{१।४४।३५ (अंशादिः)}$$
$$= \text{१०४।३५ (कलादिः)}$$

$$\text{षष्ठ्या भोग्यं घट्यादिकम्} = \frac{(\text{१०४।३५})\times\text{६०}}{\text{६६३।२४}} = \frac{\text{६२७५}\times\text{६०}}{\text{३९८०४}}$$
$$= \frac{\text{६२७५}\times\text{५}}{\text{३३१७}} = \frac{\text{३१३७५}}{\text{३३१७}}$$
$$= \text{९।२७ (स्वल्पान्तरेण)}$$

$$\text{पुनः १०।१५।२५ (अंशादिः)} = \text{६१५।२५ (कलादिः)}$$

$$\text{षष्ठ्या भुक्तं घट्यादिकम्} = \frac{(\text{६१५।२५})\times\text{६०}}{\text{६६३।२४}} = \frac{\text{३६९२५}\times\text{६०}}{\text{३९८०४}}$$
$$= \frac{\text{३६९२५}\times\text{५}}{\text{३३१७}} = \frac{\text{१८४६२५}}{\text{३३१७}}$$
$$= \text{५५।३९ (स्वल्पान्तरेण)}$$

३३१७)३१३७५(९।२७
२९८५३
१५२२ × ६०
९१३२०
६६३४
२४९८०
२३२१९
७६१

३३१७)१८४६२५(५५।३९
१६५८५
१८७७५
१६५८५
२१९०

२१९० × ६०
१३१४००
९९५१
३१८९०
२९८५३
२०३७

$$\overset{\text{घ}}{\text{६०}} - (\overset{\text{घ}}{\text{५५}}\,।\,\overset{\text{प}}{\text{३९}}) = \overset{\text{घ}}{\text{४}}\,।\,\overset{\text{प}}{\text{२१}}$$

चरार्द्धदेशान्तरयोः स्वजाता-
वैक्यं विजातौ विवरं त्वनेन ।
परिष्कृताः षष्टि६०कला दिनेश-
लिप्ताः स्वदेशे गणितागमोक्ताः ।।१३।।

अथ वारप्रवेशकालसाधनमाह । चरार्द्धदेशान्तरयोरिति । तद्दिनजचरार्द्धतद्देशजदेशान्तरयोः स्वजातौ एकजातौ ऐक्यं योगः विजातौ भिन्नजातौ विवरम् अन्तरं कार्यम् । अनेन परिष्कृता ऋणशेषे हीना धनशेषे युक्ताः षष्टिकलाः षष्टिघटयः स्वदेशे चरदेशान्तरसम्बन्धिनि देशे दिनेशस्य दिनाधिपतेः लिप्ता घटयः स्युः । गणितस्य आगम आम्नायः तस्मिन् उक्ताः कथिताः इति । उक्तं च शिरोमणौ (मध्यमाधिकारे, मध्यगतिसाधनाधिकारे) ।

अर्कोदयादूर्ध्वमधश्च ताभिः
प्राच्यां प्रतीच्यां दिनपप्रवृत्तिः ।
ऊर्ध्वं तथाधश्चरनाडिकाभी
रवावुदग्दक्षिणगोलयाते ।।६।। इति ।

ताभिः देशान्तरघटीभिरिति ।

अत्रोपपत्तिः ।

वारप्रवृत्तिः सर्वेषां लङ्कायां भास्करोदयात् ।।

इति सोमसिद्धान्तोक्तत्वात् । रेखादेशात् पूर्वस्यां दिशि क्षितिजाद् रेखादेशजोन्मण्डलस्योर्ध्वस्थितत्वात् स्वदेशजसूर्योदयादनन्तरं रेखादेशार्कोदयो भवति । अतः पूर्वदेशे देशान्तरं धनम् । पश्चिमदेशे क्षितिजमण्डलादधः रेखादेशजोन्मण्डलस्य स्थितत्वात् स्वदेशजसूर्योदयात् पूर्वं रेखादेशे सूर्योदयो भवति । अतः पश्चिमायाम् ऋणम् । इदं पूर्वापरान्तरम् । दक्षिणोत्तरान्तरं तु उत्तरगोले क्षितिजादुन्मण्डलस्य

ऊर्ध्वस्थितत्वाच्चरं धनम् । याम्यगोले क्षितिजादध उन्मण्डलम् । तत्र चरमृणम् । स्वदेशजसूर्योदयाल्लङ्कादेशजसूर्योदयज्ञानं तु चरदेशान्तराभ्याम् । अतश्चरार्द्ध देशान्तरयोरित्यादि । महादेवस्तु देशान्तरमात्रेण दिनपस्य प्रवृत्ति प्राह । तत्तु रेखादेशजलङ्कादेशजसूर्योदयकालयोरैक्यं यदा नित्यं स्यात् तदा स्यात् । नहि रेखादेशजक्षितिजवदुन्मण्डलं वक्तुं शक्यं तत्र चरान्तरस्य जागरूकत्वात् । ननु ।

> वारप्रवृत्तिः प्राग्देशे क्षपार्द्धेऽभ्यधिके भवेत् ।
> तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत् ॥६६॥
> (सूर्यसिद्धान्ते, मध्यमाधिकारे)

इति भगवद्वचनाद् रात्र्यर्द्धादूर्ध्वमध एव वारप्रवृत्तिर्भवतीति वक्तुमुचितमिति चेत् सत्यं तद्वचनं रोमकाभिप्रायम् । लङ्कायां सूर्योदये रोमके रात्र्यर्द्धमेव । उक्तं च ।

> लङ्कापुरेऽर्कस्य यदोदयः स्यात्
> तदा दिनार्धं यमकोटिपुर्याम् ।
> अधस्तदा सिद्धपुरेऽस्तकालः
> स्याद् रोमके रात्रिदलं तदैव ॥४४॥ इति ।
> (सिद्धान्तशिरोमणी, भुवनकोशे)

किञ्च तस्यार्थः टोडरानन्दे व्यवहारसौख्ये कृतरतद्यथा । अत्र पञ्चदशनाड्यात्मकः सौरक्षपार्द्धशब्देनाहोरात्रचतुर्भाग उच्यते । तदित्यनेन लङ्कार्द्धसावनः । तथा च देशान्तरनाडीभिरधिके क्षपार्द्धे देशान्तरनाडीयुक्तरात्रस्य मिश्रसंज्ञकस्य परामर्शस्तस्मात् कालो मध्यरेखापूर्वभागे वारक्षपार्द्धमितनाडीभिः पूर्वस्याम् अर्थादेवं देशान्तरनाडीभिरूने क्षपार्द्धे सति मिश्रकाप्रवृत्तिः । एवं पश्चाद्देशे चरार्द्धसंस्कारो मिश्रमध्येऽन्तर्भूतभिर्वारप्रवृत्तिरिति भावः । अत्र कालहोरानयनार्थमेव । उक्तं च इति । एतच्च वारप्रवृत्तिज्ञानं वसिष्ठसिद्धान्ते ।

वारप्रवृत्तिविज्ञानं क्षणवारार्थमेव तु ।
अखिलेष्वन्यकार्येषु दिनादिरुदयाद् भवेत् ॥१३॥ इति
(वसिष्ठसंहितायां, वारस्वरूपाध्याये)

अन्यदखिलं वारप्रयुक्तं कर्म सूर्योदयादेव कर्त्तव्यमिति सर्वसिद्धान्तमतम् । उक्तं पुलस्त्यसिद्धान्ते ।

अथ सावनमानेन वासराः सप्त कीर्तिताः ।
ते चार्कोदययोरेव विवरं तु समाश्रिताः ॥ इति ।

जगन्मोहने सोमसिद्धान्तेऽपि ।

उदयति दिननाथे वारपस्य प्रवृत्तिर्भवति ॥ इति

अत्रोदाहरणम् । पूर्वसाधितदेशान्तरं घट्यादि धनम् १।६।० । उत्तरगोले सूर्यसत्त्वाच्चरपलं धनम् ० । ४१ उभयोरेकजातित्वाद् योगः १।४७ । धनत्वादनेन युक्ताः षष्टि ६० घटिका मेषार्कदिनजसोमवारस्य प्रवृत्तिकालः ६१।४७ । स एवादित्यवारस्य विरामकालः ६१।४७ ।

विधोः सार्कचन्द्रस्य लिप्ताः खखेभै ८००
र्विभक्ता गतौ स्तो भयोगौ च शेषे ।
क्रमाद्धार८००शुद्धे खषड्६०घ्ने स्वगत्या
जवैक्येन भक्ते तदेष्याः कलाः स्युः ॥१४॥

अथ नक्षत्रयोगसाधनमाह । विधोरिति । चन्द्रस्य सार्कचन्द्रस्य सूर्ययुक्तचन्द्रस्य च लिप्ता घटिकाः कार्याः । खखेभैः अष्टशतैर्विभक्ता भाजिताः सत्यः गतौ भुक्तौ भयोगौ नक्षत्रयोगौ स्तः भवतः । अवशेषे अष्टशतभक्तशेषद्वयं हारशुद्धे अष्टशताच्छोधिते खषड्घ्ने षष्टिगुणिते स्वगत्या चन्द्रगत्या जवैक्येन सूर्यचन्द्रगतियोगेन भक्ते भाजिते क्रमाद् नक्षत्रयोगक्रमात् तयोरेष्या भोग्याः कलाः लिप्ताः स्युरिति । एतदुक्तं भवति । चन्द्रस्पष्टं कलामयं कृत्वा तत्र ऽष्टशतभक्ते लब्धं भुक्तनक्षत्रम् । तद्द्वितीयं वर्त्तमानभम् । तस्य भोग्यघटीसाधनार्थं हराच्छोधितशेषं

षष्टचा गुणयित्वा चन्द्रगत्या भक्तम् । लब्धाः तस्य नक्षत्रस्य भोग्यघटचो भवन्ति । एवं सूर्यचन्द्रयोर्योगं कलामयं कृत्वा तत्राष्टशतैर्भक्तं लब्धो भुक्तयोगः । तद्द्वितीयो वर्त्तमानयोगः । हराच्छोधितस्य शेषं षष्टचा गुणितं सूर्यचन्द्रयोर्गतियोगेन भक्तम् । लब्धा योगस्य भोग्यघटिकाः स्युरित्यर्थः ।

अत्रोपपत्तिः । द्वादशराशिभिः सप्तविंशतेर्नक्षत्राणां तावन्मितानां योगानां च भोगः । अतश्चक्रकलाः २१६०० भाज्यः नक्षत्रयोगमितिर्हरः । हरेण भक्ते भाज्ये लब्धमष्टशतमतः खखेभैर्विभक्ता इत्युक्तम् । ततोऽनुपातः । चन्द्रगतितुल्याभिः चन्द्रसूर्यगतियोगतुल्याभिर्वा कलाभिः षष्टिघटिका लभ्यन्ते तदा आभिः गताभिर्गम्याभिर्वा कलाभिः का इति नक्षत्रयोगघटिकाः क्रमाल्लभ्यन्ते । अतः स्वगत्या जवैक्येन भक्त इत्युक्तम् ।

उदाहरणम् । सूर्यस्पष्टः ३५९।३६।३४ गतिः ५८।५१ चन्द्रस्पष्टः २४९।५१।५९ गतिः ७२२।१५ । चन्द्रस्पष्टलिप्ताः १४९९१ ५९ खखेभै८००र्भक्ता लब्धम् १८ । भुक्तं ज्येष्ठानक्षत्रम् । तद्द्वितीयं मूलनक्षत्रं वर्त्तमानम् । शेषम् ५९१।५९ हराच्छुद्धं २०८।१ वारद्वयं षष्टिगुणितम् ७४८८६० । चन्द्रगतिः षष्टिगुणिता ४३३३५ अनया भक्तम् । लब्धा मूलनक्षत्रभोग्यघटचः १७।१५ । शेषं वारद्वयं षष्टिगुणितं २१३११४० हरेण ४३३३५ भक्तम् । लब्धा भुक्तघटचः ४९।१२ । अतः पूर्वदिने ज्येष्ठाभघटचः १०।४८ ।*

---

* अत्र गणितम् ।

स्पष्टचन्द्रः = २४९ । ५१ । ५९ (राश्यादिः)

चन्द्रस्य स्पष्टा गतिः = ७२२ । १५ (कलादिः)

(अस्यैवाधिकारस्य १२ श्लोकस्य प्रक्रियायाम्)

कलादिकः स्पष्टचन्द्रः = १४९९१ । ५९

८००)१४९९१।५९(१८ गतनक्षत्रसङ्ख्या
१४४००
५९१।५९ शेषम्

गतं नक्षत्रं ज्येष्ठा, वर्तमानं नक्षत्रं च मूलम् ।

$$८०० — (५९१।५९) = २०८।१$$

$$\text{मूलनक्षत्रस्य भोग्यं घट्यादिकम्} = \frac{(२०८।१)\times ६०}{७२२।१५}$$

$$= \frac{१२४८१\times ६०}{४३३३५}$$

$$= \frac{१२४८१\times ४}{२८८९}$$

$$= \frac{४९९२४}{२८८९}$$

$$= १७।१७ \text{ (स्वल्पान्तरेण)}$$

$$\text{मूलनक्षत्रस्य भुक्तं घट्यादिकम्} = \frac{(५९१।५९)\times ६०}{७२२।१५}$$

$$= \frac{३५५१९\times ६०}{४३३३५}$$

$$= \frac{३५५१९\times ४}{२८८९}$$

$$= \frac{१४२०७६}{२८८९}$$

$$= ४९।११ \text{ (स्वल्पान्तरेण)}$$

```
२८८९)४९९२४(१७।१६
      २८८९        ८११×६०
      २१०३४       ४८६६०
      २०२२३       २८८९
        ८११       १९७७०
                  १७३३४
                   २४३६
```

```
२८८९)१४२०७६(४९।१०
      ११५५६       ५१५×६०
      २६५१६       ३०९००
      २६००१       २८८९
        ५१५        २०१०
```

अथ योगः। सूर्यचन्द्रस्पष्टयोगः ६०९।२८।३३ चक्र ३६० तष्टः २४९।२८।३३। अस्य लिप्ताः १४९६८।३३ खखेभैर्भक्ताः। लब्धो १८ भुक्तो वरीयान् योगः। तद्द्वितीयो वर्त्तमानः परिघः। शेषं ५६८।३३ हराच्छुद्धं २३१।२७ वारद्वयं षष्टिगुणितं ८३३२२० सूर्यचन्द्रगतियोगः ७८१।६ षष्टिगुणितः ४६८६६ अनेन भक्तम्। लब्धाः परिघभोग्यघट्यः १७।४७। शेषं ५६८।३३ वारद्वयं षष्टिगुणितं २०४६७८० हरेण ४६८६६ भक्तम्। लब्धा भुक्तघट्यः ४३।४० अतः पूर्वदिने वरीयसो योगस्य घट्यः १६।२० इति।*

---

* अत्र गणितम्।

अं क वि / क वि

स्पष्टसूर्यः = ३५९ । ३६ । ३४ सूर्यस्य स्पष्टा गतिः = ५८ । ५१

स्पष्टचन्द्रः = २४९ । ५१ । ५९ चन्द्रस्य स्पष्टा गतिः = ७२२ । १५

(अस्यैवाधिकारस्य १२ श्लोकस्य प्रक्रियायाम्)

३५९।३६।३४
+(२४९।५१।५९)
२४९।२८।३३ सूर्यचन्द्रयोगः

५८।५१
+(७२२।१५)
७८१। ६ गतियोगः

सूर्यचन्द्रयोगकलाः = १४९६८।३३

८००)१४९६८।३३(१८ गतयोगसङ्ख्या
१४४००
५६८।३३ शेषम्

गतो योगो वरीयान्, वर्तमानो योगः परिघः।

८०० — (५६८।३३) = २३१।२७

$$\text{परिघयोगस्य भोग्यं घट्यादिकम्} = \frac{(\text{२३१।२७})\times \text{६०}}{\text{७८१।६}}$$

$$= \frac{\text{१३८८७}\times \text{६०}}{\text{४६८६६}}$$

$$= \frac{\text{१३८८७}\times \text{१०}}{\text{७८११}} = \frac{\text{१३८८७०}}{\text{७८११}}$$

$$= \text{१७।४७ (स्वल्पान्तरेण)}$$

अश्वादितो बाण५गुणा भसङ्ख्याः
शैले७र्विभक्ता ऋणलिप्तिकाः स्युः ।
तीक्ष्णोग्रवाय्वग्निजलेशभानां
त्र्यंशोनशून्याग्नि२९।४०कला ऋणाख्याः ॥१५॥
नन्देन्दु१९लिप्ता गजभू१८विलिप्ताः
कर्णादिषण्णां कथिता धनाख्याः ।
धनर्णयोरन्तरमन्यथैक्यं
कृत्वाऽश्विभादेर्ध्रुवलिप्तिकाः स्युः ॥१६॥

$$\text{परिघयोगस्य भुक्तं घट्यादिकम्} = \frac{(\text{५६८।३३}) \times \text{६०}}{\text{७८१।६}}$$

$$= \frac{\text{३४११३} \times \text{६०}}{\text{४६८६६}}$$

$$= \frac{\text{३४११३} \times \text{१०}}{\text{७८११}}$$

$$= \frac{\text{३४११३०}}{\text{७८११}}$$

$$= \text{४३।४० (स्वल्पान्तरेण)}$$

७८११) १३८८७० (१७।४६
७८११
६०७६०
५४६७७
६०८३ × ६०
३६४९८०
३१२४४
५२५४०
४६८६६
५६७४

७८११) ३४११३० (४३।४०
३१२४४
२८६९०
२३४३३
५२५७ × ६०
३१५४२०
३१२४४
२९८०

विश्वान्त्यतोऽङ्केन्दु१९कलाऽभिजित् स्यात्
भमाननिघ्नाः खरसै६०र्विभक्ताः ।
ताभिर्भघटचः परिसंस्कृताः स्युः
सूक्ष्मर्क्षलिप्ता व्यवहारसिद्ध्यै ॥१७॥

अथ ब्रह्मवसिष्ठादिसिद्धान्तोक्तानां सूक्ष्मनक्षत्राणां स्थूलनक्षत्रतः साधनमाह । अश्वादित इति । अश्विनीनक्षत्रतः भसङ्ख्या नक्षत्रसङ्ख्या बाणैः पञ्चभिर्गुणा गुणिताः शैलैः सप्तभिर्विभक्ता भक्ता ऋणलिप्तिका ऋणघटचः स्युः । तीक्ष्णानि ।

मूलशक्रशिवसार्प्पदैवतान्युल्लपन्त्यथ च तीक्ष्णसंज्ञया ।

उग्राणि ।

पूर्विकात्रितयमन्तको मघेत्युग्रपञ्चकमिदं जगुर्बुधाः ।

वायुः स्वातिः अग्निः कृत्तिका जलेशो वरुणः तन्नक्षत्रं शतभिषग् एषां नक्षत्राणां त्र्यंशोनशून्याग्निकलाः तृतीयांशरहितत्रिंशद्घटिका २६।४० ऋणाख्याः स्युः ।

कर्णादिषण्णां श्रवणादिषण्णक्षत्राणां नन्देन्दुलिप्ता गजभूविलिप्ता एकोनविंशतिघटिका अष्टादश पलानि १९।१८ धनाख्याः कथिता धनयोर्ऋणउक्ताः । उक्तानां घटिकानां धनर्णयोरन्तरं कार्यम् अन्यथा धनयोर्ऋणयोरैक्यं योगं कृत्वा अश्विन्यादेः अश्विनीनक्षत्रतः ध्रुवलिप्तिकाः स्युः ।

विश्वे उत्तराषाढा तस्यान्त्यतः विरामकालाद् अङ्केन्दुकला एकोनविंशतिकला अभिजिद् अभिजिन्नक्षत्रभोगः स्यात् । एवं सिद्धा ऋणधनाख्या भभोगलिप्ता भमानेन नक्षत्रप्रमाणेन निघ्ना गुणिताः खरसैः षष्टया विभक्ता भाजिताः ताभिः लब्धाभिः भघटयः स्थूलनक्षत्रघटयः परिसंस्कृताः धनलिप्ताश्चेद् युक्ता ऋणलिप्ताश्चेद् हीनाः सत्यः व्यवहारसिद्ध्यै यात्राविवाहादिफलसिद्ध्यै सूक्ष्मर्क्षलिप्ताः सूक्ष्मनक्षत्रभोग्यघटयः स्युरिति ।

अत्रोपपत्तिः । नक्षत्रभोगस्त्रिविधः अध्यर्द्धार्द्धसमभोगात् । तथा च शिरोमणौ (स्पष्टाधिकारे) ।

स्थूलं कृतं भानयनं यदेत-
ज्ज्योतिर्विदां संव्यवहारहेतोः ।।७१।।
सूक्ष्मं प्रवक्ष्येऽथ मुनिप्रणीतं
यात्राविवाहादिफलस्य सिद्ध्यै ।।
अध्यर्द्धभोगानि ११८५।५२ षडत्र तज्ज्ञाः
प्राहुर्विशाखादितिभध्रुवाणि ।।७२।।
षडर्द्धभोगानि ३९५।१७ च भोगिरुद्र-
वातान्तकेन्द्राधिपवारुणानि ।
शेषाण्यतः पञ्चदशैकभागा-
न्युक्तो भभोगः शशिमध्यभुक्तिः ७९०।३५ ।।७३।।
सर्वर्क्षभोगोनितचक्रलिप्ता
वैश्वाग्रतः स्यादभिजिद्भभोगः । इति ।

स्थूलनक्षत्रभोगः १३।२० । सूक्ष्मनक्षत्रभोगः १३।१०।३४।५२ । अनयोरन्तरम् ९।२५।५८ अष्टशतैर्भक्तं लब्धं घटयादि ०।४२।१८ । स्थूलनक्षत्रभोगात् सूक्ष्मनक्षत्रभोगस्याऽल्पत्वाद् ऋणाख्याः । प्रतिनक्षत्रम् अन्तरम् ९।२५ । षष्टिगुणं भाज्यः ५६५ अष्टशती ८०० हरः । लाघवार्थं चतुर्दशाधिकशतेना ११४ पवर्त्तितो भाज्यस्थाने पञ्च हरस्थाने सप्त । अश्विन्यादितः प्रतिनक्षत्रं तादृशान्तरत्वात् तत्सङ्कलनार्थं भाज्यो गुणकः हरो हरः । अतोऽश्वादित इत्याद्युक्तम् ।*

---

* अत्र गणितम् ।

इन्दो रसाग्नित्रित्रीषुसप्तभूधरमार्गणाः ५७७५३३३६ ।।३०।।
उदयादुदयं भानोर्भूमिसावनवासरः ।।३६।।
वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो १५७७९१७८२८ युगे ।
(सूर्यसिद्धान्ते, मध्यमाधिकारे)

युगनक्षत्राणि = २७ × ५७७५३३३६ = १५५९३४००७२

५७७५३३३६
× २७

४०४२७३३५२
११५५०६६७२

१५५९३४००७२

$$\text{एकस्य नक्षत्रस्य भोगकालः} = \frac{\text{युगसावनदिनानि}}{\text{युगनक्षत्राणि}}$$

$$= \frac{१५७७९१७८२८}{१५५९३४००७२}$$

$$= \frac{३९४४७९४५७}{३८९८३५०१८}$$

दि घ प वि
= १ । ० । ४२ । ५३

३८९८३५०१८) ३९४४७९४५७ (१।०।४२।५३
३८९८३५०१८

४६४४४३९ × ६०

६४९७२५०३) ४६४४४३९० × ६०

२७८६६६३४००
२५९८९००१२

१८७७६३३८०
१२९९४५००६

५७८२८२७४ × ६०

३४६९०९६४४०

३४६९०९६४४०
३२४८६२५१५

२२०४७१२९०
१९४९१७५०९

२३५५३७८१

दि घ प वि
एकस्य नक्षत्रस्य भोगकालः = १ । ० । ४२ । ५३

एकस्मिन् दिवसे चन्द्र एकं नक्षत्रं भुङ्क्त इति नियमे स्वीकृत एकनक्षत्रस्य भोगकालो वस्तुतः ४२ पलैर् ५३ विपलैश् च न्यूनो भवति ।

यानि अर्द्धभोगनक्षत्राणि षट् तेषां भोग: ६।३५।१७ चन्द्रगति: १३।१०।३५ अनयोरन्तरम् ६।३५।१८ अष्टशतैर्भक्तम् २९।४० इमा एवार्द्धभोगानाम् ऋणाख्या घटिका: । एवम् अर्द्धभोगानन्तरपतित-समभोगानां कृत्तिका–मघा–पूर्वफाल्गुनी–मूल–पूर्वाषाढा–शतभिषजां स्थूलनक्षत्रभोगपूरणार्थम् ऋणाख्या २९।४० घटिका: स्वीकार्या: ।*

$$\overset{\text{प}}{४२}।\overset{\text{वि}}{५३} = \frac{४२}{६०} + \frac{५३}{६० \times ६०} \text{ (घटचादि)}$$

$$= \frac{४२ \times ६० + ५३}{३६००} = \frac{२५७३}{३६००} = \frac{१}{\frac{३६००}{२५७३}} = \frac{१}{१\frac{१०२७}{२५७३}}$$

$$= \frac{१}{१ + \frac{१}{\frac{२५७३}{१०२७}}} = \frac{१}{१ + \frac{१}{२\frac{५१९}{१०२७}}}$$

$$= \frac{१}{१ + \cfrac{१}{२ + \cfrac{१}{\frac{१०२७}{५१९}}}} = \frac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२}}} \text{ (स्वल्पान्तरेण)}$$

$$= \frac{१}{१ + \frac{१}{\frac{५}{२}}} = \frac{१}{१ + \frac{२}{५}} = \frac{१}{\frac{७}{५}} = \frac{५}{७} \text{ (घटचादि)}$$

* अत्र गणितम् ।

एकस्य नक्षत्रस्य स्थूलभोग: = १३।२० (अंशादि:)

= ८०० (कला:)

एकस्य नक्षत्रस्य स्थूलभोगेन चेद् ६० घटिका लभ्यन्ते तर्हि तस्यैव नक्षत्रस्य सूक्ष्माख्येनाऽर्धभोगेन ३९५।१८ कलादिना कियत्यो घटिका लभ्यन्त इत्यनुपात: क्रियते ।

$$\frac{(३९५।१८) \times ६०}{८००} = \frac{(३९५।१८) \times ३}{४०} = \frac{११८५।५४}{४०}$$

$$= २९।३९ \text{ (स्वल्पान्तरेण)}$$

अतस्तीक्ष्णोग्रवाय्वग्निजलेशभानाम् इत्याद्युक्तम् ।

चक्रलिप्ताः २१६०० सप्तविंशतिभसंख्यानां शशिमध्यभुक्तिमितभोगानामैक्येन २१३४५।४२ ऊनिताः २५४।१८ । एषोऽभिजिद्भोग उत्तराषाढाग्रे गणनीयः । अस्य भोगः २५४।१८ अष्टशतैर्भक्तः लब्धा घटिकाः १९।४ । स्वल्पान्तरत्वादेकोनविंशतिरेव गृहीताः । अतः विश्वान्त्यतोऽङ्केन्दुकला इत्यादि ।* एवं श्रवणादिषण्णक्षत्राणां अभि-

---

* अत्र गणितम् ।

$$\text{चन्द्रभगणपूर्तिकालः} = \frac{\text{युगसावनदिनानि}}{\text{युगचन्द्रभगणाः}}$$

$$= \frac{\text{१५७७९१७८२८}}{\text{५७७५३३३६}}$$

$$= \frac{\text{३९४४७९४५७}}{\text{१४४३८३३४}}$$

$$\begin{array}{l} \quad\text{दि} \quad \text{घ} \quad \text{प} \\ = \text{२७ । १९ । १८} \end{array}$$

```
१४४३८३३४)३९४४७९४५७(२७।१९।१८
          २८८७६६६८
          ---------
          १०५७१२७७७
          १०१०६८३३८
          ---------
            ४६४४४३९×६०
            -----------
 २४०६३८९)४६४४४३९०
            २४०६३८९
            -------
            २२३८०५००
            २१६५७५०१
            --------
              ७२२९९९
```

```
७२२९९९×६०
----------
४३३७९९४०
२४०६३८९
--------
१९३१६०५०
१९२५१११२
--------
   ६४९३८
```

जिद्भोगः धनं कार्यः । रेवत्यन्ते उभयोश्चक्रपूर्त्तित्वाद् रेवतीनक्षत्रे संस्काराभावः । ऋणघटिकानां स्थूलक्रियासाधितत्वाद् वस्तुतः श्रवणादिषु चतुर्दश पलानि अधिकानि अतस्तत्सङ्ग्रहार्थं अभिजिद्भोगे चतुर्दश पलानि क्षिप्तानि । अतो नन्देन्दुलिप्ता गजभूविलिप्ताः कर्णादिषण्णामित्यादि । एवं धनहीनलिप्ताभ्यां यद् विवरं तदेव संस्कार्यम् ।

योगे युतिः स्यात् क्षययोः स्वयोर्वा
धनर्णयोरन्तरमेव योगः ॥१॥

(भास्करीये बीजगणिते धनर्णषड्विधे)

इति बीजसूत्रात् । अतो धनर्णयोरित्याद्युक्तम् ।

अथ चन्द्रगतिस्थूलसूक्ष्मभेदेन नक्षत्रप्रमाणानां भेदाद् यदि षष्टिप्रमाणे एता नक्षत्रलिप्ता धनाख्या ऋणाख्या वा तदा एतत्प्रमाणे किमित्यनुपातेन सूक्ष्मलिप्ता नक्षत्रे संस्कार्याः । इदमेव नाक्षत्रमानमिति ब्रह्मगुप्तः ।

तन्मानं नाक्षत्रं दुरधिगमं मन्दबुद्धीनाम् ।

ग्रन्थ प्रकारोक्तरीत्या चक्रन्यासः ।*

एतावता गणितेन २७ दिवसैः १९ घटीभिः १८ पलैश् च चन्द्रः स्वं भगणं पूरयतीति दृश्यते । एकस्मिन् भगण अश्विन्यादीनि रेवत्यन्तानि २७ नक्षत्राणि भवन्ति । अतश् चन्द्रः प्रतिदिनम् एकं नक्षत्रं भुङ्क्त इति सामान्ये नियमे स्वीकृते १९ घटिकाः १८ पलानि चाऽवशिष्यन्ते । अवशिष्टो घट्यात्मकः स कालोऽष्टाविंशतितमस्याऽभिजिद्नामकस्य नक्षत्रस्य भोगकालः स्वीकृतः । स्वल्पान्तरेण स कालः १९ घट्यात्मक एव गृहीतः ।

* अत्रत्या टिप्पणी २८० पृष्ठे द्रष्टव्या ।

	अ	भ	कृ	रो	मृ	आ	पु	ति	अ
स्थूलनक्षत्रभोगः	०	०	१	१	२	२	३	३	४
	१३	२६	१०	२३	६	२०	३	१६	०
	२०	४०	०	२०	४०	०	२०	४०	०
सूक्ष्मनक्षत्रभोगः	०	०	१	१	२	२	३	३	३
	१३	१९	२	२२	५	१२	२	१५	२१
	१०	४५	५६	४३	५२	२८	१४	२४	५९
	३५	५२	२७	१९	५४	१२	४	३९	५७
अन्तरम्	०	०	०	०	०	०	०	०	०
	०	६	७	०	०	७	१	१	८
	९	५४	३	३६	४७	३१	५	१५	०
	२५	८	३३	४०	५	४८	५६	२१	३
ध्रुवकघटच:	०	३१	३१	२	३	३३	४	५	३६
	४२	१४	४६	४५	३२	५३	५६	३७	०
	२२								
	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ
	१	॥	१	१॥	१	॥	१॥	१	॥
ऋणाख्याः	०								
	४२	१	२	२	३	४	५	५	६
	५१	२६	८	५१	३४	१७	०	४३	२६
ऋणाख्याः	०	२९	२९			२९			२९
	०	४०	४०			४०			४०
धनाख्याः									
ध्रुवलिप्ताः	०	३१	३१	२	३	३३	५	५	३६
	४३	६	४८	५१	३४	५७	०	४३	६

	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू
स्थूलनक्षत्रभोग:	४	४	५	५	६	६	७	७	८	८
	१३	२६	१०	२३	६	२०	३	१६	०	१३
	२०	४०	०	२०	४०	०	२०	४०	०	२०
सूक्ष्मनक्षत्रभोग:	४	४	५	५	६	६	७	७	७	८
	५	१८	८	२१	४	११	०	१३	२०	३
	१०	२१	६	१७	२८	३	४९	५९	३५	४५
	३१	६	५८	३३	८	२५	१८	५३	१०	४५
अन्तरम्	०	०	०	०	०	०	०	०	०	०
	८	८	१	२	२	८	२	२	९	९
	९	१८	५३	२	११	५६	३०	४०	२४	३४
	२९	५४	२	२७	५२	३५	४२	७	५०	१५
ध्रुवकघट्य:	३६	३७	८	९	९	४०	११	१२	४२	४३
	४२	२७	३३	११	५३	१४	१८	१	२२	४
	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ
	१	१	१।।	१	१	।।	१।।	१	।।	१
ऋणाख्या:	७	७	८	९	१०	१०	११	१२	१२	१३
	८	५१	३४	१७	०	४३	२६	८	५१	३४
ऋणाख्या:	२९	२९				२९			२९	२९
	४०	४०				४०			४०	४०
धनाख्या:										
ध्रुवलिप्ता:	३६	३७	८	९	१०	४०	११	१२	४२	४३
	४८	३१	३४	१७	०	२३	२६	८	३१	१४

पू	उ	०	श्र	ध	श	पू	उ	रे	
८	९		९	१०	१०	११	११	१२	स्थूलनक्षत्रभोगः
२६	१०		२३	६	२०	३	१६	०	
४०	०		२०	४०	०	२०	४०	०	
८	९	९	९	१०	१०	१०	११	१२	सूक्ष्मनक्षत्रभोगः
१६	६	१०	२४	७	१३	२७	१६	०	
५६	४२	५६	७	१७	५२	३	४९	०	
२०	१२	३०	५	४०	५७	३२	२४	०	
०	०	०	०	०	०	०	०	०	अन्तरम्
९	३	४	०	०	६	६	०	०	
४३	१७	१४	४७	३७	७	१६	९	०	
४०	४८	१८	५	४०	३	४८	२४	०	
४३	१४	१९	३	२	२७	२८	०	०	ध्रुवकघट्यः
४७	५०	४	३२	४९	३१	१५	४२	०	
ऋ	ऋ	ध	ध	ध	ऋ	ऋ	ध		
१	१।।		१	१	।।	१	१।।	१	
१४	१५		१५	१६	१७	१७	१८	१९	ऋणाख्याः
१७	०		४३	२६	०	५१	३४	१८	
२९					२९	२९			ऋणाख्याः
४०					४०	४०			
१९	१९	१९	१९	१९	१९	१९			धनाख्याः
०	१८	१८	१८	१८	१८	१८			
४३	१५	१९	३	२	२७	२८	०	०	ध्रुवलिप्ताः
५७	०	०	३५	५२	३०	१३	४४	०	

टिप्पणी—

अश्विनीनक्षत्रस्य स्थूलभोगः = ०।१३।२०।० (राश्यादिः) ।

अश्विनीनक्षत्रं समभोगं वर्तते । अतोऽश्विनीनक्षत्रस्य सूक्ष्मभोगश् चन्द्रगतितुल्यो भवति ।

अश्विनीनक्षत्रस्य सूक्ष्मभोगः = ०।१३।१०।३५ (राश्यादिः) ।

अश्विनीनक्षत्रस्य स्थूलसूक्ष्मभोगयोर् अन्तरम् = ०।९।२५ (अंशादि)

अश्विनीनक्षत्रस्य स्थूलसूक्ष्मभोगयोर् घटयादिकम् अन्तरम्

$$= \frac{(\text{०।९।२५}) \times \text{६०}}{\text{१३।१०।३५}} = \text{०।४२।५०}$$

भरणीनक्षत्रस्य स्थूलभोगः = ०।१३।२०।० (राश्यादिः)

अश्विन्यादेर् भरण्यन्तं स्थूलभोगः = (०।१३।२०।०) × २
= ०।२६।४०।० (राश्यादिः)

भरणीनक्षत्रम् अर्धभोगं वर्तते । अतो भरणीनक्षत्रस्य सूक्ष्मभोगश् चन्द्रगत्यर्धतुल्यो भवति ।

भरणीनक्षत्रस्य सूक्ष्मभोगः = ०।६।३५।१७ (राश्यादिः)

अश्विन्यादेर् भरण्यन्तं सूक्ष्मभोगः = अश्विनीनक्षत्रस्य सूक्ष्मभोगः + (०।६।३५।१७)
= (०।१३।१०।३५) + (०।६।३५।१७)
= ०।१९।४५।५२ (राश्यादिः)

अश्विन्यादेर् भरण्यन्तं स्थूलसूक्ष्मभोगयोर् अन्तरम् = ६।५४।८ (अंशादिः)

अश्विन्यादेर् भरण्यन्तं स्थूलसूक्ष्मभोगयोर् घटचादिकम् अन्तरम्

$$= \frac{(\text{६।५४।८}) \times \text{६०}}{\text{१३।१०।३५}} = \text{३१।२४।१८}$$

प्रतिनक्षत्रं स्थूलसूक्ष्मभोगयोर् घटचादिकम् अन्तरम् ०।४२।५० वर्तते । अतोऽश्विन्यादेर् भरण्यन्तं साधारणनियमेन स्थूलसूक्ष्मभोगयोर् घटचादिकम् अन्तरम् = (०।४२।५०) × २ = १।२५।४० भवति । अतः साधारणनियमेनाऽगते घटचादिकेऽस्मिन् अन्तरे विशेपनियमेनाऽगतात् पूर्वसाधितात् अन्तराद्

३१।२४।१८ शोधिते भरणीनक्षत्रस्य स्थूलसूक्ष्मभोगयोर् घट्यादिकम् अन्तरं २९।५८।३८ भवितुम् अर्हति । लक्ष्मीपतिस् त्र्यंशोनशून्याग्निकला २९।४० इति कथयति ।

कृत्तिकानक्षत्रस्य स्थूलभोगः = ०।१३।२०।० (राश्यादिः)

अश्विन्यादेः कृत्तिकान्तं स्थूलभोगः = (०।१३।२०।०) × ३
= १।१०।०।० (राश्यादिः)

कृत्तिकानक्षत्रं समभोगं वर्तते । कृत्तिकानक्षत्रस्य सूक्ष्मभोगः = ०।१३।१०।३५ (राश्यादिः)

अश्विन्यादेः कृत्तिकान्तं सूक्ष्मभोगः
= अश्विन्यादेर् भरण्यन्तं सूक्ष्मभोगः + कृत्तिकानक्षत्रस्य सूक्ष्मभोगः
= (०।१९।४५।५२) + (०।१३।१०।३५)
= १।२।५६।२७ (राश्यादिः)

अश्विन्यादेः कृत्तिकान्तं स्थूलसूक्ष्मभोगयोर् अन्तरम् = ७।३।३३ (अंशादि)

अश्विन्यादेः कृत्तिकान्तं स्थूलसूक्ष्मभोगयोर् घट्यादिकम् अन्तरम्

$$= \frac{(\text{७।३।३३}) \times \text{६०}}{\text{१३।१०।३५}} = \text{३२।७।९}$$

साधारणनियमेनाऽश्विन्यादेः कृत्तिकान्तं स्थूलसूक्ष्मनक्षत्रयोर् घट्यादिकम् अन्तरम् = (०।४२।५०) × ३ = २।८।३०

$$\begin{array}{rrrr} & \text{घ} & \text{प} & \text{वि} \\ & \text{३२।} & \text{७।} & \text{९} \\ (-) & \text{२।} & \text{८।} & \text{३०} \\ \hline & \text{२९।} & \text{५८।} & \text{३९} \end{array}$$

लक्ष्मीपतिस् तु २९।४० इति लिखति ।

रोहिणीनक्षत्रस्य स्थूलभोगः = (०।१३।२०।०) (राश्यादिः)

अश्विन्यादे रोहिण्यन्तं स्थूलभोगः = (०।१३।२०।०) × ४
= (१।२३।२०।०) (राश्यादिः)

रोहिणीनक्षत्रम् अध्यर्धभोगं वर्तते । अतो रोहिणीनक्षत्रस्य सूक्ष्मभोगः
= (०।१३।१०।३५) + (०।६।३५।१७)
= (०।१९।४५।५२) (राश्यादिः)

अश्विन्यादे रोहिण्यन्तं सूक्ष्मभोगः
= अश्विन्यादेः कृत्तिकान्तं सूक्ष्मभोगः + रोहिणीनक्षत्रस्य सूक्ष्मभोगः
= (१।२।५६।२७) + (०।१९।४५।५२)
= १।२२।४२।१९ (राश्यादिः)

अश्विन्यादे रोहिण्यन्तं स्थूलसूक्ष्मभोगयोर् अन्तरम् = ०।३७।४१ (अंशादि)

अश्विन्यादे रोहिण्यन्तं स्थूलसूक्ष्मभोगयोर् घटयादिकम् अन्तरम्

$$= \frac{(\text{०।३७।४१}) \times \text{६०}}{\text{१३।१०।३५}} = \text{२।५१।२८}$$

साधारणनियमेनाऽश्विन्यादे रोहिण्यन्तं स्थूलसूक्ष्मभोगयोर् अन्तरं घटयादिकम् = (०।४२।५०) × ४ = २।५१।२०

घ प वि
२ । ५१ । २८
(—) २ । ५१ । २०
० । ० । ८

लक्ष्मीपतिस् तु ० इति लिखति ।

शतभिषजो नक्षत्रस्य स्थूलभोगः = ०।१३।२०।० (राश्यादिः)
अश्विन्यादेः शतभिषजोऽन्तं यावत् स्थूलभोगः = (०।१३।२०।०) × २४
= १०।२०।०।० (राश्यादिः)

रा अं क वि
अश्विन्यादे रोहिण्यन्तं सूक्ष्मभोगः =१।२२।४२।१९
मृगशिरसो नक्षत्रस्य सूक्ष्मभोगः =०।१३।१०।३५ (समभोगः)
आर्द्रानक्षत्रस्य सूक्ष्मभोगः =०। ६।३५।१७ (अर्धभोगः)
पुनर्वसुनक्षत्रस्य सूक्ष्मभोगः =०।१९।४५।५२ (अध्यर्धभोगः)
तिष्यनक्षत्रस्य सूक्ष्मभोगः =०।१३।१०।३५ (समभोगः)
अश्विन्यादेस् तिष्यन्तं सूक्ष्मभोगः =३।१५।२४।३८

अश्विन्यादेस् तिष्यन्तं सूक्ष्मभोग: =३।१५।२४।३८
अश्लेषानक्षत्रस्य सूक्ष्मभोग: =०। ६।३५।१७ (अर्धभोग:)
मघानक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
पूर्वंफाल्गुनीनक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
उत्तरफाल्गुनीनक्षत्रस्य सूक्ष्मभोग: =०।१९।४५।५२ (अध्यर्धभोग:)
हस्तनक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
चित्रानक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
स्वातिनक्षत्रस्य सूक्ष्मभोग: =०। ६।३५।१७ (अर्धभोग:)
विशाखानक्षत्रस्य सूक्ष्मभोगः =०।१९।४५।५२ (अध्यर्धभोग:)
अनुराधानक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
ज्येष्ठानक्षत्रस्य सूक्ष्मभोग: =०। ६।३५।१७ (अर्धभोग:)
मूलनक्षत्रस्य सूक्ष्मभोगः =०।१३।१०।३५ (ममभोग:)
पूर्वाषाढानक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
उत्तराषाढानक्षत्रस्य सूक्ष्मभोग =०।१९।४५।५२ (अध्यर्धभ ग)
अभिजिद्नक्षत्रस्य सूक्ष्मभोग: =०। ४।१४।१८
श्रवणनक्षत्रस्य सूक्ष्मभोग: =०।१३।१०।३५ (समभोग:)
धनिष्ठानक्षत्रस्य सूक्ष्मभोगः =०।१३।१०।३५ (समभोग:)
शतभिषजो नक्षत्रस्य सूक्ष्मभोग: =०। ६।३५।१७ (अर्धभोगः)

अश्विन्यादेः शतभिषजोऽन्तं यावत् सूक्ष्मभोग: =१०।१३।५२।५५

अश्विन्यादेः शतभिषजोऽन्तं यावद् स्थूलसूक्ष्मभोगयोर् अन्तरम् =६।७।५ (अंशादि)

अश्विन्यादेः शतभिषजोऽन्तं यावत् स्थूलसूक्ष्मभोगयोर् घट्यादिकम् अन्तरम्

$$=\frac{(६।७।५)\times ६०}{१३।१०।३५} = २७।५०।१४$$

साधारणनियमेनाऽश्विन्यादेः शतभिषजोऽन्तं, यावत् स्थूलसूक्ष्मभोगयोर् घट्यादिकम् अन्तरम् = (०।४२।५०) × २४ = १७।८।०

$$\begin{array}{r} \text{घ} \quad \text{प} \quad \text{वि} \\ २७ । ५० । १४ \\ (-)\; १७ । \;\; ८ । \;\; ० \\ \hline १० । ४२ । १४ \end{array}$$

पूर्वंभाद्रपदनक्षत्रस्य स्थूलभोगः = ०।१३।२०।०

अश्विन्यादेः पूर्वंभाद्रपदनक्षत्रस्य स्थूलभोगः = (०।१३।२०।०) × २५
= ११।३।२०।०

पूर्वंभाद्रपदनक्षत्रं समभोगं वर्तते । अतः पूर्वभाद्रपदनक्षत्रस्य सूक्ष्मभोगः = ०।१३।१०।३५ (राश्यादिः)

अश्विन्यादेः पूर्वंभाद्रपदान्तं सूक्ष्मभोगः
= अश्विन्यादेः शतभिषजोऽन्तं यावत् सूक्ष्मभोगः
+ पूर्वंभाद्रपदनक्षत्रस्य सूक्ष्मभोगः
= १०।१३।५२।५५ + ०।१३।१०।३५
= १०।२७।३।३०

अश्विन्यादेः पूर्वंभाद्रपदान्तं स्थूलसूक्ष्मभोगयोर् अन्तरम् = ६।१६।३०(अंशादि)

अश्विन्यादेः पूर्वंभाद्रपदान्तं स्थूलसूक्ष्मभोगयोर् घट्यादिकम् अन्तरम्

$$= \frac{(६।१६।३०) \times ६०}{१३।१०।३५} = २८।३३।४$$

साधारणनियमेनाऽश्विन्यादेः पूर्वंभाद्रपदान्तं स्थूलसूक्ष्मभोगयोर् घट्यादिकम् अन्तरम् = (०।४२।५०) × २५ = १७।५०।५०

घ प वि
२८ । ३३ । ४
(—) १७ । ५० । ५०
१० । ४२ । १४

लक्ष्मीपतिः पूर्वं श्रवणधनिष्ठाशतभिषक्पूर्वंभाद्रपदोत्तरभाद्रपरेवतीनां नक्षत्राणां धनात्मकं घट्यादिकम् १९।१८ इति कथयति । तत्र शतभिषक्पूर्वंभाद्रपदयोर नक्षत्रयोर् अस्य नियमस्याऽनुपपन्नत्वात् तत्संशोधनाय तयोर् नक्षत्रयोर् ऋणात्मकं घट्यादि २९।४० इति सारण्यां लिखति । तयोर् धनात्मक–ऋणात्मकयोर् घट्यादिकयोः फलयोर् अन्तरे कृत ऋणात्मकम् अन्तरम् १०।२२ आगच्छति । एतच्चाऽस्माभिः साधितेन ऋणात्मकेन घट्यादिकेन १०।४२।१४ फलेन सादृश्यं भजतीव वर्तते । अतः स्वल्पान्तरात् सर्वं सङ्गतम् ।

		अश्वि	भ	कृ	रो	मृ	आ	पुन	ति	अश्ले	म
स्थूलनक्षत्रभोगः	रा	०	०	१	१	२	२	३	३	४	४
	अं	१३	२६	१०	२३	६	२०	३	१६	०	१३
	क	२०	४०	०	२०	४०	०	२०	४०	०	२०
	वि	०	०	०	०	०	०	०	०	०	०
प्रतिनक्षत्रं सूक्ष्मभोगः	अं	१३	६	१३	१९	१३	६	१९	१३	६	१३
	क	१०	३५	१०	४५	१०	३५	४५	१०	३५	१०
	वि	३५	१७	३५	५२	३५	१७	५२	३५	१७	३५
सूक्ष्मनक्षत्रभोगः	रा	०	०	१	१	२	२	३	३	३	४
	अं	१३	१९	२	२२	५	१२	२	१५	२१	५
	क	१०	४५	५६	४२	५२	२८	१४	२४	५९	१०
	वि	३५	५२	२७	१९	५४	११	३	३८	५५	३०
स्थूलसूक्ष्मभोगयोर् अन्तरम्	अं	०	६	७	०	०	७	१	१	८	८
	क	९	५४	३	३७	४७	३१	५	१५	०	९
	वि	२५	८	३३	४१	६	४९	५७	२२	५	३०
		ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ
विशेषनियमेनाऽगता ध्रुवघट्यः	घ	०	३१	३२	२	३	३४	५	५	३६	३७
	प	४२	२४	७	५१	३४	१५	०	४२	२४	७
	वि	५०	१८	९	२८	१८	४६	४	५५	२३	१३
साधारणनियमेनाऽगता ध्रुवघट्यः	घ	०	१	२	२	३	४	४	५	६	७
	प	४२	२५	८	५१	३४	१७	५९	४२	२५	८
	वि	५०	४०	३०	२०	१०	०	५०	४०	३०	२०
ऋणाख्याः सूक्ष्मध्रुवघट्यः	घ		२९	२९	०	०	२९	०	०	२९	२९
	प		५८	५८	०	०	५८	०	०	५८	५८
	वि		३८	३९	८	८	४६	१४	१५	५३	५३
धनाख्याः सूक्ष्मध्रुवघट्यः	घ										
	प										
	वि										

		पूफा	उफा	ह	चि	स्वा	वि	अनु	ज्ये	मू
स्थूलनक्षत्रभोगः	रा	४	५	५	६	६	७	७	८	८
	अं	२६	१०	२३	६	२०	३	१६	०	१३
	क	४०	०	२०	४०	०	२०	४०	०	२०
	वि	०	०	०	०	०	०	०	०	०
प्रतिनक्षत्रं सूक्ष्मभोगः	अं	१३	१९	१३	१३	६	१९	१३	६	१३
	क	१०	४५	१०	१०	३५	४५	१०	३५	१०
	वि	३५	५२	३५	३५	१७	५२	३५	१७	३५
सूक्ष्मनक्षत्रभोगः	रा	४	५	५	६	६	७	७	७	८
	अं	१८	८	२१	४	११	०	१३	२०	३
	क	२१	६	१७	२८	३	४९	५९	३५	४५
	वि	५	५७	३२	७	२४	१६	५१	८	४३
स्थूलसूक्ष्मभोगयोर् अन्तरम्	अं	८	१	२	२	८	२	२	९	९
	क	१८	५३	२	११	५६	३०	४०	२४	३४
	वि	५५	३	२८	५३	३६	४४	९	५२	१७
		ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ	ऋ
विशेषनियमेनाऽगता ध्रुवघट्यः	घ	३७	८	९	१०	४०	११	१२	४२	४३
	प	५०	३४	१७	०	४१	२५	८	५०	३२
	वि	४	२३	१३	४	३२	५०	४१	९	५९
साधारणनियमेनाऽगता ध्रुवघट्यः	घ	७	८	९	९	१०	११	१२	१२	१३
	प	५१	३४	१६	५९	४२	२५	८	५१	३३
	वि	१०	०	५०	४०	३०	२०	१०	०	५०
ऋणाख्याः सूक्ष्मध्रुवघट्यः	घ	२९	०	०	०	२९	०	०	२९	२९
	प	५८	०	०	०	५९	०	०	५९	५९
	वि	५४	२३	२३	२४	२	३०	३१	९	९
धनाख्याः सूक्ष्मध्रुवघट्यः	घ									
	प									
	वि									

पूषा	उषा	०	श्र	ध	श	पूभा	उभा	रे		
८	९		९	१०	१०	११	११	१२	रा	स्थूलनक्षत्रभोगः
२६	१०		२३	६	२०	३	१६	०	अं	
४०	०		२०	४०	०	२०	४०	०	क	
०	०		०	०	०	०	०	०	वि	
१३	१९	४	१३	१३	६	१३	१९	१३	अं	प्रतिनक्षत्रं सूक्ष्मभोगः
१०	४५	१४	१०	१०	३५	१०	४५	१०	क	
३५	५२	१८	३५	३५	१७	३५	५२	३५	वि	
८	९	९	९	१०	१०	१०	११	१२	रा	सूक्ष्मनक्षत्रभोगः
१६	६	१०	२४	७	१३	२७	१६	०	अं	
५६	४२	५६	७	१७	५२	३	४९	०	क	
१८	१०	२८	३	३८	५५	३०	२२	०	वि	
९	३	४	०	०	६	६	०	०	अं	स्थूलसूक्ष्मभोगयोर् अन्तरम्
४३	१७	१४	४७	३७	७	१६	९	०	क	
४२	५०	१८	३	३८	५	३०	२२	०	वि	
ऋ	ऋ	ध	घ	ध	ऋ	ऋ	घ			
४४	१५	१९	३	२	२७	२८	०	०	घ	विशेषनियमेनाऽगता ध्रुवघट्यः
१५	०	१७	३४	५१	५०	३३	४२	०	प	
५०	८	४	५	१४	१४	४	३७	०	वि	
१४	१४		१५	१६	१७	१७	१८	१९	घ	साधारणनियमेनाऽगता ध्रुवघट्यः
१६	५९		४२	२५	८	५०	३३	१६	प	
४०	३०		२०	१०	०	५०	४०	३०	वि	
२९	०				१०	१०			घ	ऋणाख्याः सूक्ष्मध्रुवघट्यः
५९	०				४२	४२			प	
१०	३८				१४	१४			वि	
		१९	१९	१९			१९	१९	घ	धनाख्याः सूक्ष्मध्रुवघट्यः
		१७	१६	१६			१६	१६	प	
		४	२५	२४			१७	३०	वि	

अत्र

१३।१०।३५ अंशादिमितेन ६० घटिका लभ्यन्ते चेत् स्थूलभोगसूक्ष्मभोगयोर् अन्तरेण किम् इत्यनुपातः क्रियते ।

अश्विनीनक्षत्रस्य—

$$\frac{(०।९।२५)\times ६०}{१३।१०।३५} = (०।९।२५)\times(४।३३) = ०।४२।५०$$

$$\frac{६०}{१३।१०।३५} = \frac{६०\times६०}{७९०।३५} = \frac{३६००\times६०}{४७४३५} = \frac{२१६०००}{४७४३५} = ४।३३$$

$$\begin{array}{l}
४७४३५)२१६०००(४।३३ \\
\quad\underline{१८९७४०} \\
\quad\underline{२६२६०\times६०} \\
\quad १५७५६०० \\
\quad\underline{१४२३०५} \\
\quad १५२५५० \\
\quad\underline{१४२३०५} \\
\quad १०२४५
\end{array}
\qquad\qquad
\begin{array}{r|r|r|}
\multicolumn{3}{r}{०।९।२५} \\
\multicolumn{3}{r}{\times\ (४।३३)} \\
\hline
 & ० & २९७ & ८२५ \\
० & ३६ & १०० & \\
\hline
 & ३६ & ३९७ & ८२५ \\
 & ६ & १३ & \\
\cline{3-3}
 & & ४१० & \\
\hline
 & ० & ४२ & ५०
\end{array}$$

भरणीनक्षत्रस्य—

$$\frac{(६।५४।८)\times ६०}{१३।१०।३५} = (६।५४।८)\times(४।३३) = ३१।२४।१८$$

$$\begin{array}{r|r|r|}
\multicolumn{3}{r}{६।५४।८} \\
\multicolumn{3}{r}{\times\ (४।३३)} \\
\hline
 & १६२ & २६४ \\
१९८ & १६२ & \\
२४ \;|\; २१६ & ३२ & \\
७ \;|\; ३० & ४ & \\
\hline
३१ \;|\; ४४४ & १८१८ & \\
\hline
 २४ & १८ &
\end{array}$$

कृत्तिकानक्षत्रस्य—

$$\frac{(\text{७।३।३३})\times\text{६०}}{\text{१३।१०।३५}} = (\text{७।३।३३})\times(\text{४।३३}) = \text{३२।७।९}$$

७।३।३३
× (४।३३)
२३१ | ९९ | ९९
२८ | १२ | १३२ | ९९
२८ | २४३ | २३१ | १०८९
४ | ४ | १८ |
३२ | २४७ | २४९ |
| ७ | ९ |

रोहिणीनक्षत्रस्य—

$$\frac{(\text{०।३७।४१})\times\text{६०}}{\text{१३।१०।३५}} = (\text{०।३७।४१})\times(\text{४।३३}) = \text{२।५१।२८}$$

०।३७।४१
× (४।३३)
० | १११ | १२३
गणेशदैवज्ञस्य १ सूत्रम् अनुसरँल् लक्ष्मीपतिः सूर्ये चरसंस्कारं करोति (अस्याधिकारस्य २३ श्लोको द्रष्टव्यः) ।

गणेशदैवज्ञस्य २ सूत्रेण चन्द्रे देयः कलात्मकश् चरसंस्कारः $= \frac{२}{९}$ चरपलानि कलात्मकम् इमं संस्कारं लक्ष्मीपतिर् अंशरूपे परिणमयति ।

अतश् चन्द्रे देयोंऽशादिकश् चरसंस्कारः

$$= \frac{\text{२ चरपलानि}}{९ \times ६०} = \frac{\text{चरपलानि}}{२७०}$$

(अस्याधिकारस्य २५ श्लोको द्रष्टव्यः)

गणेशदैवज्ञस्य ३ सूत्रेण चन्द्रे देयोंऽशादिको भुजान्तरसंस्कारः

$$= \frac{\text{अंशाद्यं सूर्यमन्दफलम्}}{२७}$$

गणेशदैवज्ञः सूर्यमन्दफलम् अंशरूपं साधयति (ग्रहलाघवस्य रविचन्द्रस्पष्टाधिकारस्य २ श्लोको द्रष्टव्यः) । लक्ष्मीपतिस् तु कलादिकं सूर्यमन्दफलं साधयति (अस्याधिकारस्य २१ श्लोको द्रष्टव्यः) ।

अतश् चन्द्रे देये भुजफलसंस्कारेऽपि लक्ष्मीपतिना गणेशदैवज्ञस्य रीतिर् अनुसृतेति स्पष्टम् (अस्याधिकारस्य २४ श्लोको द्रष्टव्यः) ।

गणेशदैवज्ञस्य ४ सूत्रेण ४४४ शकेऽर्थाद् ५७९ वैक्रमाब्देऽयनांशाऽभावस् तथाऽयनांशानां वार्षिकी गतिर् एक१कलामिता सिध्यति । लक्ष्मीपतिस् तु ५५६ वैक्रमाब्देऽयनांशाऽभावं स्वीकरोति । तथाऽयनांशानां वार्षिकीं गतिम् ५४ विकलाश् च स्वीकरोति (अस्याधिकारस्य १ श्लोको द्रष्टव्यः) ।

चन्द्रमन्दोच्चसाधनम् आह ।

मूलपाठः

ऽथ दिनग्रहां९शो
दिनद्वितर्कां६२शकलासमेतः ।।८।।
ध्रुवान्वितः शीतरुचेर्मृदूच्चं

प्रतिसंस्कृतपाठः

अहर्गणो नन्द९हृतो लवादिको
द्वितर्क६२भक्तो द्युगणः कलादिकः ।
ध्रुवाऽन्विता संयुतिरेतयोर् भवेद्
मृदूच्चमंशादि तुषारदीधितेः ।।२६।।

अहर्गणोत्पन्नं चन्द्रमन्दोच्चम्

$$= \left(\frac{\text{अ}}{\text{९}}\right) \text{अंशादि} + \left(\frac{\text{अ}}{\text{६२}}\right) \text{कलादि}$$

चन्द्रमन्दोच्चम् $=$ अहर्गणोत्पन्नं चन्द्रोच्चम् $+$ चन्द्रोच्चध्रुवः

स्पष्टचन्द्रसाधनम् आह ।

मूलपाठः

कृत्वाऽर्कवत् स्यादमृतांशुरस्मात् ।
इन्दोस्त्रिबाणा५३ युगशून्यचन्द्राः १०४
पक्षेषुचन्द्राः१५२ शरनन्दचन्द्राः१९५ ।।९।।
दन्ताश्विनो२३२ द्व्यङ्गयमाः२६२ शराष्टा-
क्षीण्य२८५ष्टगोक्षीणि२९८ गुणाभ्ररामाः३०३।

प्रतिसंस्कृतपाठः

चन्द्रस्य मान्दाङ्कान् आह ।

इन्दोस् त्रिबाणा५३ युगशून्यचन्द्राः १०४
पक्षेषुचन्द्राः१५२ शरनन्दचन्द्राः१९५ ।

दन्ताऽश्विनो२३२ लोचनशत्रुपक्षाः २६२
शराऽष्टपक्षा२८५ गजनन्दपक्षाः२९८ ॥२७॥
गुणाऽभ्ररामाः३०३ क्रमशः प्रदिष्टाः
कलात्मका मन्दफलोद्भवाऽाङ्काः ।

चन्द्रस्य

मन्दकेन्द्र-भुजांऽशाः	मन्दफलकलाः	मन्दकलाऽन्तराणि (खण्डाः)	खण्डाऽन्तराणि
०	०		
		५३	
१०	५३		२
		५१	
२०	१०४		३
		४८	
३०	१५२		५
		४३	
४०	१९५		६
		३७	
५०	२३२		७
		३०	
६०	२६२		७
		२३	
७०	२८५		१०
		१३	
८०	२९८		८
		५	
९०	३०३		५

चन्द्रमन्दकेन्द्रसाधनम् आह ।

स्वमन्दतुङ्गाच् शशिनं विशोध्य
कुर्वीत शीतद्युतिमन्दकेन्द्रम् ॥२८॥

स्पष्टचन्द्रसाधनम् आह ।

स्वमन्दकेन्द्राद् निजमन्दजाऽङ्कैर्
मन्दस्फुटोऽर्को विहितो यथा प्राक् ।
स्वमन्दकेन्द्राद् निजमन्दजाऽङ्कैर्
मन्दस्फुटोऽब्जोऽपि तथा विधेयः ॥२९॥
दत्तं चराद्यं हिमगौ पुरैव
मन्दस्फुटोऽब्जो भवति स्फुटोऽतः ।

यथा पूर्वं सूर्यमन्दकेन्द्रम् उपकरणीकृत्य सूर्यमन्दफलाङ्कैर् मन्दस्पष्टः सूर्यः साधितस् तथैव चन्द्रमन्दकेन्द्रम् उपकरणीकृत्य चन्द्रमन्दफलाङ्कैर् मन्दस्पष्टश् चन्द्रः साधनीयः । चन्द्रमसि देयश् चरसंस्कारः पूर्वम् एव दत्तः । भुजफलसंस्कारोऽपि चन्द्रमसि पूर्वम् एव दत्तः । अतो मन्दस्पष्टश् चन्द्र एव स्पष्टचन्द्रो भवति ।

सूर्यस्याऽङ्केभ्यश् चन्द्रस्याऽङ्कानां साधनम् आह ।

मूलपाठः

सूर्यस्य खण्डाः शरगो९५विनिघ्नाः
कुवेद४१भक्ताः शशिखण्डका वा ॥१०॥

प्रतिसंस्कृतपाठः

अङ्का रवेर् वा शरगो९५विनिघ्नाः
कुवेद४१भक्ताः शशिनोऽङ्काः स्युः ॥३०॥

$$\text{चन्द्राऽङ्कः} = \frac{\text{९५ सूर्याऽङ्कः}}{\text{४१}}$$

सूर्यचन्द्रयोः स्फुटगतिसाधनम् आह ।

मूलपाठः

खण्डान्तरे शेषतदन्तरघ्ना-
शां१०शोनिते विश्व१३हतं विधोश्चेत् ।

तद्दिग्१०लवौ कर्किमृगादिकेन्द्रे
युतोनिते मध्यगती स्फुटे स्तः ।।११।।

प्रतिसंस्कृतपाठः

सूर्यस्य स्पष्टगतिसाधनम् आह ।

स्वमन्दकेन्द्राद् मृदुनः फलस्य
प्रसाधने स्याद् अवशेषकं यत् ।
यातैष्ययोः खण्डकयोर् वियुत्या
निहत्य तद् व्योमकुभिर् १० भजेत ।।३१।।
यातैष्ययोर् अङ्ककयोर् वियोगाल्
लब्धं फलं तत् परिशोध्य शेषम् ।
व्योमक्षमाभिर्१० विभजेत लब्धिः
फलं कलाद्यं गतिजं रवेः स्यात् ।।३२।।
मृगादिकेन्द्रे क्षयसंज्ञकं स्यात्
कर्कादिकेन्द्रे धनसंज्ञकं स्यात् ।
चिह्नाऽनुसारं फलहीनयुक्ता
मध्या द्युभुक्तिस् तरणेः स्फुटा स्यात् ।।३३।।

$$\text{सूर्यस्य कलादिकं गतिफलम्} = \frac{\text{खण्डः} - \dfrac{\text{शेषम्} \times \text{खण्डान्तरम्}}{१०}}{१०}$$

मकरादिकेन्द्रे गतिफलम् ऋणं स्यात् । कर्कटादिकेन्द्रे गतिफलं धनं स्यात् ।

सूर्यस्य कलादिका मध्यमा गतिः ५९।८ ऋणात्मकेन गतिफलेन वियोजनीया, धनात्मकेन गतिफलेन तु योजनीया, सूर्यस्य स्पष्टा गतिर् भवति । अत्र साधिता गतिर् दैनिकी गतिर् इति बोद्धव्या ।

चन्द्रस्य स्पष्टगतिसाधनम् आह ।

यातैष्ययोः खण्डकयोर् वियोगं
शेषांऽशकाद्यैर् गुणितं खचन्द्रैः १० ।

भजेत लब्ध्या रहितं विदध्याद्
यातैष्ययोर् अङ्कयोर् वियोगम् ।।३४।।
शेषं निहन्याद् गुणमेदिनीभिर्१३
लब्धं वधं तं दशभिर्१० भजेत ।
गतेः फलं स्याच् शशिनः कलाद्यं
स्फुटेन्दुभुक्ती रविवत् प्रसाध्या ।।३५।।

चन्द्रस्य कलादिकं गतिफलम्

$$\text{खण्डः} - \frac{\dfrac{\text{शेषम्} \times \text{खण्डान्तरम्}}{१०}}{१०} \times १३$$

चन्द्रस्य कलादिका मध्यमा गतिः ७९०।३५ ऋणात्मकेन गतिफलेन वियोजनीया, धनात्मकेन गतिफलेन तु योजनीया. चन्द्रस्य स्पष्टा गतिर् भवति ।

सूर्याचन्द्रमसोः सूक्ष्मगत्योः साधनम् आह ।

मूलपाठः

खगोभ्यो९० विशुद्धो भुजः कोटिरुक्ता
ततः प्रोक्तमार्गेण मान्दाः कलाः स्युः ।
रवेरष्टबाणै ५८रवाप्तं विधोश्चेत्
त्रि३निघ्नं त्रिभूभि१३विभक्तं स्फुटं स्यात् ।।*

प्रतिसंस्कृतपाठः

भुजं विजह्याद् नवतेर्९० लवेभ्यः
कोटिर् भवेत्, पूर्ववदेव कोटेः ।
प्रसाधयेद् मन्दफलं खरांशोर्
गजेषुभिर् ५८ मन्दफलं भजेत् तत् ।।३६।।

---

* अयं श्लोको लक्ष्मीपतिना रत्नदीपस्य टीकायां लिखितः (अस्यैव ग्रन्थस्य २४२ पृष्ठं द्रष्टव्यम्) ।

मान्दं फलं तद् रजनीश्वरस्य
हत्वा गुणै३ रामकुभिर्१३ भजेत ।
सहस्ररश्मेः शशिनः क्रमेण
कलादिके भुक्तिफले भवेताम्* ।।३७।।

कोट्यंशाः = ९० अंशाः — भुजांशाः

सूर्यस्य मन्दकेन्द्रकोट्यंशान् उपकरणीकृत्य पूर्वोक्तया (२१ श्लोकोक्तया) रीत्या मन्दफलं साधयेत् । तद् मन्दफलम् अष्टपञ्चाशता ५८ भजेत, सूर्यस्य सूक्ष्मं गतिफलं स्यात् ।

चन्द्रस्य मन्दकेन्द्रकोट्यंशान् उपकरणीकृत्य पूर्वोक्तया रीत्या मन्दफलं साधयेत् । तद् मन्दफलं त्रिभिर् ३ गुणयित्वा त्रयोदशभिर् १३ भजेत, चन्द्रस्य सूक्ष्मं गतिफलं स्यात् ।

सूक्ष्मेण गतिफलेन मध्यमां गतिं पूर्ववत् संस्कुर्वीत, सूक्ष्मा गतिः स्यात् ।

तिथिसाधनम् आह ।

मूलपाठः

सूर्योनचन्द्रार्क१२लवाद् गताः स्यु-
स्तिथ्योऽवशिष्टोनपपी१२विलिप्ताः ।
गत्यन्तराप्ता घटिकाः स्युरेष्या
वारः समाद्याढ्यगणाद्रि७शेषात् ।।१२।।

प्रतिसंस्कृतपाठः

चन्द्रात् सूर्यं शोधयित्वाऽवशिष्टान्
भागाँश् चक्षुर्मेदिनीभिर्१२भजेत ।
लब्धिर् याता स्यात् तिथिः शुक्लवक्त्राच्
शेषांऽशादीन् द्वादशां१२शेभ्य उज्झेत् ।।३८।।

---

* लक्ष्मीपतेर् इयं रीतिश् चलगणितम् अनुसरति (अस्यैव ग्रन्थस्य २४३-२६० पृष्ठान्यवलोकनीयानि) ।

भोग्यांऽशाद्याः स्वीयतिथ्या भवेयुर्,
भास्वद्रात्रीनाथगत्योर् वियुत्या ।
लभ्यन्ते चेद् नाडिकाः षष्टि६०रेभिर्
भोग्यैर् घट्यः स्युः कियत्यः कलाद्यैः ।।३९।।
त्रैराशिकेन गदितेन समागतासु
नाडीषु सिध्यति निजस्य तिथेर् विरामः ।
तस्मात् स्वकीयदिवसे घटिकासु तासु
प्रोक्ता तिथिर् विरमतीति विचिन्तनीयम् ।।४०।।

राश्यादिकात् स्पष्टाच् चन्द्राद् राश्यादिकं स्पष्टं सूर्यं विशोध्य शेषम् अंशादिकं कुर्यात् । तद् अंशादिकं द्वादशभिर् १२ भजेत । लब्धिमितया सङ्ख्यया सूच्या शुक्लपक्षप्रतिपदादिका गततिथिसङ्ख्या स्यात् । शेषम् अंशादिकं द्वादशभ्यों१२शेभ्यः परिशोध्य लब्धं शेषं कलादिकं कुर्यात् । तत् कलादिकं षष्ट्या ६० सङ्गुण्य सूर्याचन्द्रमसोः कलादिकयोर् दैनिक्योर् गत्योर् अन्तरेण भजेत, वर्तमानायास् तिथेर् भोग्यं घट्यादिकं स्यात् । अभीष्टे वारे सूर्योदयाद् भोग्यघट्यादिके व्यतीते वर्तमाना तिथिः समाप्ति गच्छतीति वोध्यम् । अभीष्टदिनस्य वाराऽऽनयनविधिः प्रतिसंस्कृते रत्नदीपेऽहर्गणाऽऽनयनप्रसङ्गे (८ श्लोके) कथितः ।

वारप्रवेशकालसाधनम् आह ।

मूलपाठः

चरार्द्धदेशान्तरयोः स्वजाता-
वैक्यं विजातौ विवरं त्वनेन ।
परिष्कृताः षष्टि६०कला दिनेश-
लिप्ताः स्वदेशे गणितागमोक्ताः ।। ३।।

प्रतिसंस्कृतपाठः

सौम्ये गोले धनाऽऽख्यं चरमुदितमथो
याम्यगोले क्षयाऽऽख्यं,

प्राच्यं देशाऽन्तरं स्वं कथितमृणमिदं
पश्चिमायां न्यगादि ।
तुल्ये चिह्ने तयोः स्याद् युतिरथ वियुतिश्
चिह्नभेदे तयोः स्यात्
षष्टौ६० नाडीषु युञ्ज्याद् धनफलमधनं
षष्टि६०नाडीभ्य उज्झेत् ।।४१।।
योगे युतिः स्यात् क्षययोः स्वयोर् वा
धनर्णयोर् अन्तरमेव योगः ।
बीजप्रसिद्धो विधिरेष विज्ञैर्
अत्र क्रियायां स्मरणीय एव ।।२४।।
लब्धे काले वासरेशप्रवेशः
सङ्ख्यावद्भिः प्रोच्यते स्वीयदेशे ।
लङ्कादेशे पद्मिनीशोदये स्यात्
स्वीये देशे वासरेशप्रवेशः ।।४३।।

उत्तरे गोले चरपलानि धनात्मकानि भवन्ति । दक्षिणे गोले तानि ऋणात्मकानि भवन्ति । पूर्वाणि रेखान्तरपलानि धनात्मकानि भवन्ति । पश्चिमानि रेखान्तरपलानि ऋणात्मकानि भवन्ति । तुल्यचिह्नानां चरपलानां रेखान्तरपलानां च योगं कुर्वीत । भिन्नचिह्नानां तु तेषां वियोगं कुर्वीत । वियोगे कृतेऽधिकतराणां चिह्नं शेषे भवतीति स्मरणीयम् । योगाद् वियोगाद् वाऽऽगतानि पलानि घटयादिकानि कुर्वीत । धनात्मकं तद् घटयादिकं फलं षष्टौ ६० घटिकासु युञ्जीत, स्वीयदेशे वारप्रवेशकालो भवति । ऋणात्मकं तद् घटयादिकं फलं षष्टेर्६० घटीभ्यो वियुञ्जीत, स्वीये देशे वारप्रवेशकालो भवति । लङ्कादेशे जायमानः सूर्योदयकालः स्वीये देशे वारप्रवेशकालः कथ्यते ।

नक्षत्रयोगसाधनम् आह ।

मूलपाठः

विधोः सार्कचन्द्रस्य लिप्ताः खखेभै८००
विभक्ता गतौ स्तो भयोगौ च शेषे ।

क्रमाद्धार८००शुद्धे खषड्६०घ्ने स्वगत्या
जवैक्येन भक्ते तदेष्याः कलाः स्युः ।।१४।।

प्रतिसंस्कृतपाठः

नक्षत्रसाधनम् आह ।

कलाऽऽदिकं शीतकरं खखेभैर्८००
भजेत लब्धं गदितं गतं भम् ।
दास्राद् भवेच्, शेषकलाऽऽदिकं तु
हरात्८०० त्यजेद् भोग्यकलादिकं स्यात् ।।४४।।
हिमांशुगत्या यदि षष्टि६०नाड्यो
लभ्यास् तदा भोग्यकलाऽऽदिकेन ।
का नाडिका इत्यनुपातयुक्त्या
वारे निजे स्युर् घटिकाः स्वभस्य ।।४५।।

राश्यादिकं स्पष्टं चन्द्रं कलादिकं कुर्यात् । कलादिकं चन्द्रम् अष्टशत्या ८०० भजेत । लब्धिमितया सङ्ख्यया सूच्याऽश्विन्यादिका गतनक्षत्रसङ्ख्या स्यात् । शेषं कलादिकम् अष्टशत्याः ८०० परिशोध्य लब्धं शेषं कलादिकं षष्ट्या ६० सङ्गुण्य चन्द्रस्य कलादिकया दैनिक्या गत्या भजेत् । वर्तमानस्य नक्षत्रस्य भोग्यं घट्यादिकं स्यात् ।

योगसाधनम् आह ।

सूर्येण युक्तं शशिनं विदध्यात्
कलाऽऽदिकं योगफलं खखेभैः८०० ।
भजेत लब्धिप्रमितं प्रयातं
विष्कम्भतो योगमुदाहरन्ति ।।४६।।
हरात् ८०० त्यजेच् शेषकलाऽऽदिकं स्याद्
भोग्यं कलाऽऽद्यं, खरसैर्६० विनिघ्नम् ।

भोग्यं कलाऽऽद्यं रविचन्द्रगत्योर्
युत्या भजेत् स्युर् निजयोगघट्यः ।।४७।।

राश्यादिकयोः स्पष्टयोः सूर्याचन्द्रमसोर् योगं कुर्यात् । योगफले द्वादश १२ राशिभ्योऽधिके ततो द्वादश१२राशीन् शोधयेत् । राश्यादिकं योगफलं कलादिकं कुर्यात् । तत् कलादिकम् अष्टशत्या ८०० भजेत । लब्धिमितया सङ्ख्यया सूच्या विष्कम्भादिका गतयोगसङ्ख्या स्यात् । शेषं कलादिकम् अष्टशत्याः ८०० परिशोध्य लब्धं शेषं कलादिकं षष्ट्या ६० सङ्गुण्य सूर्याचन्द्रमसोः कलादिकयोर् दैनिकयोर् गत्योर् योगेन भजेत । वर्तमानस्य योगस्य भोग्यं घट्यादिकं स्यात् ।

ब्रह्मवशिष्ठादिसिद्धान्तोक्तानां सूक्ष्मनक्षत्राणां स्थूलनक्षत्रेभ्यः साधनम् आह ।

मूलपाठः

अश्वादितो बाण५गुणा भसङ्ख्याः
शैलै७र्विभक्ता ऋणलिप्तिकाः स्युः ।
तीक्ष्णोग्रवाय्वग्निजलेशभानां
त्र्यंशोनशून्याग्नि२९।४० कला ऋणाख्याः ।।१५।।
नन्देन्दु१९लिप्ता गजभू१८विलिप्ताः
कर्णादिषण्णां कथिता धनाख्याः ।
धनर्णयोरन्तरमन्यथैक्यं
कृत्वाऽश्विभादेर्ध्रुवलिप्तिकाः स्युः ।।१६।।
विश्वान्त्यतोऽङ्केन्दु१९कलाऽभिजित् स्याद्
भमाननिघ्नाः खरसै६०र्विभक्ताः ।
ताभिर्भघट्यः परिसंस्कृताः स्युः
सूक्ष्मर्क्षलिप्ता व्यवहारसिद्ध्यै ।।१७।।

प्रतिसंस्कृतपाठः

दास्रा।ऽदितः पञ्च ५हता भसङ्ख्याः
शैलैर्७ हृताः स्युर् घटिकाः क्षया।ऽख्याः ।

तीक्ष्णोग्रवाय्वग्निजलेशभानां
नन्दद्वि२९तुल्या घटिका विघटचः ।।४८।।
खवेद४०तुल्याः कथिता ऋणाऽख्या,
षण्णाम्६ उडूनां श्रवणाऽदिकानाम् ।
नन्देन्दु१९तुल्या घटिका विघटचो
गजेन्दु१८तुल्याः कथिता धनाऽख्याः ।।४९।।
योगे युतिः स्यात् क्षययोः स्वयोर् वा
धनर्णयोर् अन्तरमेव योगः ।
रीत्याऽनया प्रोक्तदिशा क्रमेण
साध्या उडूनां घटिका ध्रुवाख्याः ।।५०।।
वैश्वाऽग्रतःस्था नवचन्द्र१९तुल्या
घटचो निरुक्ता अभिजिद् ध्रुवाऽख्याः ।
भभोगनिघ्न्यो घटिका ध्रुवाऽख्याः
षष्टचा६० विभक्ताः स्फुटताम् उपेयुः ।।५१।।
पूर्वप्रसिद्धा घटिका उडूनां
ध्रुवाऽभिधाभिः स्फुटनाडिकाभिः ।
चिह्नाऽनुसारं रहिता युता वा
सूक्ष्मर्क्षसिद्धा घटिका भवेयुः ।।५२।।

अश्विनीनक्षत्रं प्रथमीकृत्य स्वेष्टनक्षत्रं यावद् गणयेत् । गणने लब्धां सङ्ख्यां पञ्चभिर्५ गुणयित्वा सप्तभिर्७ भजेत, घटचादिकम् ऋणात्मकं फलं स्यात् । भरणी–कृत्तिका–आर्द्रा–अश्लेषा – मघा– पूर्वफाल्गुनी–स्वाति – ज्येष्ठा–मूल–पूर्वाषाढा–शतभिषक्–पूर्वभाद्रपदानाम् एषां द्वादश १२ नक्षत्राणाम् एकोनत्रिंशत् २९ घटचः चत्वारिंशत् ४० पलानि ऋणाख्यानि फलानि स्युः । श्रवण–धनिष्ठा–शतभिषक्–पूर्वभाद्रपद–उत्तरभाद्रपद–रेवतीनाम् एषां षण्णां६ नक्षत्राणाम् एकोनविंशतिर् १९ घटचोऽष्टादश १८ पलानि धनाख्यानि फलानि स्युः । इष्टनक्षत्रस्यैषां धनाख्यानाम् ऋणाख्यानां च घटचादिकानां फलानां धनयोर् धनयोर् योगः, ऋणयोर् ऋणयोर् योगः, धनर्णयोर् अन्तरं भवतीति रीत्या संस्कारः कार्यः, इष्ट-

नक्षत्रस्य ध्रुवः स्यात्। उत्तराषाढानक्षत्रस्याऽग्रतो वर्तमाना ऊनविंशतिर् १९ घट्योऽभिजितो नक्षत्रस्य ध्रुवो भवति । इष्टनक्षत्रस्य भभोगकालं ध्रुवाख्याभिर् घटिकाभिर् गुणयित्वा षष्ट्या ६० भजेत, स्पष्टध्रुवः स्यात् । पूर्वं प्रसिद्धाः स्ववारस्था नक्षत्रणां घटिकाः स्पष्टध्रुवघटिकाभिर् धनाख्याभिर् योजनीया ऋणाख्याभिर् वियोजनीया, स्वनक्षत्रस्य सूक्ष्मनक्षत्रसिद्धा घटिका भवेयुः ।

करणसाधनम् आह ।

मूलपाठः

गततिथिर्द्वि२गुणा मुनि७शेषिता
करणमग्रचदलेऽथ परे दले ।
कु१युगथाऽसितभूतपरार्द्धतः
शकुनितः स्थिरकर्णचतुष्टयम् ।।१८।।
तिथिचयापचयार्द्धयुगूनिता
गगनराम३०कलाः करणप्रमा ।
गणक साधय सत्फलदं नृणां
प्रतिदिनं समयाङ्गमितीरितम् ।।१९।।

प्रतिसंस्कृतपाठः

सितपक्षमुखाद् गतास् तिथीर्
नयनाभ्यां२ गुणयेत् ततो भजेत् ।
अचलैर्७ अवशेषसम्मितं
करणं पूर्वदले तिथेर् भवेत् ।।५३।।
पूर्वाऽर्धजातं करणं कु१युक्तं
तिथेर् निजायाश् चरमे दले स्यात् ।
कृष्णस्य पक्षस्य कृतेन्दु१४तिथ्याः
पाश्चात्त्यभागे शकुनिः प्रदिष्टः ।।५४।।
चतुष्पदा।ऽख्यं प्रथमे दले स्यात्
दर्शा।ऽख्यतिथ्याश् चरमे तु नागः ।

आद्ये तिथावाद्यदले प्रदिष्टं
किंस्तुघ्नसंज्ञं करणं सितस्य ।।५५।।
षष्टेर्६० घटीभ्योऽभ्यधिका भवेयुर्
ऊनाश् च घटचस् तिथिभोगकालः ।
तदन्तरं नेत्र२हृतं खराम ३०
घटीषु युञ्जीत विवर्जयेद् वा ।।५६।।
भोगप्रमाणं करणस्य सिध्येद्
वृद्धासु हीनासु घटीषु तिथ्याः ।
वाराऽद्यमेतत् करणाऽवसानं,
न्यगादि पञ्चाङ्गविधानमत्र ।।५७।।

शुक्लपक्षस्य प्रतिपदः स्वाभीष्टायास् तिथेर् आसन्नतमां गतां तिथिं यावद् गणयित्वा समागतां सङ्ख्यां द्वाभ्यां२ गुणयित्वा गुणनफलं सप्तभिर्७ भजेत । शेषसङ्ख्या स्वाभीष्टायास् तिथेः पूर्वार्धे जायमानं करणं सूचयति । पूर्वार्धे जायमानं करणम् एक१युक्तं सत् तस्या एव तिथेर् उत्तरार्धे जायमानं करणं भवति ।

कृष्णपक्षे

	पूर्वार्धे	उत्तरार्धे
चतुर्दश्याः		शकुनिः
अमावास्यायाः	चतुष्पात्	नागः

शुक्लपक्षे

प्रतिपदः	किंस्तुघ्नः	

स्वाभीष्टायास् तिथेर् भोगकालात्मकस्य घटचादिकस्य षष्टेर् ६० घटिकानां चाऽन्तरं कुर्वीत । शेषं द्वाभ्यां २ विभज्य फलम् आनयेत् । षष्टेर् ६० घटीभ्यः स्वतिथ्या भोगकालस्याऽधिकत्वे तत् फलं त्रिंशति३० घटीषु युञ्जीत, करणभोगकालः स्यात् । षष्टेर् ६० घटीभ्यः स्वतिथ्या भोगकालस्य न्यूनत्वे तत् फलं त्रिंशतो ३० घटीभ्यः वियुञ्जीत, करणभोगकालः स्यात् । तिथिर् वारो नक्षत्रं योगः करणं चैतानि पञ्च कालस्याऽङ्गतया पञ्चाङ्गतया गृह्यन्ते ।

सूक्ष्मतमस्य तिथ्यन्तकालस्य साधनम् आह ।

मूलपाठः

तत्कालजार्केन्दुत एव तेषां
स्फुटत्वमस्मादधिकेऽल्पके वा ।
ततोऽसकृत् साधनतः स्फुटत्वं
कार्यं त्वदृष्टागमहेतुविद्भिः ॥२०॥

प्रतिसंस्कृतपाठः

प्रातःकाले साधिताभ्यां स्फुटाभ्यां
सूर्येन्दुभ्यां साधिते स्वीयतिथ्याः ।
अन्ते काले मध्यमौ पुष्पवन्तौ
कृत्वा भूयः प्रस्फुटौ तौ विधेयौ ॥५८॥
सूर्येन्दुभ्यां प्रस्फुटाभ्याम् अमूभ्यां
भूयः साध्यः स्वीयतिथ्या विरामः ।
तस्मिन् काले मध्यमौ तौ स्फुटौ च
कृत्वा भूयः साधयेत् ता घटीश् च ॥५९॥
एवं रीत्या चाऽसकृत् साध्यमानः
सिद्ध्येत् स्थास्नुः स्पष्टतिथ्यन्तकालः ।
ग्रासे साध्ये चन्द्रमस्तीक्ष्णभान्वोर्
एतां रीतिं पण्डिताः संस्मरन्ति ॥६०॥

रत्नदीपे सूर्योदयकाले ग्रहाः साधिताः सन्ति । प्रातःकाले साधिताभ्यां स्फुटाभ्यां सूर्यचन्द्रमोभ्यां पूर्वम् अभीष्टायास् तिथेर् अवसानकालं साधयेत । एवं साधिते स्वतिथ्या अवसानकाले मध्यमौ सूर्यचन्द्रमसौ प्रसाध्य तौ स्फुटीकुर्यात् । ताभ्यां स्फुटाभ्यां रविचन्द्राभ्यां पुनः स्वतिथ्या विरामकालं साधयेत् । एवम् असकृत् कुर्याद् यावद् अविशेषः । एवम् असकृत्कर्मणा साधितस् तिथ्यन्तकालः सूक्ष्मतां गच्छति । पूर्णिमाया विरामकालं प्रसाध्यैव चन्द्रग्रहणस्य क्रियां कर्तुं गणकाः प्रभवन्ति । एवम् अमावास्याया अवसानकालसाधनानन्तरं सूर्यग्रहणगणना-

प्रक्रिया प्रसरति। अतो ग्रहणगणनाप्रसङ्गे सूक्ष्मतमस्य तिथ्यन्तकालस्य साधनम् अपेक्षितं भवति।

अस्याऽधिकारस्योपसंहारम् आह।

दैवज्ञलक्ष्मीपतिना कृतस्य
सिद्धान्तसारस्य लघुक्रियस्य।
पञ्चाङ्गपत्रीगणनाधिकारः
सुबोधहेतोः प्रतिसंस्कृतोऽभूत् ॥६१॥

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचितस्य सिद्धान्तसारस्य रत्नदीपस्य प्रतिसंस्कृते रूपे पञ्चाङ्गाधिकारः।

□

३ परिशिष्ट

प्रतिसंस्कृत रत्नदीप

(पहिलो अध्याय)

अनुवादक
रामजी तेवारी

मङ्गलाचरण

श्रीहेरम्बं माधवं वामदेवं
नत्वा देवीं भास्करं शिष्यतुष्ट्यै ।
ब्रूते कृष्णानन्दजो रत्नदीपं
गोभूमेघैस्१७१९ तुल्यशाकेऽर्कसूत्रात् ।। १ ।।

अन्वय— कृष्णानन्दजः, श्रीहेरम्बम्, माधवम्, वामदेवम्, देवीम्, भास्करम्, नत्वा, शिष्यतुष्ट्यै, गोभूमेघैः, तुल्यशाके, अर्कसूत्रात्, रत्नदीपम्, ब्रूते ।।१।।

पदार्थ— कृष्णानन्दजः=कृष्णानन्दका छोरा (लक्ष्मीपति) । श्रीहेरम्बम्=श्रीगणेशलाई । माधवम्=विष्णुलाई । वामदेवम्=महादेवलाई । देवीम्=देवीलाई । भास्करम्=सूर्यलाई । नत्वा=ढोगेर । शिष्यतुष्ट्यै=चेलाको सन्तोषको निमित्त । गोभूमेघैः=१७१९ ले । तुल्यशाके=बराबर भएको शाकेमा । अर्कसूत्रात्=सूर्यसिद्धान्तबाट । रत्नदीपम्=रत्नदीप । ब्रूते=भन्दछन् ।।१।।

भावार्थ— कृष्णानन्दका छोरा लक्ष्मीपति गणेश, विष्णु, महादेव, देवी र सूर्यलाई ढोगेर चेलाको सन्तोषको निमित्त शाके १७१९ (वि. सं. १८५४) मा सूर्यसिद्धान्तको आधारमा रत्नदीप बनाउँछन् ।।१।।

वर्षगण ल्याउने रीति

शाकाब्दा भूनागशक्रै र् ४८१ विहीना
गोरक्षेशद्रव्यशाहस्य राज्यात् ।

वर्षाणि स्युः प्रोज्झ्य नागाग्निबाहूँस्२३८
तेभ्यो ग्रन्थे वर्षसङ्घः कृतोऽत्र ॥२॥

अन्वय— भूनागशक्रैः, विहीनाः, शाकाब्दाः, गोरक्षेशद्रव्यशाहस्य, राज्यात्, वर्षाणि, स्युः । तेभ्यः, नागाग्निबाहून्, प्रोज्झ्य, अत्र, ग्रन्थे, वर्षसङ्घः, कृतः ॥२॥

पदार्थ— भूनागशक्रैः=१४८१ लें । विहीनाः= घटेका । शाकाब्दाः =शकसंवत् (शाके) । गोरक्षेशद्रव्यशाहस्य=गोरखाका राजा द्रव्य शाहको राज्यात् =राज्यदेखि । वर्षाणि =वर्ष । स्युः =हुन्छन् । तेभ्यः =गोरखाका राजा द्रव्य शाहको राज्यदेखि वितेका वर्षबाट । नागाग्निबाहून्=२३८ लाई । प्रोज्झ्य=घटाएर । अत्र = यस । ग्रन्थे = ग्रन्थमा । वर्षसङ्घः=वर्षगण । कृतः=गरिएको छ ॥२॥

भावार्थ — इष्ट शाकेबाट १४८१ घटाउनू, शेष गोरखाका राजा द्रव्य शाहको संवत् हुन्छ । द्रव्य शाहको संवत्बाट २३८ घटाउनू, शेष यस ग्रन्थमा वर्षगण हुन्छ ॥२॥

विक्रमसवत् — १३५ =शकसंवत् (शाके)
शकसंवत् — १४८१ =द्रव्यशाहसंवत्
द्रव्यशाहसंवत् — २३८=वर्षगण=व*

अब्दप (मेषसङ्क्रान्तिको वारादि) ल्याउने रीति

अब्दौघः स्वचतुर्थभाग१/४सहितः
कार्योऽथ भूलोचनैर्२१
निघ्नो वर्षगणः स्वखेषुगुणभू१३५०
भागैर् युतो द्व्यद्रिभिः७२ ।
हीनोऽभ्राऽभ्रजिनैर्२४०० हृतोऽथ फलयुक्
पूर्वा युतिर् नेत्र२युक्
स्याद् वारा।ऽदिक उष्णगोर् दिनमणेर्
मेषप्रवेशोद्भवः ॥३॥

---

* यस विषयका उदाहरण तथा प्रश्न यसै ग्रन्थका ३१०-३११ पृष्ठमा परेका छन् ।

अन्वय — अब्दौघः, स्वचतुर्थभागसहितः, कार्यः, अथ, भूलोचनैः, निघ्नः, वर्षगणः, स्वखेषुगुणभूमागैः, युतः, कार्यः, द्व्यद्रिभिः, हीनः, कार्यः अभ्राभ्रजिनैः, हृतः, कार्यः, अथ, पूर्वा, युतिः, फलयुक्, कार्या, नेत्रयुक्, कार्या, दिनमणेः, मेषप्रवेशोद्भवः, वारादिकः, उष्णगोः, स्यात् ॥३॥

पदार्थ — अब्दौघः = वर्षगण । स्वचतुर्थभागसहितः = आफ्नो चारौं भाग जोडिएको । कार्यः = गर्नू । अथ = अनि । भूलोचनैः = २१ ले । निघ्नः = गुनिएको । वर्षगणः = वर्षगण । स्वखेषुगुणभूमागैः = आफ्नो १३५० भागले । युतः = जोडिएको । कार्यः = गर्नू । द्व्यद्रिभिः = ७२ ले । हीनः = घटेको । कार्यः = गर्नू । अभ्राभ्रजिनैः = २४०० ले । हृतः = भाग लिइएको । कार्यः = गर्नू । अथ = अनि । पूर्वा = पहिलेको । युतिः = योग । फलयुक् = लब्धि जोडिएको । कार्या = गर्नू । नेत्रयुक् = २ जोडिएको । कार्या = गर्नू । दिनमणेः = सूर्यको । मेषप्रवेशोद्भवः = मेषराशिमा प्रवेश हुँदाको (मेषसङ्क्रान्तिको) । वारादिकः = वारादि । उष्णगोः = आदित्यवारदेखि । स्यात् = हुन्छ ॥३॥

भावार्थ— वर्षगणलाई ४ ले भाग लिनू, लब्धि दिनादि हुन्छ । सो लब्धि दिनरूप वर्षगणमा जोड्नू । योगफल पहिलो दिनादि हुन्छ ।

वर्षगणलाई २१ ले गुन्नू, गुणनफललाई १३५० ले भाग लिनू । लब्धि गुणनफलमा जोड्नू । योगफलबाट ७२ घटाउनू । शेषलाई २४०० ले भाग लिनू । लब्धि दोस्रो दिनादि हुन्छ ।

दोस्रो दिनादिलाई पहिलो दिनादिमा जोड्नू । योगफलमा २ जोड्नू । योगफल मेषसङ्क्रान्तिको वारादि हुन्छ । वार ७ भन्दा बढ्ता भए ७ ले तष्ट गर्नू (७ ले भाग लिई शेष मात्र लिनू) । १ शेष रहेमा आदित्यवार, २ शेष रहेमा सोमवार इत्यादि क्रमले वार हुन्छ । मेषसङ्क्रान्तिको घटयादि लङ्काको मध्यम सूर्योदयदेखि (लङ्काको बिहानको ६ बजेदेखि) बितेको समय हुन्छ* ॥३॥

$$\text{अब्दप} = \text{व} + \frac{१}{४}\,\text{स्व} + \frac{२१\,\text{व} + \frac{१}{१३५०}\,\text{स्व} - ७२}{२४००} + २$$

रेखान्तरपला ल्याउने तथा संस्कार गर्ने रीति

रेखादेशाद् योजनैर् यैः प्रतीच्यां
प्राच्यां वा स्वो देश आस्ते च तानि ।

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ३१२–३२४ पृष्ठमा परेका छन् ।

स्वाङ्घ्र्यू$\frac{1}{4}$नानि स्युर् विघट्यः क्षयं स्वं
ताः संस्कुर्याद् मेषसङ्क्रान्तिकाले ।।४।।

अन्वय— स्वः, देशः, रेखादेशात्, यैः, योजनैः, प्रतीच्याम्, वा, प्राच्याम्, आस्ते, स्वाङ्घ्र्यूनानि, तानि, विघट्यः, स्युः । मेषसङ्क्रान्तिकाले, ताः, क्षयम्, स्वम्, संस्कुर्यात् ।।४।।

पदार्थ - स्वः =आफ्नो । देशः =देश । रेखादेशात् =रेखादेशदेखि । यैः =जुन । योजनैः =योजनले । प्रतीच्याम् =पश्चिममा । वा =अथवा । प्राच्याम् =पूर्वमा । आस्ते =छ । स्वाङ्घ्यूनानि =आफ्नो चौथाई घटेका । तानि =ती योजन । विघट्यः =पला । स्युः =हुन्छन् । मेषसङ्क्रान्तिकाले =मेषसङ्क्रान्तिकालमा । ताः =ती पला । क्षयम् =ऋण । स्वम् =धन । संस्कुर्यात् =संस्कार गरोस् ।।४।।

भावार्थ— रेखादेशदेखि जति योजन पश्चिममा अथवा पूर्वमा आफ्नो देश छ, त्यति योजनलाई ४ ले भाग लिनू । लब्धिलाई योजनबाट घटाउनू । शेष रेखान्तरपला हुन्छ । रेखादेशबाट आफ्नो देश पश्चिममा भए रेखान्तरपला ऋण हुन्छ, पूर्वमा भए धन हुन्छ । मेषसङ्क्रान्तिकालमा रेखान्तरपला संस्कार गर्नू (धन भए जोड्नू, ऋण भए घटाउनू), आफ्नो देशको मेषसङ्क्रान्तिकाल हुन्छ* ।।४।।

रेखान्तरपला= (रेखादेशदेखि आफ्नो देशसम्मको योजन) — $\frac{1}{4}$ स्व

आफ्नो देशको स्पष्टमेषसङ्क्रान्तिकाल ल्याउने रीति

तद्घस्रजातेन चरेण संयुतो
मेषाऽर्ककालः स भवेत् स्वदेशजः ।

अन्वय— तद्घस्रजातेन, चरेण, संयुतः, सः, मेषार्ककालः, स्वदेशजः, भवेत् ।

पदार्थ— तद्घस्रजातेन =त्यस दिनमा भएको । चरेण =चरले । संयुतः =जोडिएको । सः =त्यो । मेषार्ककालः =मेषसङ्क्रान्तिकाल । स्वदेशजः =आफ्नो देशको । भवेत् =हुन्छ ।

---

* यस विषयका उदाहरण तथा प्रश्न यसै ग्रन्थका ३२४-३२७ पृष्ठमा परेका छन् ।

भावार्थ— मेषसङ्क्रान्तिदिनको चर ल्याउनू । त्यो चर रेखान्तरसंस्कार गरिएको मेषसङ्क्रान्तिकालमा जोड्नू । योगफल आफ्नो देशको स्पष्टमेषसङ्क्रान्तिकाल हुन्छ ।*

आफ्नो देशको मेषसङ्क्रान्तिकाल = अब्दप ± रेखान्तरपला + चरपला

ग्रहका दैनिक (१ दिनका) मध्यम गति

रवेर् नवाऽक्षाणि५९ गजाः८ कलानिधेः
खनन्दशैलाः७९० शरवह्नयो३५ विधोः ।।५।।
मान्दाख्यतुङ्गस्य रसाः६ कुवेदाः४१
पातस्य रामाः३ कुभुवो११ विलोमा ।
धरागुणा३१ अङ्गयमाः२६ कुजस्य
जीवस्य पञ्चा५र्कसुतस्य पक्षौ२ ।।६।।
ज्ञा।ऽशूच्चजा पञ्चजिना२४५ द्विरामाः३२
शुक्रा।ऽशुतुङ्गप्रभवा रसाऽङ्काः९६ ।
गजाः८ कलादिर् दिनभुक्तिरुक्ता

अन्वय— रवेः, नवाक्षाणि, गजाः, कलादिः, दिनभुक्तिः, उक्ताः । कलानिधेः, खनन्दशैलाः, शरवह्नयः, कलादिः, दिनभुक्तिः, उक्ता । विधोः, मान्दाख्यतुङ्गस्य, रसाः, कुवेदाः, कलादिः, दिनभुक्तिः, उक्ता । विधोः, पातस्य, रामाः, कुभुवः, कलादिः, विलोमा, दिनभुक्तिः, उक्ता । कुजस्य, धरागुणाः, अङ्गयमाः, कलादिः, दिनभुक्तिः, उक्ता । जीवस्य, पञ्च, कलाः, दिनभुक्तिः, उक्ता । अर्कसुतस्य, पक्षौ, कले, दिनभुक्तिः, उक्ता । ज्ञाशूच्चजा, पञ्चजिनाः, द्विरामाः, कलादिः, दिनभुक्तिः, उक्ता । शुक्राशुतुङ्गप्रभवाः, रसाङ्काः, गजाः, कलादिः, दिनभुक्तिः, उक्ता ।

पदार्थ — रवेः = सूर्यको । नवाक्षाणि = ५९ । गजाः = ८ । कलादिः = कला आदि । दिनभुक्तिः = दैनिक गति । उक्ता = कहियो । कलानिधेः = चन्द्रमाको । खनन्दशैलाः = ७९० । शरवह्नयः = ३५ । कलादिः = कला आदि । दिनभुक्तिः = दैनिक गति । उक्ता = कहियो । विधोः = चन्द्रमाको । मान्दाख्यतुङ्गस्य =

---

* यस विषयका उदाहरण तथा प्रश्न यसै ग्रन्थका ३२४–३२७ पृष्ठमा परेका छन् ।

मन्दोच्चको । रसा: = ६ । कुवेदा: = ४१ । कलादि: = कला आदि । दिनभुक्ति: = दैनिक गति । उक्ता = कहियो । विधो: = चन्द्रमाको । पातस्य = पातको (राहुको) । रामा: = ३ । कुभुव: = ११ । कलादि: = कला आदि । विलोमा = उल्टो । दिनभुक्ति: = दैनिक गति । उक्ता = कहियो । जीवस्य = बृहस्पतिको । पञ्च = पाँच । कला: = कला । दिनभुक्ति: = दैनिक गति । उक्ता = कहियो । अर्कसुतस्य = शनैश्चरको । पक्षौ = २ । कले = कला । दिनभुक्ति: = दैनिक गति । उक्ता = कहियो । ज्ञाशूच्चजा = बुधको शीघ्रोच्चको । पञ्चजिना: = २४५ । द्विरामा: = ३२ । कलादि: = कला आदि । दिनभुक्ति: = दैनिक गति । उक्ता = कहियो । शुक्राशुतुङ्गप्रभवा = शुक्रको शीघ्रोच्चको । रसाङ्का: = ९६ । गजा: = ८ । कलादि: = कला आदि । दिनभुक्ति: = दैनिक गति । उक्ता = कहियो ।

भावार्थ— सूर्यको एक दिनको मध्यम गति ५९ कला ८ विकला हुन्छ । चन्द्रमाको एक दिनको मध्यम गति ७९० कला ३५ विकला हुन्छ । चन्द्रोच्चको एक दिनको गति ६ कला ४१ विकला हुन्छ । राहुको एक दिनको गति ३ कला ११ विकला हुन्छ । राहुको गति उल्टो अर्थात् पूर्वबाट पश्चिमपट्टि हुन्छ । मङ्गलको एक दिनको मध्यम गति ३१ कला २६ विकला हुन्छ । बृहस्पतिको एक दिनको मध्यम गति ५ कला हुन्छ । शनैश्चरको एक दिनको मध्यम गति २ कला हुन्छ । बुधको शीघ्रोच्चको एक दिनको गति २४५ कला ३२ विकला हुन्छ । शुक्रको शीघ्रोच्चको एक दिनको गति ९६ कला ८ विकला हुन्छ ।

१ दिनका मध्यम गति

	कला	विकला		कला	विकला
सूर्यको	५९	८	बृहस्पतिको	५	०
चन्द्रमाको	७९०	३५	शनैश्चरको	२	०
चन्द्रोच्चको	६	४१	बुधको शीघ्रोच्चको	२४५	३२
राहुको	३	११	शुक्रको शीघ्रोच्चको	९६	८
मङ्गलको	३१	२६			

ग्रहका बीज ल्याउने रीति

ऽथ मेषसङ्क्रान्तिजनाडिकादिः ।।७।।

हतो द्युगत्या खचरस्य यस्य

षष्ट्या६० विभज्येत खगस्य तस्य ।

जायेत बीजं कलिकादिरूपं
बीजानि साध्यानि नभश्चराणाम् ।।८।।

अन्वय— अथ, मेषसङ्क्रान्तिजनाडिकादिः, यस्य, खचरस्य, द्युगत्या, हतः सन्, षष्ट्या, विभज्येत, तस्य, खगस्य, कलिकादिरूपम्, बीजम्, जायेत । नभश्चराणाम्, बीजानि, साध्यानि ।।८।।

पदार्थ— अथ=अनि । मेषसङ्क्रान्तिजनाडिकादिः=मेषसङ्क्रान्तिको घट्यादि । यस्य=जुन । खचरस्य=ग्रहको । द्युगत्या=दैनिक गतिले । हतः सन्=गुनिएको छँदो । षष्ट्या=६० ले । विभज्येत=भाग लिइन्छ । तस्य=त्यो । खगस्य=ग्रहको । कलिकादिरूपम्=कला आदि । बीजम्=बीज । जायेत=हुन्छ । नभश्चराणाम्=ग्रहका । बीजानि=बीज । साध्यानि=साधना गर्नू ।।८।।

भावार्थ— मेषसङ्क्रान्तिको घट्यादिलाई प्रत्येक ग्रहका गतिले गुन्नू । गुणनफललाई ६० ले भाग लिनू । आएका कला आदि लब्धि ती ती ग्रहका बीज कहलाउँछन्* ।।८।।

ग्रहको कलादि बीज

$$= \frac{(\text{ग्रहको दैनिक गति}) \times (\text{आफ्नो देशको मेषसङ्क्रान्तिको घट्यादि})}{\text{६०}}$$

सूर्यको ध्रुव (मेषसङ्क्रान्तिकालका मध्यमसूर्य) ल्याउने रीति

मेषप्रवेशे स्फुटतिग्मरश्मेः
स्याद् मेषसङ्क्रान्तिरथांऽशुमाली ।
मध्यस् तदा स्यात् प्रमितो लवाद्यैः
शैलेषुरामैः३५७ कुशरैर्५१ गजाक्षैः५८ ।।९।।

अन्वय— स्फुटतिग्मरश्मेः, मेषप्रवेशे, (सति), मेषसङ्क्रान्तिः, स्यात् । अथ, तदा, शैलेषुरामैः, कुशरैः, गजाक्षैः, लवाद्यैः, प्रमितः, मध्यः, अंशुमाली, स्यात् ।।९।।

---

* यस विषयका उदाहरण तथा प्रश्न यसै ग्रन्थका ३२९-३३२ पृष्ठमा परेका छन् ।

पदार्थ— स्फुटतिग्मरश्मेः= स्पष्टसूर्यको । मेषप्रवेशे=मेषराशिमा प्रवेश । सति=भएमा । मेषसङ्क्रान्तिः=मेषसङ्क्रान्ति । स्यात् = हुन्छ । अथ=अनि । तदा=त्यस बखतमा । शैलेषुरामैः=३५७ । कुशरैः=५१ । गजाक्षैः = ५८ । लवाद्यैः=अंशादिले । प्रमितः =प्रमाण भएका । मध्यः =मध्यम । अंशुमाली=सूर्य । स्यात् = हुन्छन् ॥९॥

भावार्थ— जुन बखतमा स्पष्टसूर्य मेषराशिमा पर्छन्, त्यस बखतमा मेषसङ्क्रान्ति हुन्छ । मेषसङ्क्रान्तिकालमा मध्यमसूर्य ३५७ अंश, ५१ कला ५८ विकला हुन्छन् । मेषसङ्क्रान्तिकालका मध्यमसूर्य सूर्यको ध्रुव कहाउँछन् । सूर्यको ध्रुव स्थिर हुन्छ ॥९॥

चन्द्रमाको ध्रुव (मेषसङ्क्रान्तिकालका मध्यमचन्द्र) ल्याउने रीति

वर्षौघो भुजवह्निचन्द्र१३२गुणितः
स्वाऽभ्राऽद्रिभू १७० भागयुक्
स्याद् अंशादि फलं स्वकीयखमही१०
भागाऽढ्यवर्षव्रजः ।
भक्तो द्वादशभिः१२ कलादिकफलं
स्यात् तत्फलद्वन्द्वजो
योगो नागशरावनी१५८लवयुतः
स्याद् यामिनीवल्लभः ॥१०॥

अन्वय— भुजवह्निचन्द्रगुणितः, वर्षौघः, स्वाभ्राद्रिभूभागयुक्, कार्यः, अंशादि, फलम्, स्यात् । स्वकीयखमहीभागाढ्यवर्षव्रजः, द्वादशभिः, भक्तः, कार्यः, कलादिकफलम्, स्यात् । तत्फलद्वन्द्वजः, योगः, नागशरावनीलवयुतः, कार्यः, यामिनीवल्लभः, स्यात् ॥१०॥

पदार्थ— भुजवह्निचन्द्रगुणितः =१३२ ले गुनिएको । वर्षौघः =वर्षगण । स्वाभ्राद्रिभूभागयुक् = आफ्नो १७० भाग जोडिएको । कार्यः=गर्नू । अंशादि= अंशादि । फलम्=फल । स्यात् =हुन्छ । स्वकीयखमहीभागाढ्यवर्षव्रजः=आफ्नो दशौं भाग जोडिएको वर्षगण । द्वादशभिः =१२ ले । भक्तः=भाग लिएको । कार्यः =गर्नू । कलादिकफलम्=कलादि फल । स्यात्=हुन्छ । तत्फलद्वन्द्वजः =ती दुइटा फलको । योगः=जम्मा । नागशरावनीलवयुतः=१५८ अंश जोडिएको । कार्यः=गर्नू । यामिनीवल्लभः=चन्द्रमा । स्यात्=हुन्छन् ॥१०॥

भावार्थ — वर्षगणलाई १३२ ले गुन्नू, गुणनफल अंशरूप हुन्छ। गुणनफललाई १७० ले भाग लिई अंशादि लब्धि लिनू। गुणनफल र लब्धिको योग गर्नू। योगफल अंशादि प्रथमफल हुन्छ।

वर्षगणलाई १० ले भाग लिनू। कलादि लब्धि आउँछ। सो कलादि लब्धि कलारूप वर्षगणमा जोड्नू। योगफललाई १२ ले भाग लिनू। कलादि द्वितीयफल हुन्छ।

प्रथमफल र द्वितीयफलको योग गर्नू। योगफलमा १५८ अंश जोड्नू। योगफल चन्द्रमाको ध्रुव (मेषसङ्क्रान्तिकालका मध्यमचन्द्रमा) हुन्छ*।

$$\text{चन्द्रमाको ध्रुव} = \left(\text{१३२ व} + \frac{\text{१}}{\text{१७०}}\,\text{स्व}\right)\text{अंशादि}$$

$$+\left(\frac{\text{व} + \frac{\text{१}}{\text{१०}}\,\text{स्व}}{\text{१२}}\right)\text{कलादि} + \overset{\text{अं}}{\text{१५८}}$$

चन्द्रोच्चको ध्रुव (मेषसङ्क्रान्तिकालको चन्द्रमन्दोच्च) ल्याउने रीति

वर्षाणां निवहः कुसिन्धु४१निहतः
स्वाऽङ्काऽर्क१२९भागोनितो
भागाद्यो रिपुभैर्२७६ लवैः खनयनैर्२०
लिप्ताभिरप्यन्वितः।
स्वीयाऽभ्राक्षि२०लवाऽन्विताऽब्दगणषट्
चन्द्रां१६शलिप्ताऽन्वितः
सम्पद्येत लवादिकं कुमुदिनी-
नाथस्य तुङ्गं मृदु ॥११॥

अन्वय— कुसिन्धुनिहतः, वर्षाणाम्, निवहः, स्वाङ्कार्कभागोनितः, कार्यः, भागाद्यः, स्यात्। रिपुभैः, लवैः, खनयनैः, लिप्ताभिः, अपि, अन्वितः, कार्यः,

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ३३५–३४८ पृष्ठमा परेका छन्। त्यहाँ प्रथमफल ल्याउनलाई नै १५८ अंश जोडिएको छ, यहाँ भने प्रथमफल र द्वितीयफलको योग गरिसकेपछि १५८ अंश जोडिएको छ। यसो गर्दा क्रियामा अलिकति तलमाथि परे तापनि अन्तिम फलमा केही फरक पर्दैन।

स्वीयाभ्राक्षिलवान्विताब्दगणषट्चन्द्रांशलिप्तान्वितः, कार्यः, कुमुदिनीनाथस्य, लवादिकम्, मृदु, तुङ्गम्, सम्पद्येत ॥११॥

पदार्थ— कुसिन्धुनिहतः =४१ ले गुनिएको । वर्षाणाम् =वर्षहरूको । निवहः =थुप्रो (वर्षगण) । स्वाङ्कार्कभागोनितः =आफ्नो १२९ भाग घटेको । कार्यः =गर्नू । भागाद्यः =अंशादि । स्यात् =हुन्छ । रिपुभैः =२७६ । लवैः = अंशले । खनयनैः =२० । लिप्ताभिः =कलाले । अन्वितः =जोडिएको । कार्यः = गर्नू । स्वीयाभ्राक्षिलवान्विताब्दगणषट्चन्द्रांशलिप्तान्वितः =आफ्नो बीसौं भाग जोडिएको वर्षगणको सोह्रौं भागरूपी कला जोडिएको । कार्यः =गर्नू । कुमुदिनीनाथस्य =चन्द्रमाको । लवादिकम् =अंशादि । मृदु =मन्द । तुङ्गम् = उच्च । सम्पद्येत =हुन्छ ॥११॥

भावार्थ— वर्षगणलाई ४१ ले गुन्नू, गुणनफल अंशरूप हुन्छ । गुणनफललाई १२९ ले भाग लिई अंशादि लब्धि लिनू । गुणनफलबाट सो लब्धि घटाउनू । शेषमा २७६ अंश २० कला जोड्नू । योगफल अंशादि प्रथमफल हुन्छ ।

वर्षगणलाई २० ले भाग लिनू, कलादि लब्धि आउँछ । सो कलादि लब्धि कलारूप वर्षगणमा जोड्नू । योगफललाई १६ ले भाग लिनू, लब्धि कलादि द्वितीयफल हुन्छ ।

प्रथमफल र द्वितीयफलको योग गर्नू । यो योगफल चन्द्रमन्दोच्चको ध्रुव (मेषसङ्क्रान्तिकालको चन्द्रमन्दोच्च) हुन्छ* ॥११॥

चन्द्रमन्दोच्चको ध्रुव

$$= \left(\text{४१ व} - \frac{\text{१}}{\text{१२९}}\,\text{स्व}\right)\text{अंशादि} + \left(\frac{\text{व} + \frac{\text{१}}{\text{२०}}\,\text{स्व}}{\text{१६}}\right)\text{कलादि}$$

$$+ \overset{\text{अं}}{\text{२७६}} \;\text{।}\; \overset{\text{क}}{\text{२०}}$$

राहुको ध्रुव (मेषसङ्क्रान्तिकालको राहु) ल्याउने रीति

वर्षौघः खभुजा२०हतो निजमही-
वह्न्य३१शकैरूनितः

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ३४९-३६२ पृष्ठमा परेका छन् ।

स्याद् भागाऽदिक इन्द्रियाऽहित६५ मितैर्
अंशैर् विहीनः पुनः ।
वर्षौघस्य भुजावनी१२ लवमितैर्
लिप्तादिभिर् वर्जितो
भांऽशेभ्यः३६० परिशोधितो लवमुखश्
चन्द्रस्य पातो भवेत् ।।१२।।

अन्वय— खभुजाहतः, वर्षौघः, निजमहीवह्न्यंशकैः, ऊनितः, (कार्यः), भागादिकः, स्यात् । इन्द्रयाहितमितैः, अंशैः, विहीनः, (कार्यः), पुनः, वर्षौघस्य, भुजावनीलवमितैः, लिप्तादिभिः, वर्जितः, (कार्यः) , भांशेभ्यः, परिशोधितः, (कार्यः), लवमुखः, चन्द्रस्य, पातः, भवेत् ।।१२।।

पदार्थ— खभुजाहतः=२० ले गुनिएको । वर्षौघः=वर्षगण । निजमहीवह्न्यंशकैः=आफ्नो ३१ भागले । ऊनितः=घटेको । कार्यः=गर्नू । भागादिकः =अंशादि । स्यात् =हुन्छ । इन्द्रियाहितमितैः=६५ ले प्रमाण भएका । अंशैः =अंशले । विहीनः=घटेको । कार्यः=गर्नू । पुनः=फेरि । वर्षौघस्य=वर्षगणको । भुजावनीलवमितैः=१२ ले प्रमाण भएका । लिप्तादिभिः=कलादिले । वर्जितः=घटेको । कार्यः=गर्नू । भांशेभ्यः =३६० अंशबाट । परिशोधितः =घटेको । कार्यः=गर्नू । लवमुखः=अंशादि । चन्द्रस्य=चन्द्रमाको । पातः =पात (राहु) । भवेत् =हुन्छ ।।१२।।

भावार्थ— वर्षगणलाई २० ले गुन्नू, गुणनफल अंशरूप हुन्छ । गुणनफललाई ३१ ले भाग लिई अंशादि लब्धि लिनू । गुणनफलबाट लब्धि घटाउनू । शेषबाट ६५ अंश घटाउनू । यो शेष अंशादि प्रथमफल हुन्छ ।

वर्षगणलाई १२ ले भाग लिनू, कलादि लब्धि आउँछ । प्रथमफलबाट यो कलादि लब्धि घटाउनू, शेष अंशादि द्वितीयफल हुन्छ । अंशादि द्वितीयफल ३६० अंशभन्दा बढ्ता भए ३६० ले तष्ट गर्नुपर्छ ।

द्वितीयफल वक्रगति (उल्टो गति) ले राहु हुन्छ । उल्टो गतिले आएको राहुलाई ३६० अंशबाट घटाउनू । यो शेष राहुको ध्रुव (मेषसङ्क्रान्तिकालको राहु) हुन्छ ।।१२।।

$$\text{फल} = \left(२० \text{ व} - \frac{१}{३१} \text{ स्व}\right) \text{अंशादि} - \left(\frac{\text{व}}{१२}\right) \text{कलादि} - \overset{\text{अं}}{६५}$$

फल ३६० अंशभन्दा बढी भए ३६० ले तष्ट गर्नू ।

राहुको ध्रुव = ३६० — फल*

मङ्गलको ध्रुव (मेषसङ्क्रान्तिकालका मध्यम मङ्गल) ल्याउने रीति

नयननवमहीभिः१९२ सङ्गुणो वर्षसङ्घः
खभुजगुण३२०समानैः स्वीयभागैर् विहीनः ।
शरगिरिगुण३७५भागैर् वर्षसङ्घस्य युक्तो
नवकृत४९लवयुक्तो भागपूर्वः कुजः स्यात् ।।१३।।

अन्वय— नयननवमहीभिः, सङ्गुणः, वर्षसङ्घः, खभुजगुणसमानैः, स्वीयभागैः, विहीनः, (कार्यः), वर्षसङ्घस्य शरगिरिगुणभागैः, युक्तः, (कार्यः), नवकृतलवयुक्तः, (कार्यः), भागपूर्वः, कुजः, स्यात् ।।१३।।

पदार्थ— नयननवमहीभिः =१९२ ले । सङ्गुणः =गुनिएको । वर्षसङ्घः =वर्षगण । खभुजगुणसमानैः = ३२० ले प्रमाण भएका । स्वीयभागैः =आफ्ना भागले । विहीनः =घटेका । कार्यः =गर्नू । वर्षसङ्घस्य = वर्षगणको । शरगिरिगुणभागैः = ३७५ भागले । युक्तः =जोडिएको । कार्यः =गर्नू । नवकृतलवयुक्तः =४९ अंश जोडिएको । कार्यः =गर्नू । भागपूर्वः =अंशादि । कुजः =मङ्गल । स्यात् =हुन्छन् ।।१३।।

भावार्थ— वर्षगणलाई १९२ ले गुन्नू, गुणनफल अंशरूप हुन्छ । गुणनफललाई ३२० ले भाग लिई अंशादि लब्धि लिनू । गुणनफलबाट सो लब्धि घटाउनू । शेष अंशादि प्रथमफल हुन्छ ।

वर्षगणलाई ३७५ ले भाग लिई अंशादि लब्धि लिनू । सो लब्धिमा ४९ अंश जोड्नू । योगफल अंशादि द्वितीयफल हुन्छ ।

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ३६३–३७४ पृष्ठमा परेका छन् । त्यहाँ द्वितीयफल ल्याएपछि मात्र ६५ अंश घटाइको छ भने, यहाँ प्रथमफलबाट ६५ अंश घटाएपछि मात्र द्वितीयफल ल्याइएको छ । यसो गर्दा क्रियामा अलिकति तलमाथि परे तापनि अन्तिम फलमा केही फरक पर्दैन ।

प्रथमफल र द्वितीयफलको योग गर्नू योगफल मङ्गलको ध्रुव मेषसङ्क्रान्तिकालका मध्यम मङ्गल) हुन्छ* ।।१३।।

मङ्गलको ध्रुव

$$=\left(\text{१९२ व} - \frac{\text{१}}{\text{३२०}}\text{ख}\right)\text{ अंशादि} + \left(\frac{\text{व}}{\text{३७५}}\right)\text{ अंशादि} + \overset{\text{अं}}{\text{४९}}$$

बुधको शीघ्रोच्चको ध्रुव (मेषसङ्क्रान्तिकालको बुधको शीघ्रोच्च) ल्याउने रीति

वर्षौघो विषयेन्द्रियैर्५५ विनिहतो
व्योमाऽरिबाहू२६०न्मितैः
स्वैर् भागै रहितः समागणमही-
वह्न्य ३१शकैर् ऊनितः ।
सम्पद्येत लवाऽदिको भुजकुभिर्१२
भागैः समुद्राऽक्षिभिर्२४
लिप्ताभी रहितो भवेल् लवमुखं
सौम्यस्य तुङ्गं चलम् ।।१४।।

अन्वय— विषयेन्द्रियैः, विनिहतः, वर्षौघः, व्योमारिबाहून्मितैः, स्वैः, भागैः, रहितः (कार्यः), समागणमहीवह्न्यंशकैः, ऊनितः, (कार्यः), लवादिकः, सम्पद्येत, भुजकुभिः, भागैः, समुद्राक्षिभिः, लिप्ताभिः, रहितः, (कार्यः), लवमुखम्, सौम्यस्य, चलम् तुङ्गम्, भवेत् ।।१४।।

पदार्थ— विषयेन्द्रियैः = ५५ ले । विनिहतः=गुनिएको । वर्षौघः= वर्षगण । व्योमारिबाहून्मितैः= २६० ले प्रमाण भएका । स्वैः=आफ्ना । भागैः = भागले । रहितः=घटेको । कार्यः=गर्नू । समागणमहीवह्न्यंशकैः=वर्षगणको ३१ भागले । ऊनितः=घटेको । कार्यः=गर्नू । लवादिकः=अंशादि । सम्पद्येत =हुन्छ । भुजकुभिः=१२ । भागैः=अंशले । समुद्राक्षिभिः= २४ । लिप्ताभिः =कलाले । रहितः=घटेको । कार्यः=गर्नू । लवमुखम् =अंशादि । सौम्यस्य= बुधको । चलम्=शीघ्र । तुङ्गम् =उच्च । भवेत्=हुन्छ ।।१४।।

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ३७५–३८६ पृष्ठमा परेका छन् । त्यहाँ पहिलो शेषमा ४९ अंश जोडी प्रथमफल ल्याइएको छ भने, यहाँ दोस्रो लब्धिमा ४९ अंश जोडी द्वितीयफल ल्याइएको छ । यस्तो गर्दा क्रियामा अलिकति तलमाथि परे तापनि अन्तिम फलमा केही फरक पर्दैन ।

भावार्थ— वर्षगणलाई ५५ ले गुन्नू । गुणनफल अंशरूप हुन्छ । गुणनफललाई २६० ले भाग लिई अंशादि लब्धि लिनू । गुणनफलबाट सो लब्धि घटाउनू । अंशादि प्रथमफल हुन्छ ।

वर्षंणणलाई ३१ ले भाग लिई अंशादि लब्धि लिनू । सो अंशादि लब्धि प्रथमफलबाट घटाउनू । शेष द्वितीयफल हुन्छ ।

द्वितीयफलबाढ १२ अंश २४ कला घटाउनू । शेष बुधको शीघ्रोच्चको ध्रुव (मेषसङ्क्रान्तिकालको बुधको शीघ्रोच्च) हुन्छ* ॥१४॥

बुधको शीघ्रोच्चको ध्रुव

$$= \left(५५\,व - \frac{१}{२६०}\,स्व \right)\text{अंशादि} - \left(\frac{व}{३१} \right)\text{अंशादि} - \overset{\text{अं}}{१२}\;।\;\overset{\text{क}}{२४}$$

बृहस्पतिको ध्रुव(मेषङ्क्रान्तिकालका मध्यम बृहस्पति) ल्याउने रीति

त्रिंशद्३०निघ्नो वर्षसङ्घः स्वकीयैर्
भागैर् युक्तः सप्तनाग८७प्रमाणैः ।
युक्तो वर्षस्तोमदोर्भूप१६२भागैः
स्वर्गां२१ शोनः स्याद् गुरुर् भागपूर्वः ॥१५॥

अन्वय— त्रिंशद्निघ्नः, वर्षसङ्घः, सप्तनागप्रमाणैः, स्वकीयैः, भागैः, युक्तः, (कार्यः), वर्षस्तोमदोर्भूपभागैः, युक्तः, (कार्यः), स्वर्गांशोनः, (कार्यः), भागपूर्वः, गुरुः, स्यात् ॥१५॥

पदार्थ— त्रिंशद्निघ्नः=३० ले गुनिएको । वर्षसङ्घः=वर्षगण । सप्तनागप्रमाणैः=८७ ले प्रमाण भएका । स्वकीयैः=आफ्ना । भागैः=भागले । युक्तः=जोडिएको । कार्यः=गर्नू । वर्षस्तोमदोर्भूपभागैः=वर्षगणको १६२

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ३८७–४०० पृष्ठमा परेका छन् । त्यहाँ पहिलो शेषबाट १२ अंश २४ कला घटाई प्रथमफल ल्याइएको छ भने, यहाँ द्वितीय फल ल्याइसकेपछि १२ अंश २४ कला घटाइएको छ । यसो गर्दा क्रियामा अलिकति तलमाथि परे तापनि अन्तिम फलमा केही फरक पर्दैन ।

भागले । युक्तः = जोडिएको । कार्यः = गर्नू । स्वर्गांशोनः = २१ अंश घटेको । कार्यः = गर्नू । भागपूर्वः = अंशादि । गुरुः = बृहस्पति । स्यात् = हुन्छन् ।।१५।।

भावार्थ— वर्षगणलाई ३० ले गुन्नू, गुणनफल अंशरूप हुन्छ । गुणनफललाई ८७ ले भाग लिई अंशादि लब्धि लिनू । सो अंशादि लब्धि गुणनफलमा जोड्नू । अंशादि प्रथमफल हुन्छ ।

वर्षगणलाई १६२ ले भाग लिनू, अंशादि लब्धि आउँछ । यो अंशादि लब्धि द्वितीयफल हुन्छ ।

प्रथमफल र द्वितीयफलको योग गर्नू । योगफलबाट २१ अंश घटाउनू । शेष बृहस्पतिको ध्रुव (मेषसङ्क्रान्तिकालका मध्यम बृहस्पति) हुन्छ* ।।१५।।

बृहस्पतिको ध्रुव

$$= \left(३० व + \frac{१}{८७} स्व\right) अंशादि + \left(\frac{व}{१६२}\right) अंशादि — \overset{अं}{२१}$$

शुक्रको शीघ्रोच्चको ध्रुव (मेषसङ्क्रान्तिकालको शुक्रको शीघ्रोच्च) ल्याउने रीति

तत्त्वाश्वि२२५घ्नो वर्षसङ्घः स्वकीयैर्
भागैः शून्याऽब्धीश११४०तुल्यैः समेतः ।
अंशैः सार्द्धैर् अष्टदोर्भिर् २८।३० विहीनो
भागाऽऽद्यं स्याच् शीघ्रतुङ्गं सितस्य ।।१६।।

अन्वय— तत्त्वाश्विघ्नः, वर्षसङ्घः, शून्याब्धीशतुल्यैः, स्वकीयैः, भागैः, समेतः, (कार्यः), सार्द्धैः, अष्टदोर्भिः, अंशैः, विहीनः, (कार्यः), भागाद्यम्, सितस्य, शीघ्रतुङ्गम्, स्यात् ।।१६।।

पदार्थ— तत्त्वाश्विघ्नः = २२५ ले गुनिएको । वर्षसङ्घः = वर्षगण । शून्याब्धीशतुल्यैः = ११४० ले प्रमाण भएका । स्वकीयैः = आफ्ना । भागैः = भागले । समेतः = जोडिएको । कार्यः = गर्नू । सार्द्धैः = आधाले सहित भएका । अष्टदोर्भिः = २८ । अंशैः = अंशले । विहीनः = घटेको । कार्यः = गर्नू ।

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ४००-४१२ पृष्ठमा परेका छन् ।

भागाद्यम्=अंशादि । सितस्य=शुक्रको । शीघ्रतुङ्गम्=शीघ्रोच्च । स्यात्=हुन्छ ।।१६।।

भावार्थ— वर्षगणलाई २२५ ले गुन्नू । गुणनफल अंशरूप हुन्छ । गुणनफललाई ११४० ले भाग लिई अंशादि लब्धि लिनू । गुणनफल र लब्धिको योगफलबाट २८ अंश ३० कला घटाउनू । शेष शुक्रको शीघ्रोच्चको ध्रुव (मेषसङ्क्रान्तिकालको शुक्रको शीघ्रोच्च) हुन्छ* ।।१६।।

शुक्रको शीघ्रोच्चको ध्रुव

$$=\left(\text{२२५ व}+\frac{\text{१}}{\text{११४०}}\text{स्व}\right)\text{ अंशादि }-\overset{\text{अं}}{\text{२८}}\text{।}\overset{\text{क}}{\text{३०}}$$

शनैश्चरको ध्रुव (मेषसङ्क्रान्तिकालका मध्यम शनैश्चर) ल्याउने रीति

सूर्यैर्१२ निघ्नो वर्षसङ्घः स्वकीयैः
षट्पञ्चां५६शैः संयुतो नन्दषड्भिः६९ ।
अंशैर् युक्तो वर्षसङ्घाऽभ्रशून्य-
शक्रां१४००शैर् युग् भागपूर्वः शनिः स्यात् ।।१७।।

अन्वय— सूर्यैः, निघ्नः, वर्षसङ्घः, स्वकीयैः, षट्पञ्चांशैः, संयुतः, (कार्यः), नन्दषड्भिः, अंशैः, युक्तः, (कार्यः), वर्षसङ्घाभ्रशून्यशक्रांशैः, युक्, (कार्यः), भागपूर्वः, शनिः, स्यात् ।।१७।।

पदार्थ— सूर्यैः=१२ ले । निघ्नः=गुनिएको । वर्षसङ्घः=वर्षगण । स्वकीयैः=आफ्ना । षट्पञ्चांशैः=५६ भागले । संयुतः=जोडिएको । कार्यः=गर्नू । नन्दषड्भिः=६९ । अंशैः=अंशले । युक्तः=जोडिएको । कार्यः=गर्नू । वर्षसङ्घाभ्रशून्यशक्रांशैः=वर्षगणको १४०० भागले । युक्=जोडिएको । कार्यः=गर्नू । भागपूर्वः=अंशादि । शनिः=शनैश्चर । स्यात्=हुन्छन् ।।१७।।

भावार्थ— वर्षगणलाई १२ ले गुन्नू, गुणनफल अंशरूप हुन्छ । गुणनफललाई ५६ ले भाग लिई अंशादि लब्धि लिनू । सो अंशादि लब्धि गुणनफलमा जोड्नू । योगफलमा ६९ अंश जोड्नू । योगफल अंशादि प्रथमफल हुन्छ ।

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ४१३–४२३ पृष्ठमा परेका छन् ।

वर्षगणलाई १४०० ले भाग लिनू । अंशादि लब्धि आउछ । सो अंशादि लब्धि द्वितीयफल हुन्छ ।

प्रथमफल र द्वितीयफलको योग गर्नू । योगफल शनैश्चरको ध्रुव (मेषसङ्क्रान्तिकालका मध्यम शनैश्चर) हुन्छ* ॥१७॥

शनैश्चरको ध्रुव

$$= \left(\text{१२ व} + \frac{\text{१}}{\text{५६}}\text{स्व}\right)\text{ अंशादि} + \text{६९ अंश} + \left(\frac{\text{व}}{\text{१४००}}\right)\text{ अंशादि}$$

स्पष्ट सूर्योदयकालका मध्यम ग्रह ल्याउने रीति

एते खेटा वर्षसङ्घप्रजाताः
सम्पद्येरन् मेषसङ्क्रान्तिकाले ।
बीजोनाः स्युस् तद्दिनादौ ध्रुवाख्यास्
ते संयोज्या घस्रसङ्घोत्थखेटैः ॥१८॥

अन्वय— वर्षसङ्घप्रजाताः, एते, खेटाः, मेषसङ्क्रान्तिकाले, सम्पद्येरन् । बीजोनाः, तद्दिनादौ, ध्रुवाख्याः, स्युः । तेः, घस्रसङ्घोत्थखेटैः, संयोज्याः ॥१८॥

पदार्थ— वर्षसङ्घप्रजाताः = वर्षगणबाट भएका । एते = यी । खेटाः = ग्रह । मेषसङ्क्रान्तिकाले = मेषसङ्क्रान्तिकालमा । सम्पद्येरन् = हुन्छन् । बीजोनाः = बीज घटेका छँदा । तद्दिनादौ = मेषसङ्क्रान्तिकालको सूर्योदयकालमा । ध्रुवाख्याः = ध्रुव नाम भएका । स्युः = हुन्छन् । ते = ती ग्रह । घस्रसङ्घोत्थखेटैः = अहर्गणबाट आएका ग्रहले । संयोज्याः = जोड्नुपर्छ ॥१८॥

भावार्थ— माथि बताइएका रीतबाट वर्षगणबाट आएका ग्रहहरू, मेषसङ्क्रान्तिकालका मध्यम ग्रह हुन्छन् । ती ग्रह मेषसङ्क्रान्तिकालका ध्रुव कहाउँछन् । मेषसङ्क्रान्तिकालका मध्यम ग्रहबाट बीज घटाउनू, शेष मेषसङ्क्रान्तिको दिनको स्पष्ट सूर्योदयकालका मध्यम ग्रह हुन्छन् । मेषसङ्क्रान्ति-

---

* यस विषयका उदाहरण, प्रश्न तथा सारणी यसै ग्रन्थका ४२४–४३६ पृष्ठमा परेका छन् ।

कालको दिनको सूर्योदयकालका मध्यम ग्रह ध्रुव कहाउँछन् । मेषसङ्क्रान्तिकालको दिनको सूर्योदयकालका मध्यम ग्रह (ध्रुव) मा अहर्गणबाट आएका ग्रह जोड्नुपर्छ* ।।१८।।

प्रतिसंस्कृत रत्नदीपको पहिलो अध्याय समाप्त भयो ।

[यो निबन्ध पूर्णिमा २५ अङ्कबाट लिइएको हो । प्रतिसंस्कृत रत्नदीपको रामजी तेवारीले गरेको नेपाली अनुवाद यति नै हो ।]

◆

---

* यस विषयका उदाहरण, तथा प्रश्न यसै ग्रन्थको ३३४ पृष्ठमा परेका छन् ।

शुद्धिपत्र

पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध
प्रस्तावनाका—			
२	२	अध्ययन परम्पराबाट	अध्ययनपरम्पराबाट
३	२३	।मुग्लाना	मुग्लाना
५	११	वरपालसिंह	वरपालसिंहः
१५	१७	बिचार	विचार
मूल ग्रन्थका—			
५	२१	शाक	शाकः
६	२७	शाकत्तृंहा	शाककत्तृंहा
८	१४	वक्ष्याम	वक्ष्यामः
१४	७	ऊर्ध्वाधरसूत्रम्	ऊध्वाधरसूत्रम्
१४	१३	अक्षांशः	अक्षांशाः
१७	१९	सिताद्येर्दिन°	सितादेर्दिन°
२०	४	°लव	°लवः
४१	१३	मध्यकर्मणि	मन्दकर्मणि
४४	२२	२६००	३६००
९९	१३	विपरति°	विपरीत°
१००	५	यद्योतत्°	यद्येतत्°
१५०	११	प्रत्तीच्यां	प्रतीच्यां
१५९	८	सूर्यविम्बः	सूर्यबिम्बः
१६६	८	मितेवै क्रमाब्दे	मिते वैक्रमाब्दे
१७७	२	°दोर्भुजानां	°दोर्भजानां
१७७	४	°दोर्भुजाना°	°दोर्भजाना°
१८६	६	°घटिकाभीः	°घटिकाभी
१९२	११	भग ता	भगवता
२०४	१३	°मन्त्य फलज्यया	°मन्त्यफलज्यया
२२०	४	गुणकेना	गुणकेन

पृष्ठ	पङ्क्ति	अशुद्ध	शुद्ध
२६०	४,५,९,१३,१४	ज्या (सु+वि)	ज्या (सू+वि)
२८०	२४	अन्तराद्	अन्तराच्
२८४	२१	°भाद्रपरेवतीनां	°भाद्रपदरेवतीनां
४१३	२१	आअँछ	आउँछ
४२४	११	योगफल'	योगफल
४५३	१०	दिनादिकइहो-	दिनादिक इहो-
४५९	९	वर्षौषस्य	वर्षौघस्य
४७७	२६	पूव-	पूवं-
५०८	२	मेषसङ्क्रान्ति-	(मेषसङ्क्रान्ति-
५११	११	सुर्यैर्	सूर्यैर्

□



नेपाल राजकीय प्रज्ञा-प्रतिष्ठान